गुजरातपुरातत्त्वमन्दिरग्रन्थावली

वैदिकपाठावली

સંપાદક તથા અનુવાદક
રસિકલાલ છોટાલાલ પરીખ

ગૂજરાત પુરાતત્ત્વ મન્દિર
અમદાવાદ

ગૂજરાત
પુરાતત્વ મંદિર
ગ્રન્થાવલી

ગ્રન્થાંક ૧૭

વિજ્ઞાપન.

ગૂજરાત પુરાતત્ત્વમંદિરની પ્રબંધ સમિતિની સંવત ૧૯૮૦ આસો વદ ૧૧ ની બેઠકના ઠરાવ ૮ (પરિશિષ્ટ ૧) મુજબ આ પુસ્તક પ્રસિદ્ધ કરવામાં આવે છે.

ગૂજરાત વિદ્યાપીઠ કાર્યાલય.
અમદાવાદ.
શ્રાવણ, જન્માષ્ટમી સં. ૧૯૮૩.

પ્રકાશક.

वैदिकपाठावली

[મૂળ ગ્રંથ, અનુવાદ, ટિપ્પણી, આદિ સાથે]

સંપાદક તથા અનુવાદક :

રસિકલાલ છોટાલાલ પરીખ

देवस्य पश्य काव्यं न ममार न जीर्यति

અ. વે. કાં. ૧૦. સૂ. ૮. ૩૨.

ગૂજરાત પુરાતત્ત્વ મંદિર

અમદાવાદ

સંવત ૧૯૮૩]   પ્રત ૫૦૦   [સને ૧૯૨૭

કિં. રૂા. ૩. ૮.

પ્રકાશક :
શ્યામલાલ હ. ભગવતી
મહામાત્ર ગૂજરાત વિદ્યાપીઠ

મુદ્રકો :
પૃ. ૧–૨૦૦ ગજાનન વિ. પાઠક
આદિત્ય મુદ્રણાલય
પૃ. ૨૦૧–૪૩૨ ચીમનલાલ ઈશ્વરલાલ મહેતા
વસંત મુદ્રણાલય

વિષયાનુક્રમ

પ્રસ્તાવના.

ઉપયુક્ત પુસ્તકોની યાદી.

ઋગ્વેદ

	વિષય	મં.	સ.	મૂળ.	અનુવાદ.
૧	અગ્નિ	૧.	૧.	૧.	૨૦૧.
૨	વરુણ	૧.	૨૫.	૩.	૨૦૨.
૩	ઇન્દ્ર	૧.	૩૨.	૭.	૨૦૪.
૪	ઉષસ્	૧.	૯૨.	૧૨.	૨૦૭.
૫	અગ્નિ	૧.	૯૭.	૧૮.	૨૧૧.
૬	વિશ્વે દેવો	૧.	૧૦૫.	૧૯.	૨૧૨.
૭	ઋભુઓ	૧.	૧૧૦.	૨૫.	૨૧૬.
૮	ઇન્દ્ર	૨.	૧૨.	૨૯.	૨૧૮.
૯.	ઇન્દ્ર (વિશ્વામિત્ર અને નદીઓ)	૩.	૩૩.	૩૫.	૨૨૦.
૧૦	આત્મા (વરુણ-ઇન્દ્રનો સંવાદ)	૪.	૪૨.	૪૦.	૨૨૩.
૧૧	ઉષસ્	૪.	૫૧.	૪૩.	૨૨૬.
૧૨	મિત્રાવરુણ	૫.	૬૨.	૪૭.	૨૨૮.
૧૩	પર્જન્ય	૫.	૮૩.	૫૦.	૨૩૧.
૧૪	પૃથિવી	૫.	૮૪.	૫૪.	૨૩૨.
૧૫	વરુણ	૫.	૮૫.	૫૫.	૨૩૩.
૧૬	પૂષન્	૬.	૫૮.	૫૮.	૨૩૫.
૧૭	ઇંદ્રાવરુણ	૭.	૮૩.	૬૦.	૨૩૬.
૧૮	વરુણ	૭.	૮૬.	૬૩.	૨૩૮.
૧૯	વરુણ	૭.	૮૮.	૬૬.	૨૪૦.
૨૦	અશ્વિનો	૮.	૧૦.	૬૯.	૨૪૧.
૨૧	સોમ પવમાન	૯.	૧૧.	૭૧.	૨૪૩.
૨૨	યમ	૧૦.	૧૪.	૭૩.	૨૪૪.

	વિષય	મં.	સૂ.	મૂળ.	અનુવાદ.
૨૩	અક્ષ	૧૦.	૩૪.	૭૯.	૨૪૭.
૨૪	નદીઓ (સિંધુ)	૧૦.	૭૫.	૮૪.	૨૪૯.
૨૫	વિશ્વકર્મા	૧૦.	૮૨.	૮૭.	૨૫૧.
૨૬	પુરૂરવા–ઉર્વશી	૧૦.	૯૫.	૯૦.	૨૫૩.
૨૭	પણિ–સરમા	૧૦.	૧૦૮.	૯૭.	૨૫૮.
૨૮	દાનસ્તુતિ	૧૦.	૧૧૭.	૧૦૨.	૨૬૦.
૨૯	હિરણ્યગર્ભ	૧૦.	૧૨૧.	૧૦૫.	૨૬૨.
૩૦	પરમાત્મા (વાગ્દેવી)	૧૦.	૧૨૫.	૧૦૮.	૨૬૩.
૩૧	રાત્રિ	૧૦.	૧૨૭.	૧૧૧.	૨૬૫.
૩૨	પરમાત્મા (નાસદીય સૂક્ત)	૧૦.	૧૨૯.	૧૧૩.	૨૬૬.
૩૩	અરણ્યાની	૧૦.	૧૪૭.	૧૧૬.	૨૬૭.
૩૪	સૃષ્ટિ–ઉત્પત્તિ	૧૦.	૧૯૦.	૧૧૭.	૨૬૮.

શુક્લ યજુર્વેદ

અધ્યાય

		અધ્યાય	મૂળ	અનુવાદ
૩૫	દર્શપૂર્ણમાસમન્ત્રો	૧.	૧૨૧.	૨૬૯.
૩૬	મન (શિવસંકલ્પ મન્ત્રો)	૩૪.	૧૨૬.	૨૭૭.

કૃષ્ણ યજુર્વેદ

		કા.	પ્રપા.	અનુ.	મૂળ	અનુવાદ
૩૭	પત્નીવિષયક મન્ત્રો	૩.	૫.	૬.	૧૨૭.	૨૭૮.
૩૮	ઔષધીગ્રાપ	૪.	૨.	૬.	૧૨૮.	૨૭૯.
૩૯	કવચસ્વીકારાદિ	૪.	૬.	૬.	૧૩૦.	૨૮૨.

અથર્વવેદ

		કા.	સૂ.	મૂળ	અનુવાદ
૪૦	વાચસ્પતિ	૧.	૧.	૧૩૫.	૨૮૬.
૪૧	દ્યાવાપૃથિવી	૧.	૩૨.	૧૩૬.	૨૮૭.
૪૨	બ્રહ્મ	૨.	૧.	૧૩૭.	૨૮૮.
૪૩	વિવિધ દેવતા	૨.	૧૨.	૧૩૮.	૨૮૮.

	વિષય	કાં.	સૂ.	મૂળ.	અનુવાદ.
૪૪	અગ્નિ-સોમ (કન્યા માટે વર-પ્રાપ્તિ)	૨.	૩૬.	૧૩૯.	૨૯૦.
૪૫	વિવિધ દેવતા (રાજાનો સ્વરાષ્ટ્ર પ્રવેશ)	૩.	૩.	૧૪૦.	૨૯૧.
૪૬	ઇન્દ્ર. (રાજાનો સ્વરાષ્ટ્ર પ્રવેશ)	૩.	૪.	૧૪૧.	૨૯૨.
૪૭	ઇન્દ્ર—અગ્નિ (વેપારીની પ્રાર્થના)	૩.	૧૫.	૧૪૨.	૨૯૩.
૪૮	સામ્મનસ્ય	૩.	૩૦.	૧૪૩.	૨૯૪.
૪૯	રાજ્યાભિષેક	૪.	૮.	૧૪૪.	૨૯૫.
૫૦	વરુણ	૪.	૧૬.	૧૪૫.	૨૯૬.
૫૧	વરુણ (અથર્વા—વરુણનો સંવાદ)	૫.	૧૧.	૧૪૬.	૨૯૭.
૫૨	બ્રહ્મકર્મ	૫.	૨૪.	૧૪૮.	૨૯૯.
૫૩	જાયાપતીવિષયક	૬.	૭૮.	૧૫૦.	૩૦૦.
૫૪	આત્મા	૭.	૧.	૧૫૧.	૩૦૧.
૫૫	અધ્યાત્મદૈવત્ય	૧૦.	૮.	૧૫૧.	૩૦૧.
૫૬	પૃથિવી સૂક્ત	૧૨.	૧.	૧૫૦.	૩૦૭.
૫૭	કાલ	૧૯.	૫૩.	૧૬૫.	૩૧૭.

તાણ્ડ્યમહાબ્રાહ્મણ

		અધ્યાય	ખણ્ડ.		
૫૮	ગાયત્રી-આખ્યાયિકા	૮.	૪.	૧૬૯.	૩૨૧.
૫૯	કલ્યાણ આંગિરસ	૧૨.	૧૦.	૧૭૦.	૩૨૨.
૬૦	શિશુ આંગિરસ	૧૩.	૩.	૧૭૧.	૩૨૩.
૬૧	યતિઓ	૧૩.	૪.	૧૭૨.	૩૨૩.
૬૨	વત્સ	૧૪.	૬.	૧૭૩.	૩૨૪.

વિષય	અ.	ખણ્ડ.		મૂળ.	અનુવાદ.
૬૩ વસિષ્ઠ	૧૫.	૫.		૧૭૪.	૩૨૪.
૬૪ દેવો—અસુરો	૨૧.	૧૩.		૧૭૫.	૩૨૫.
૬૫ ઇન્દ્ર—રુશમા	૨૪.	૧૩.		૧૭૬.	૩૨૫.

ઐતરેય બ્રાહ્મણ.

	પ્ર.	અ.	ખ.		
૬૬ શુનઃશેપનું આખ્યાન	૭.	૩૩.	૧.	૧૭૭.	૩૨૬.
૬૭ ઐન્દ્ર મહાભિષેક	૮.	૩૮.	૧.	૧૮૫.	૩૩૫.
૬૮ ક્ષત્રિયાભિષેક	૮.	૩૪.	૧.	૧૮૮.	૩૪૧.

શતપથ બ્રાહ્મણ.

	કા.	અ.	બ્રા.		
૬૯ વ્રતોપાયન	૧.	૧.	૧.	૧૮૯.	૩૪૨.
૭૦ મનુમત્સ્યવૃત્તાંત	૧.	૮.	૧.	૧૯૧.	૩૪૫.
૭૧ અશ્વિચ્યવનોપાખ્યાન	૪.	૧.	૧.	૧૯૨.	૩૪૬.
૭૨ યૂપારોહ	૫.	૨	૧.	૧૯૫.	૩૪૮.
શબ્દાનુક્રમ					૩૫૩.
ધાતુકોશ					૪૧૫.
સુધારા વધારા					૪૩૦.

પ્રસ્તાવના

પુરાતત્ત્વમંદિરે સૌથી પ્રથમ પ્રાચીન ભાષા અને સાહિત્યના અધ્યયન માટે પ્રાવેશિક પુસ્તકો તૈયાર કરવાનો ઠરાવ કર્યો. આ ઠરાવ પ્રમાણે ઉપનિષત્પાઠાવલી, પાલીપાઠાવલી તથા પ્રાકૃતકથાસંગ્રહ મંદિર તરફથી પ્રકટ થયાં છે. તેમાં વેદકાલના અન્તિમ યુગની ભાષા, બૌદ્ધ તિપિટકની ભાષા તથા મધ્યયુગની પ્રાકૃત ભાષાઓનો પરિચય થાય છે. સંસ્કૃતના પરિચય માટે અનેક ગ્રંથો હયાત છે એટલે તે માટે તાત્કાલિક નવો પ્રયત્ન કરવાની જરૂર જણાઇ નહિ. વેદકાલીન ભાષા અને સાહિત્યમાં પ્રવેશ તથા તેનો પરિચય કરવા માટે પણ એક પુસ્તકની જરૂર જણાઇ. આ જાતનાં જે ગ્રંથો પ્રસિદ્ધ છે તે કેવળ ઋગ્વેદ પૂરતાં જ છે: જેવાં કે પીટરસનના હીમ્સ ફ્રૅામ ધી ઋગ્વેદ કે પ્રો. બીજાપુરકરનો ઋક્સંગ્રહ. બોથલીંગની સંસ્કૃત ક્રેસ્ટોમથીમાં વેદથી હિતોપદેશ સુધી સંગ્રહ છે પણ તે સુલભ નથી. આ જરૂર પૂરી પાડવા માટે આ પાઠાવલી તૈયાર કરવામાં આવી છે.

मन्त्रब्राह्मणयोर्वेदनामधेयम्-[आ. प. ३१] એ આપસ્તંબના સૂત્રને અનુસરી આમાં સંગ્રહ કરવામાં આવ્યો છે. મન્ત્ર ભાગમાં ઋગ્વેદ, યજુર્વેદ, સામવેદ તથા અથર્વવેદનો સમાવેશ થાય છે. બ્રાહ્મણ ભાગમાં ઋગ્વેદના ઐતરેય બ્રાહ્મણ આદિનો, સામવેદના તાણ્ડ્યમહાબ્રાહ્મણ આદિનો, યજુર્વેદના શતપથબ્રાહ્મણ આદિનો અને અથર્વવેદના ગોપથબ્રાહ્મણ આદિનો સમાવેશ થાય છે.

કાલક્રમની દૃષ્ટિએ, વિષયની મૌલિકતાની દૃષ્ટિએ, અને ઐતિહાસિક ઉપયોગિતાની દૃષ્ટિએ ઋગ્વેદનું મહત્ત્વ સૌથી વધારે છે. બીજા વેદોમાં જે મન્ત્રો આવે છે તે મોટે ભાગે ઋગ્વેદમાંથી જ લીધેલા છે. સામવેદમાં તો નવા મન્ત્રો બહુ થોડા છે-વિદ્વાનોની ગણત્રી પ્રમાણે કેવળ ૭૫ મન્ત્રો જ નવા છે—અને છે તે પણ જુના મન્ત્રોની સાથે સોમયાગની દૃષ્ટિએ ગોઠવાએલા છે; એટલે એમાંથી કાંઇ પણ આ પાઠાવલીમાં લીધું નથી. સામવેદ એ એક રીતે સ્વતન્ત્ર વેદ પણ ન કહેવાય; એને ઋગ્વેદનો સંગીત–રૂપાત્મક વેદ કહી શકાય. યજુર્વેદમાં પણ ઘણો ભાગ તો ઋગ્વેદના મન્ત્રોનો જ બનેલો છે. પણ એમાં ગદ્યાત્મક અને પદ્યાત્મક કેટલોક નવો ભાગ છે. અથર્વવેદમાં પણ ઋગ્વેદના ઘણા મન્ત્રો છે છતાં બીજા બે વેદોની અપેક્ષાએ એના વીશ કાણ્ડોમાં

ઘણા નવા મન્ત્રો છે. આ મન્ત્રોમાં કેટલાક તો ઋગ્વેદના જૂના મન્ત્રોના જેટલા જ જૂના ગણાય છે. તેમનું ઐતિહાસિક દષ્ટિએ તથા વિષયની દષ્ટિએ પણ ઘણું મહત્ત્વ છે. એથી આ ગ્રંથમાં ય. વે. કરતાં તેમાંથી વધારે પાઠો લેવામાં આવ્યા છે.

ઋગ્વેદમાંથી પાઠો લેવામાં અનેક દૃષ્ટિઓ રાખવામાં આવી છે. સૌથી પ્રથમ તો લગભગ બધા મુખ્ય દેવતાઓનો ખ્યાલ આવે એ દૃષ્ટિ છે. આની સાથે નાસદીયસૂક્ત જેવાં તત્ત્વજ્ઞાનવિષયકસૂક્તો તથા અક્ષસૂક્ત જેવાં સમાજની બીજી બાજુ બતાવતાં સૂકતો પણ આપ્યાં છે. પુરૂરવા-ઉર્વશીનો સંવાદ તથા પણિ-સરમાનો સંવાદ જેવાં સૂકતો સાહિત્યના રૂપોના ઇતિહાસમાં મહત્ત્વના મનાયાં છે. આ બધો વિષય ઋગ્વેદના દશે મણ્ડલમાંથી કાંઇક કાંઇક આવે એ રીતે આપવા પ્રયત્ન કર્યો છે. આથી ઋગ્વેદના સૂક્તોમાં પણ ભાષા કેવી રીતે ફેરફાર પામે છે એની ઝાંખી થાય છે.

યજુર્વેદમાં યજ્ઞવિધિનું મહત્ત્વ છે. આમાં દર્શયાગ અને પૂર્ણમાસયાગ કરતી વેળાએ વપરાતા મન્ત્રોવાળો વાજસનેયિ માધ્યંદિની શાખાની સંહિતાનો પ્હેલો અધ્યાય આપ્યો છે. મનોદેવતાવિષયક સુંદર મન્ત્રો આપી એ બતાવવા પ્રયત્ન કર્યો છે કે એ જમાનામાં કેવળ લોકોનું ચિત્ત કર્મકાણ્ડ જટિલ ન હતું, કે જેમ કેટલાક વિદ્વાનો માને છે. કૃષ્ણ યજુર્વેદની સંહિતાને હાલના વિદ્વાનો જો કે શુ. ય. ની સંહિતા કરતાં પ્રાચીન માને છે, છતાં બન્નેમાં મન્ત્રાત્મક ભાગ લગભગ સમાન હોવાથી જૂની રૂઢિને અનુસરી મેં કૃ. ય. વે. ની તૈત્તિરીય સંહિતામાંથી પાઠો શુ. ય. વે. ના પાઠો પછી મુકયા છે. સુપ્રસિદ્ધ અશ્વમેધમાં ક્ષત્રિય શસ્ત્રદીક્ષા લે છે તે સમયે વપરાતા મન્ત્રો આ ભાગમાં આપ્યા છે. આ અનુવાકમાં આવતા મન્ત્રો ઋગ્વેદના બે સૂકતોના મન્ત્રોમાંથી લેવામાં આવ્યા છે-તે ઉપરથી એ પણ સમજાય છે કે ઋગ્વેદના મન્ત્રોનો અર્થાનુકૂલ વિધિ માટે કેવી રીતે ઉપયોગ થતો. વનસ્પતિવિષયક તથા પત્નીવિષયક મન્ત્રો પણ આ ભાગમાં આપ્યા છે.

અથર્વવેદના મન્ત્રોમાં બે સામસામી કોટિના વિષયો છે. એક બાજુ ઊર્ધ્વગામી તત્ત્વજ્ઞાનના સૂકતો છે અને બીજી બાજુ અધમ અભિચાર મન્ત્રો છે; અને સૌથી વધારે વિલક્ષણ બાબત તો એ છે કે કેટલાક સ્થાને અતિ ઉચ્ચ કલ્પનાઓનો હલકા પ્રયોજનો માટે વિનિયોગ કરેલો છે, ઉ. ત. કા. ૪. સૂ.

૧૬. પૃ. ૧૪૫. ઋગ્વેદમાંથી સૂકતો આપવામાં જેમ મુખ્ય દૃષ્ટિ દેવતાવિષયક છે તેમ અથર્વવેદમાંથી સૂકતો આપવામાં મુખ્ય દૃષ્ટિ તત્ત્વજ્ઞાનની તથા ઉચ્ચ કલ્પનાની છે. આ માટે ખાસ કરીને કા. ૧૦ સૂ. ૮ નું અધ્યાત્મદેવત્ય સૂકત તથા કા. ૧૨. સૂ. ૧ નું પૃથ્વી સૂકત જેવાં લાંબા સૂકતો આખ્ખાં આપ્યાં છે. સામાજિક સ્થિતિની કલ્પના આપવા રાજાને સ્વરાષ્ટ્ર પ્રવેશ કરાવવા બાબતના કા. ૩. સૂ. ૩; અને સૂ. ૪ આપ્યાં છે; વાણિજ્યલાભ માટેનું એક સૂકત જેમાં ઇન્દ્રને 'વણિક' કહેલો છે તે પણ આપ્યું છે. લોકોમાં સાંમનસ્ય ફેલાવવાનું સૂકત આપવામાં પણ આ દૃષ્ટિ છે.

વિદ્યમાન બ્રાહ્મણ ગ્રંથોમાં સામવેદનું તાણ્ડ્યમહાબ્રાહ્મણ સૌથી પ્રાચીન મનાય છે. એટલે તેમાંથી પાઠો પ્રથમ આપ્યા છે. બ્રાહ્મણ ગ્રંથોમાં યજ્ઞસંબંધી વિવિધ વિષયો આવે છે; તેમાંથી મેં મોટા ભાગે ગદ્યાત્મક કથાઓ જ પસંદ કરી છે. આ ગદ્ય મોટા ભાગે સરળ અને સંસ્કારી છે; અને આ પ્રણાલી જો પછીના સંસ્કૃત ગદ્યમાં ચાલુ રહી હોત તો સંસ્કૃત ગદ્ય સાહિત્ય કેટલું સરસ થાત એની આપણને કલ્પના આવે છે. ઐતરેય બ્રાહ્મણમાંથી સુપ્રસિદ્ધ શુનઃશેપ આખ્યાન આપ્યું છે. આ આખ્યાનનું અનેક દૃષ્ટિએ મહત્ત્વ છે, તેમાં એ ખાસ કરીને સામાજિક દૃષ્ટિએ. ઇન્દ્રના મહાભિષેક તથા ક્ષત્રિયના અભિષેકવિષયક જે ભાગો આપ્યા છે તે આપણી પ્રાચીન શાસનવ્યવસ્થાઓના ઇતિહાસની દૃષ્ટિએ મહત્ત્વના છે. શતપથ બ્રાહ્મણમાંથી શતોપાયનવિષયક પાઠ આપ્યો છે તે તે જાતની વિધિનો ખ્યાલ આપે છે. યૂપારોહ બ્રાહ્મણમાંથી જે ભાગ આપ્યો છે તે તે જમાનામાં સમાજમાં પત્નીનું કેટલું મહત્ત્વ હતું તે બતાવે છે. આ ઉપરાંત મનુ-મત્સ્ય વૃત્તાન્ત (કે જેમાં મહાપૂરમાંથી એકલો મનુ મત્સ્યની મદદથી કેવી રીતે બચે છે તે આવે છે) અને ચ્યવનોપાખ્યાન (જેમાં સુકન્યાની વાત આવે છે) ની કથાઓ પણ તેમાં આપી છે.

આ પાઠાવલીમાં પ્રથમ તો બીજી પાઠાવલીઓની જેમ કેવળ મૂળ પાઠો આપવાના હતા. પણ પુરાતત્ત્વમંદિરના આચાર્ય શ્રી. જિનવિજયજીએ આ ગ્રંથ અભ્યાસકોને વધારે ઉપયોગી થાય એ માટે એની સાથે અનુવાદ અને ટિપ્પણી આપવાનો આદેશ કર્યો. અને તે પ્રમાણે મૂળગ્રંથની સાથે મેં અનુવાદ તથા તેની નીચે ટિપ્પણી આપેલાં છે. અભ્યાસકોના ઉપયોગ માટે શબ્દાનુક્રમ તથા સાર્થધાતુકોશ પણ આપેલાં છે.

અનુવાદ કરવામાં સ્વીકારેલી પદ્ધતિ વિષે કાંઇક કહેવાની જરૂર છે, ખાસ કરીને ઋગ્વેદના વિષયમાં. આ સ્થળે ઋગ્વેદના અનુવાદ સંબંધી જે જે વિવિધ મતો પ્રવર્તે છે તેની ચર્ચા થઇ શકે નહિ. તે માટે સ્વતન્ત્ર લેખની જરૂર છે. અનુવાદમાં સૌથી પ્રથમ આધાર સાયણાચાર્યના ભાષ્યનો રાખ્યો છે. દરેક સ્થળે સાયણ પ્રમાણે જ અર્થ કર્યો છે એમ નથી. વેદને સમજવા માટે યૂરોપીય વિદ્વાનોએ જે પ્રયત્નો કર્યા છે તે જોયા પછી દરેક સ્થળે સાયણનો અર્થ ઉચિત લાગે એ બને એવું નથી. પણ આ પ્રયત્નો જોયા પછી પણ એમ તો ખાત્રી થાય છે કે વેદ સમજવામાં સૌથી વધારે મદદ સાયણભાષ્યમાંથી જ મળે છે. અમુક સ્થાને સાયણથી જૂદો અર્થ કરવા માટે પણ સાયણનો અન્ય સ્થળનો અર્થ મદદરૂપ થાય છે. આ ઉપરાંત વેદને સમજવા માટે જે થોડી ઘણી પરંપરા હશે તેનો ઉપયોગ સાયણે કર્યો છે. આથી મેં સૌથી પ્રથમ સ્થાન સાયણભાષ્યને આપ્યું છે. અને જે સ્થળે અર્થ જુદી રીતે કર્યો છે તે સ્થળે ટિપ્પણીમાં સાયણનો અભિપ્રાય પ્રાયશઃ આપ્યો છે. આ સાથે શક્ય હોય ત્યાં તે તે સ્થળે મેક્ષમુલર, ઓલ્ડનબુર્ગ, ગ્રીફીથ, મેકડોનલ આદિના ઋગ્વેદના અંગ્રેજી અનુવાદોની મદદ લીધી છે. જ્યાં જરૂર લાગી ત્યાં ગ્રાસમાનના જર્મન અનુવાદની તથા પુરૂરવા-ઉર્વશી સૂક્ત માટે પિશેલ અને ગેલ્ડનરના વેદિશ ષ્ટુડીઅનનો ઉપયોગ કર્યો છે; અને અનેક સ્થળે રોથના સેં. પી. લે. નો. પણ ઉપયોગ કર્યો છે. પણ જર્મન ભાષાનું મારૂં જ્ઞાન નહિ જેવું હોવાથી તે વિદ્વાનોના સમર્થ પ્રયત્નોનો હું જોઇએ તેવો લાભ ઉઠાવી શક્યો નથી. આ ઉપરાંત અનેક સ્થળમાં નિઘ-ણ્ટુ તથા યાસ્કના નિરુક્તમાંથી સ્વતંત્ર અર્થ વિચારવામાં ખૂબ મદદ મળી છે. આ બધું મેં તે તે સ્થળે ટિપ્પણીમાં જણાવ્યું છે. બીજા ભાગોના અનુવાદ માટે ભાષ્યો ઉપરાંત જે અન્ય અનુવાદકોમાંથી મદદ લીધી છે તે તે સ્થળે તથા સંક્ષેપસૂચિમાં જણાવ્યા છે.

આ પ્રયત્નની અનેક ઊણપોનું મને ભાન છે. આ ગ્રંથમાં વૈદિક સાહિ-ત્યના પરિચયની તથા વૈદિક ભાષાના વ્યાકરણની અને છંદની માહીતીની અપેક્ષા રહે એ સ્વાભાવિક છે. પણ અનેક કારણથી તે બીજા પ્રસંગ ઉપર મુલતવી રાખવું પડયું છે. છાપવાની ભુલો માટે અભ્યાસકોની મારે માફી માંગવાની છે. અનવડાતના જે જે દોષો આ ગ્રંથમાં રહી ગયા હોય તે બતાવી વિદ્વાનો મને ઉપકૃત કરશે.

આ સ્થળે ઋગ્વેદ મને પ્રથમ શીખવનાર તથા તેમાં રસ ઉત્પન્ન કરનાર કૈ. વા. ડૉકટર પાણ્ડુરંગ દામોદર ગુણેનું કરુણ સ્મરણ કરી કૃતકૃત્ય થાઉં છું. આ પ્રયાસમાં જે કાંઇ સારૂં અને ઉપયોગી હોય તો તે સહૃદય શિષ્યપ્રિય વિદ્વાનને આભારી છે. તેમનાં અકાલ અવસાનથી આપણી પ્રાચીન સંસ્કૃતિના અભ્યાસને મોટી ખોટ પડી છે.

આ ગ્રંથ તૈયાર કરવાનો આદેશ કરવા માટે તથા અનેક મુશ્કેલીના પ્રસંગે ઉત્સાહ આપવા માટે આચાર્ય શ્રી. જિનવિજયજીનો આભારી છું.

યજુર્વેદના મન્ત્રો તથા તેનો વિનિયોગ સમજવામાં અધ્યાપક હરિનારાયણ આચાર્યે મને જે મદદ કરી છે તે માટે તેમનો આભારી છું. જે ભાગ સમજવામાં તેમના તરફથી મદદ મળી છે તે સ્થાને તેમનો નિર્દેશ કર્યો છે.

વિદ્વાનોને આ ગ્રંથ જોતાં જે કાંઇ ભુલો દેખાય તે બતાવી મને ઉપકૃત કરશે એવી આશા છે.

ગૂજરાત પુરાતત્ત્વમંદિર
અમદાવાદ
શ્રાવણી પૂર્ણિમા શનિવાર
વિ. સં. ૧૯૮૩

રસિકલાલ છોટાલાલ પરીખ.

ઉપયુક્ત પુસ્તકોની યાદી

તથા સંક્ષિપ્ત નામોની સમજૂતી

અ. વે. — અથર્વવેદ સં. શંકર. પા. પણ્ડિત. મોમ્બે સંસ્કૃત સીરીઝ.

ઉ. — ઉવટનું વાજસનેયી માધ્યંદિની શાખાના શુક્લ યજુર્વેદ ઉપર ભાષ્ય. નિર્ણયસાગર પ્રેસ.

ઋ. વે. — ઋગ્વેદ. મેક્ષમુલર. ઓક્ષફર્ડ યુનીવર્સીટી પ્રેસ

ઋ. વે. જર્મન અનુવાદ. } પ્રો. ગ્રાસમાને કરેલો ઋ. વે. નો જર્મન અનુવાદ.

ઋ. વે. વૉ ૧, (ગ્રીફીથ). } ગ્રીફીથે કરેલો ઋગ્વેદનો અંગ્રેજી અનુવાદ.

ઐ. બ્રા. — ઐતરેય બ્રાહ્મણ. આનન્દાશ્રમ સંસ્કૃત સીરીઝ.

ઐ. બ્રા. હા. ઓ. સી. } પ્રો. કીથનો ઐતરેય બ્રાહ્મણનો અંગ્રેજી અનુવાદ. હારવર્ડ ઓરીઅન્ટલ સીરીઝ

ઐ. બ્રા.નો અનુવાદ. હૉગનો ઐ. બ્રા.નો અંગ્રેજી અનુવાદ.

કા. — કાણ્ડ

કા. શ્રૌ. — કાત્યાયનનું શ્રૌતસૂત્ર.

કીથ. — પ્રો. કીથનો કૃષ્ણ યજુર્વેદનો અંગ્રેજી અમુવાદ હારવર્ડ ઓરીઅન્ટલ સીરીઝ.

કૃ. ય. — કૃષ્ણ યજુર્વેદ. આનન્દાશ્રમ સંસ્કૃત સીરીઝ

ગ્રીફીથ. અ. વે. ગ્રીફીથનો અથર્વવેદનો અંગ્રેજી અનુવાદ.

તૈત્તિરીય બ્રા. તૈત્તિરીય બ્રાહ્મણ.

ન. દ. મ્હેતાનો હિંદ તત્ત્વજ્ઞાનનો ઇતિહાસ (પૂર્વાધ). ગુજરાત વર્નાક્યુલર સોસાયટી.

નિઘ. — નિઘણ્ટુ }
નિરુ. — નિરુક્ત } પ્રો. ભડકમકર. બો. સં. સી.

પિશેલ અને ગેલ્ડનરના વેદિશષ્ટુડીઅન.

પુ. મં. ગ્ર. પુરાતત્ત્વ મંદિર ગ્રન્થાવલી. (ધમ્મપદ)

પૈ. પાઠ. — અથર્વવેદની પૈપ્પલાદ શાખાનો પાઠ.

મ.	શુક્લ યજુર્વેદ ઉપર મહીધરનું ભાષ્ય. નિ. સા. પ્રેસ.
મં.	મંડલ
મ. સ્મૃ.	મનુસ્મૃાત
મ્યૂર.	મ્યૂરની ઓરીજીનલ સંસ્કૃત ટેકસ્ટસ
વે. ગ્રા.	વૈદિક ગ્રામર. પ્રો. મેકડોનલ. ઑ. યુ. પ્રે.
	મોટું વેદિક ગ્રામર પ્રો. મેકડોનલ એનસાયકલોપીડીઆ ઑફ ઇન્ડો આર્યન રીસર્ચ.
વે. મા.	વૈદિક માયથોલૉજી. પ્રો. મેકડોનલની. એન. ઇ. આ. રી.
વે. ય.	વેદાર્થયત્ન (મરાઠીમાં) શંકર પાણ્ડુરંગ પંડિત.
વે. રી.	વેદિક રીડર પ્રો. મેકડોનલની. ઑ. યુ. પ્રે.
વ્હી. અ.	વ્હીટનીનો અર્થવેદનો અનુવાદ. હા. ઓ. સી.
શ. બ્રા.	શતપથ બ્રાહ્મણ. વેબર સંપાદિત.
શ. બ્રા. અનુવાદ.	એગલિન્ગનો શતપથબ્રાહ્મણનો અનુવાદ સે. બુ. ઈ.
સા.	સાયણાચાર્યનાં ઋ૦ વે૦, કૃ. ય. વે૦, અ. વે૦, તા. મ. બ્રા૦; ઐ. બ્રા. અને શ. બ્રા. ઉપરનાં ભાષ્ય.
સૂ.	સૂક્ત.
સે. બુ. ઇ.	સેક્રેડ બુકસ ઓફ ધી ઇસ્ટ.
સેં. પી. લે.	રૉથ અને બોથલીંગનો સેન્ટપીટર્સબર્ગ લેકિસ્કોન.
હીમ્સ ઑફ ધી અથર્વ વેદ.	પ્રો. બ્લૂમફીલ્ડ સે. બુ. ઇ.
હીમ્સ ઓફ ધી ઋગ્વેદ.	ઑલ્ડનબુર્ગનો અનુવાદ. સે. બુ. ઇ. વૉ. ૪૬
,,	મેક્ષમુલરનો અનુવાદ. સે. બુ. ઇ. વૉ, ૩૨.
હી. ઋ. હે. ઑ. ઇ. સ,	હીમ્સ ફ્રૉમ ધી ઋગ્વેદ અનુવાદક પ્રો. મેકડોનલ. હેરીટેજ ઑફ ઇન્ડીઆ સીરીઝ.
હી. ફ્રૉ. ઋ.	હીમ્સ ફ્રૉમ ધી ઋગવેદ. સંપાદક પ્રો. પીટરસન ઑ. સં. સી.
હી. પો.	હીન્દુ પૉલીટી જયસ્વાલ.

Whet oan India teach us. Maxmuller

ॐ

वैदिकप्रार्थनावलि.

वेदपुरुषाय नमः

[मं. १. सू. १]

अग्निमीळ इति सूक्तं प्रातरनुवाक आग्नेये क्रतौ विनियुक्तम् ।—एतत् सूक्तं नवर्चम् । विश्वामित्रपुत्रो मधुच्छंदोनामक स्तस्य सूक्तस्य द्रष्टृत्वात्तदीय ऋषिः । गायत्रं छंदः । अग्निर्देवः ।

ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं ।
होतारं रत्नधातमं ॥ १ ॥

ॐ अग्निं । ईळे । पुरःऽहितं । यज्ञस्य । देवं । ऋत्विजं ।
होतारं । रत्नऽधातमं ॥ १ ॥

अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत ।
स देवाँ एह वक्षति ॥ २ ॥

अग्निः । पूर्वेभिः । ऋषिऽभिः । ईड्यः । नूतनैः । उत ।
सः । देवान् । आ । इह । वक्षति ॥ २ ॥

अग्निना रयिमश्नवत्पोषमेव दिवेदिवे ।
यशसं वीरवत्तमं ॥ ३ ॥

अग्निना । रयिं । अश्नवत् । पोषं । एव । दिवेऽदिवे ।
यशसं । वीरवत्ऽतमं ॥ ३ ॥

अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि ।
स इद्देवेषु गच्छति ॥ ४ ॥

अग्ने । यं । यज्ञं । अध्वरं । विश्वतः । परिऽभूः । असि ।
सः । इत् । देवेषु । गच्छति ॥ ४ ॥

अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः ।
देवो देवेभिरा गमत् ॥ ५ ॥

अग्निः । होता । कविऽक्रतुः । सत्यः । चित्रश्रवःऽतमः ।
देवः । देवेभिः । आ । गमत् ॥ ५ ॥

यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि ।
तवेत्तत्सत्यमङ्गिरः ॥ ६ ॥

यत् । अङ्ग । दाशुषे । त्वं । अग्ने । भद्रं । करिष्यसि ।
तव । इत् । तत् । सत्यं । अङ्गिरः ॥ ६ ॥

उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयं ।
नमो भरन्त एमसि ॥ ७ ॥

उप । त्वा । अग्ने । दिवेऽदिवे । दोषाऽवस्तः । धिया । वयं ।
नमः । भरन्तः । आ । इमसि ॥ ७ ॥

राजन्तमध्वराणां गोपामृतस्य दीदिविं ।
वर्धमानं स्वे दमे ॥ ८ ॥

राजन्तं । अध्वराणां । गोपां । ऋतस्य । दीदिविं ।
वर्धमानं । स्वे । दमे ॥ ८ ॥

स नः पितेव सूनवेऽग्ने सूपायनो भव ।
सचस्वा नः स्वस्तये ॥ ९ ॥

सः । नः । पिताऽइव । सूनवे । अग्ने । सुऽउपायनः भव ।
सचस्व । नः । स्वस्तये ॥ ९ ॥

राजसूयेऽभिषेचनीयेऽहनि मरुत्वतीये परिसमाप्ते सति सूक्तसप्तक मभिषिक्तस्य पुत्रादिभिः परिवृतस्य राज्ञः पुरस्ताद्धोत्राऽऽख्यातव्यः । [तत्र] यच्चिदित्येकविंशत्यृचं [षष्ठेऽनुवाके] द्वितीयं सूक्तं । शुनःशेप एव ऋषिः । गायत्री छंदः । वरुणो देवता ।

यच्चिद्धि ते विशो यथा प्रदेव वरुण व्रतं ।
मिनीमसि द्यविद्यवि ॥ १ ॥
यत् । चित् । हि । ते । विशः । यथा । प्र । देव । वरुण । व्रतं ।
मिनीमसि । द्यविऽद्यवि ॥ १ ॥

मा नो वधाय हत्नवे जिहीळानस्य रीरधः ।
मा हृणानस्य मन्यवे ॥ २ ॥
मा । नः । वधाय । हत्नवे । जिहीळानस्य । रीरधः ।
मा । हृणानस्य । मन्यवे ॥ २ ॥

वि मृळीकाय ते मनो रथीरश्वं न संदितं ।
गीर्भिर्वरुण सीमहि ॥ ३ ॥
वि । मृळीकाय । ते । मनः । रथीः । अश्वं । न । संऽदितं ।
गीःऽभिः । वरुण । सीमहि ॥ ३ ॥

परा हि मे विमन्यवः पतन्ति वस्यइष्टये ।
वयो न वसतीरुप ॥ ४ ॥

परा । हि । मे । विऽमन्यवः । पतन्ति । वस्यःऽइष्टये ।
वयः । न । वसतीः । उप ॥ ४ ॥

कदा क्षत्रश्रियं नरमा वरुणं करामहे ।
मृळीकायोरुचक्षसं ॥ ५ ॥

कदा । क्षत्रऽश्रियं । नरं । आ । वरुणं । करामहे ।
मृळीकाय । उरुऽचक्षसं ॥ ५ ॥

तदित्समानमाशाते वेनन्ता न प्र युच्छतः ।
धृतव्रताय दाशुषे ॥ ६ ॥

तत् । इत् । समानं । आशाते । इति । वेनन्ता । न । प्र । युच्छतः ।
धृतऽव्रताय । दाशुषे ॥ ६ ॥

वेदा यो वीनां पदमन्तरिक्षेण पतताम् ।
वेद नावः समुद्रियः ॥ ७ ॥

वेद । यः । वीनां । पदं । अंतरिक्षेण । पततां ।
वेद । नावः । समुद्रियः ॥ ७ ॥

वेद मासो धृतव्रतो द्वादश प्रजावतः ।
वेदा य उपजायते ॥ ८ ॥

वेद । मासः । धृतऽव्रतः । द्वादश । प्रजाऽवतः ।
वेद । यः । उपऽजायते ॥ ८ ॥

वेद॒ वात॑स्य वर्त॒निमु॒रोर्ऋ॒ष्वस्य॑ बृह॒तः ।
वेदा॒ ये अ॒ध्यास॑ते ॥ ९ ॥
वेद॑ । वात॑स्य । व॒र्त॒निम् । उ॒रोः । ऋ॒ष्वस्य॑ । बृ॒ह॒तः ।
वेद॑ । ये । अ॒धि॒ऽआस॑ते ॥ ९ ॥

नि ष॑साद धृ॒तव्र॑तो॒ वरु॑णः प॒स्त्या॒३॒॑स्वा ।
साम्रा॑ज्याय सु॒क्रतु॑ः ॥ १० ॥
नि । स॒सा॒द॒ । धृ॒तऽव्र॑तः । वरु॑णः । प॒स्त्या॑सु । आ ।
साम्ऽरा॑ज्याय । सु॒ऽक्रतु॑ः ॥ १० ॥

अतो॒ विश्वा॒न्यद्भु॑ता चिकि॒त्वाँ अ॒भि प॑श्यति ।
कृता॑नि॒ या च॒ कर्त्वा॑ ॥ ११ ॥
अतः॑ । विश्वा॑नि । अद्भु॑ता । चि॒कि॒त्वान् । अ॒भि । प॒श्य॒ति॒ ।
कृता॑नि । या । च॒ । कर्त्वा॑ ॥ ११ ॥

स नो॑ वि॒श्वाहा॑ सु॒क्रतु॑रादि॒त्यः सु॒पथा॑ करत् ।
प्र ण॒ आयूं॑षि तारिषत् ॥ १२ ॥
सः । नः॒ । वि॒श्वाहा॑ । सु॒ऽक्रतु॑ः । आ॒दि॒त्यः । सु॒ऽपथा॑ । क॒र॒त् ।
प्र । नः॒ । आयूं॑षि । ता॒रि॒ष॒त् ॥ १२ ॥

बिभ्र॑द्द्रा॒पिं हि॑र॒ण्ययं॒ वरु॑णो वस्त नि॒र्णिज॑म् ।
परि॑ स्प॒शो॒ नि षे॑दिरे ॥ १३ ॥
बिभ्र॑त् । द्रा॒पिम् । हि॒र॒ण्यय॑म् । वरु॑णः । व॒स्त॒ । निः॒ऽनिज॑म् ।
परि॑ । स्पशः॑ । नि । से॒दि॒रे॒ ॥ १३ ॥

न यं दिप्संति दिप्सवो न द्रुह्वाणो जनानां ।
न देवमभिमातयः ॥ १४ ॥

न। यं। दिप्संति। दिप्सवः। न। द्रुह्वाणः। जनानां।
न। देवं। अभिऽमातयः ॥ १४ ॥

उत यो मानुषेष्वा यशश्चक्रे असाम्या ।
अस्माकमुदरेष्वा ॥ १५ ॥

उत। यः। मानुषेषु। आ। यशः। चक्रे। असामि। आ।
अस्माकं। उदरेषु। आ ॥ १५ ॥

परा मे यंति धीतयो गावो न गव्यूतीरनु ।
इच्छंतीरुरुचक्षसं ॥ १६ ॥

परा। मे। यंति। धीतयः। गावः। न। गव्यूतीः। अनु।
इच्छंतीः। उरुऽचक्षसं ॥ १६ ॥

सं नु वोचावहै पुनर्यतो मे मध्वाभृतं ।
होतेव क्षदसे प्रियं ॥ १७ ॥

सं। नु। वोचावहै। पुनः। यतः। मे। मधु। आऽभृतं।
होताऽइव। क्षदसे। प्रियं ॥ १७ ॥

दर्शं नु विश्वदर्शतं दर्शं रथमधि क्षमि ।
एता जुषत मे गिरः ॥ १८ ॥

दर्शं। नु। विश्वऽदर्शतं। दर्शं। रथं। अधि। क्षमि।
एताः। जुषत। मे। गिरः ॥ १८ ॥

वरुणप्रघासेष्विमं मे वरुणेति वारुणस्य हविषोऽनुवाक्या ।

इमं मे वरुण श्रुधी हवमद्या च मृळय ।
त्वामवस्युरा चके ॥ १९ ॥

इमं । मे । वरुण । श्रुधि । हवं । अद्य । च । मृळय ।
त्वां । अवस्युः । आ । चके ॥ १९ ॥

त्वं विश्वस्य मेधिर दिवश्च ग्मश्च राजसि ।
स यामनि प्रति श्रुधि ॥ २० ॥

त्वं । विश्वस्य । मेधिर । दिवः । च । ग्मः । च । राजसि ।
सः । यामनि । प्रति । श्रुधि ॥ २० ॥

उदुत्तमं मुमुग्धि नो वि पाशं मध्यमं चृत ।
अवाधमानि जीवसे ॥ २१ ॥

उत् । उत्ऽतमं । मुमुग्धि । नः । वि । पाशं । मध्यमं । चृत ।
अव । अधमानि । जीवसे ॥ २१ ॥

इन्द्रस्य नु वीर्याणीति पंचदशर्चं [सप्तमेऽनुवाके] द्वितीयं सूक्तम् । आंगिरसो हिरण्यस्तूप ऋषिः । त्रिष्टुप् छंदः । इन्द्रो देवता । अग्निष्टोमे माध्यंदिने सवने निष्केवल्यशस्त्र इन्द्रस्य नु वीर्याणीति निविद्धानीयं सूक्तम् । विषुवत्यपि तस्मिन् शस्त्र एतद् विनियुक्तम् । महाव्रते निष्केवल्यऽन्येतदेव विनियुक्तम् ।

इंद्रस्य नु वीर्याणि प्र वोचं यानि चकार प्रथमानि वज्री ।
अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत्पर्वतानाम् ॥ १ ॥

इंद्रस्य । नु । वीर्याणि । प्र । वोचं । यानि । चकार प्रथमानि ।
वज्री ।
अहन् । अहिं । अनु । अपः । ततर्द । प्र । वक्षणाः । अभिनत् ।
पर्वतानां ॥ १ ॥

अहन्नहिं पर्वते शिश्रियाणं त्वष्टास्मै वज्रं स्वर्यं ततक्ष ।
वाश्रा इव धेनवः स्यंदमाना अंजः समुद्रमव जग्मुरापः ॥२॥

अहन् । अहिं । पर्वते । शिश्रियाणं । त्वष्टा । अस्मै । वज्रं । स्वर्यं ।
ततक्ष ।
वाश्राःऽइव । धेनवः । स्यंदमानाः । अंजः । समुद्रं । अव । जग्मुः ।
आपः ॥२॥

वृषायमाणोऽवृणीत सोमं त्रिकद्रुकेष्वपिबत्सुतस्य ।
आ सायकं मघवादत्त वज्रमहन्नेनं प्रथमजामहीनां ॥ ३ ॥

वृषऽयमाणः । अवृणीत । सोमं । त्रिऽकद्रुकेषु । अपिबत् । सुतस्य ।
आ । सायकं । मघऽवा । अदत्त । वज्रं । अहन् । एनं । प्रथमऽजां ।
अहीनां ॥ ३ ॥

यदिंद्राहन्प्रथमजामहीनामान्मायिनाममिनाः प्रोत मायाः ।
आत्सूर्यं जनयन्द्यामुषासं तादीत्ना शत्रुं न किला विवित्से ॥४॥

यत् । इंद्र । अहन् । प्रथमऽजां । अहीनां । आत् । मायिनां ।
अमिनाः । प्र । उत । मायाः ।
आत् । सूर्यं । जनयन् । द्यां । उषसं । तादीत्ना । शत्रुं । न । किल ।
विवित्से ॥ ४ ॥

अहन्वृत्रं वृत्रतरं व्यंसमिंद्रो वज्रेण महता वधेन ।
स्कंधांसीव कुलिशेना विवृक्णाहिः शयत उपपृक्पृथिव्याः॥५॥
अहन् । वृत्रं । वृत्रऽतरं । विऽअंसं । इंद्रः । वज्रेण । महता । वधेन ।
स्कंधांसिऽइव । कुलिशेन । विऽवृक्णा । अहिः । शयते । उपऽ-
-पृक् । पृथिव्याः ॥ ५ ॥

अयोद्धेव दुर्मद आ हि जुव्हे महावीरं तुविबाधमृजीषं ।
नातारीदस्य समृतिं वधानां सं रुजानाः पिपिष इंद्रशत्रुः॥६॥
अयोद्धाऽइव । दुःऽमदः । आ । हि । जुव्हे । महाऽवीरं । तुविऽ-
-बाधं । ऋजीषं ।
न । अतारीत् । अस्य । संऽऋतिं । वधानां । सं । रुजानाः ।
पिपिषे । इंद्रऽशत्रुः ॥ ६ ॥

अपादहस्तो अपृतन्यदिंद्रमास्य वज्रमधि सानौ जघान ।
वृष्णो वध्रिः प्रतिमानं बुभूषन्पुरुत्रा वृत्रो अशयद्व्यस्तः॥७॥
अपात् । अहस्तः । अपृतन्यत् । इंद्रं । आ । अस्य । वज्रं । अधि ।
सानौ । जघान ।
वृष्णः । वध्रिः । प्रतिऽमानं । बुभूषन् । पुरुऽत्रा । वृत्रः ।
अशयत् । विऽअस्तः ॥ ७ ॥

नदं न भिन्नममुया शयानं मनो रुहाणा अति यन्त्यापः ।
याश्चिद्वृत्रो महिना पर्यतिष्ठत्तासामहिः पत्सुतःशीर्बभूव ॥८॥

नदं । न । भिन्नं । अमुया । शयानं । मनः । रुहाणाः । अति ।
यंति । आपः ।
याः । चित् । वृत्रः । महिना । परिऽअतिष्ठत् । तासां । अहिः ।
पत्सुतःऽशीः । बभूव ॥ ८ ॥

नीचावया अभवद्वृत्रपुत्रेंद्रो अस्या अव वधर्जभार ।
उत्तरा सूरधरः पुत्र आसीद्दानुः शये सहवत्सा न धेनुः ॥९॥
नीचाऽवयाः । अभवत् । वृत्रऽपुत्रा । इंद्रः । अस्याः । अव ।
वधः । जभार ।
उत्ऽतरा । सूः । अधरः । पुत्रः । आसीत् । दानुः । शये ।
सहऽवत्सा । न । धेनुः ॥ ९ ॥

अतिष्ठंतीनामनिवेशनानां काष्ठानां मध्ये निहितं शरीरं ।
वृत्रस्य निण्यं वि चरंत्यापो दीर्घं तम आशयदिंद्रशत्रुः ॥१०॥
अतिष्ठंतीनां । अनिऽवेशनानां । काष्ठानां । मध्ये । निऽहितं ।
शरीरं ।
वृत्रस्य । निण्यं । वि । चरंति । आपः । दीर्घं । तमः । आ ।
अशयत् । इंद्रऽशत्रुः ॥ १० ॥

दासपत्नीरहिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः ।
अपां बिलमपिहितं यदासीद्वृत्रं जघन्वाँ अप तद्ववार ॥११॥

दासऽपत्नीः । अहिऽगोपाः । अतिष्ठन् । निऽरुद्धाः । आपः ।
पणिनाऽइव । गावः ।
अपां । बिलं । अपिऽहितं । यत् । आसीत् । वृत्रं । जघन्वान् ।
अप । तत् । ववार ॥ ११ ॥

अश्व्यो वारो अभवस्तदिंद्र सृके यत्त्वा प्रत्यहन्देव एकः ।
अजयो गा अजयः शूर सोममवासृजः सर्तवे सप्त
सिंधून् ॥ १२ ॥

अश्व्यः । वारः । अभवः । तत् । इंद्र । सृके । यत् । त्वा । प्रतिऽ-
-अहन् । देवः । एकः ।
अजयः । गाः । अजयः । शूर । सोमं । अव । असृजः । सर्तवे ।
सप्त । सिंधून् ॥ १२ ॥

नास्मै विद्युन्न तन्यतुः सिषेध न यां मिहमकिरद्ध्रादुनिं च ।
इंद्रश्च यद्युयुधाते अहिश्चोतापरीभ्यो मघवा वि जिग्ये ॥१३॥

न । अस्मै । विऽद्युत् । न । तन्यतुः । सिसेध । न । यां ।
मिहं । अकिरत् । ह्रादुनिं च ।
इंद्रः । च । यत् । युयुधाते इति । अहिः । च । उत । अपरीभ्यः ।
मघऽवा । वि । जिग्ये ॥ १३ ॥

अहेर्यातारं कमपश्य इंद्र हृदि यत्ते जघ्नुषो भीरगच्छत् ।
नव च यन्नवतिं च स्रवंतीः श्येनो न भीतो अतरो
रजांसि ॥१४॥

अहेः । यातारं । कं । अपश्यः । इंद्र । हृदि । यत् । ते । जघ्नुषः ।
भीः । अगच्छत् ।
नव । च । यत् । नवतिं । च । स्रवंतीः । श्येनः । न । भीतः ।
अतरः । रजांसि ॥१४॥

इंद्रो यातोऽवसितस्य राजा शमस्य च शृंगिणो वज्रबाहुः ।
सेदु राजा क्षयति चर्षणीनामरान्न नेमिः परि ता बभूव॥१५॥

इंद्रः । यातः । अवऽसितस्य । राजा । शमस्य । च । शृंगिणः
वज्रऽबाहुः ।
सः । इत् । ऊं इति । राजा । क्षयति । चर्षणीनां । अरान् ।
न । नेमिः । परि । ता । बभूव ॥ १९ ॥

एता उ त्या इत्यष्टादशर्चं [चतुर्दशेऽनुवाके]ऽष्टमं सूक्तं गोतमस्यार्षम् । आदितश्चतस्रो जगत्यः स्त्रयोदशाद्याः षड्च उष्णिहः । शिष्टा अष्टौ त्रिष्टुभः । उषा देवता । अश्विनावर्तिरित्यंत्यस्तृचोऽश्विदेवताकः सूक्तविनियोगो लैङ्गिकः। प्रातरनुवाक उषस्ये क्रतौ जागते छंदस्याश्विनशस्त्रे चैता उत्या इति चतस्रो विनियुक्ताः ।

एता उ त्या उषसः केतुमक्रत पूर्वे अर्धे रजसो भानुमंजत ।
निष्कृण्वाना आयुधानीव धृष्णवः प्रति गावोऽरुषीर्यंति
मातरः ॥ १ ॥

एताः । ऊं इति । त्याः । उषसः । केतुं । अक्रत । पूर्वे । अर्धे ।
रजसः । भानुं । अंजते ।
निःऽकृण्वानाः । आयुधानिऽइव । धृष्णवः । प्रति । गावः ।
अरुषीः । यंति । मातरः ॥ १ ॥

उदपप्तन्नरुणा भानवो वृथा स्वायुजो अरुषीर्गा अयुक्षत ।
अक्रन्नुषासो वयुनानि पूर्वथा रुशंतं भानुमरुषीरशिश्रयुः ॥२॥
उत् । अपप्तन् । अरुणाः । भानवः । वृथा । सुऽआयुजः ।
अरुषीः । गाः । अयुक्षत ।
अक्रन् । उषसः । वयुनानि । पूर्वऽथा । रुशंतं । भानुं । अरुषीः ।
अशिश्रयुः ॥ २ ॥

अर्चंति नारीरपसो न विष्टिभिः समानेन योजनेना परावतः ।
इषं वहंतीः सुकृते सुदानवे विश्वेदह यजमानाय सुन्वते ॥३॥
अर्चंति । नारीः । अपसः । न । विष्टिऽभिः । समानेन । योजनेन ।
आ । पराऽवतः ।
इषं । वहंतीः । सुऽकृते । सुऽदानवे । विश्वा । इत् । अह ।
यजमानाय । सुन्वते ॥३॥

अधि पेशांसि वपते नृतूरिवापोर्णुते वक्ष उस्रेव बर्जहं ।
ज्योतिर्विश्वस्मै भुवनाय कृण्वती गावो न व्रजं व्युषा
आवर्तमः ॥ ४ ॥

अधि । पेशांसि । वपते । नृतूःऽइव । अप । ऊर्णुते । वक्षः ।
उस्राऽइव । बर्जहं ।

ज्योतिः । विश्वस्मै । भुवनाय । कृण्वती । गावः । न । व्रजं । वि ।
उषाः । आवरित्यावः । तमः ॥ ४ ॥

प्रातरनुवाकस्योपस्ये क्रतौ प्रत्यर्चिरित्यष्टावनुवक्तव्याः । आश्विनशस्त्रे च ।

प्रत्यर्ची रुशदस्या अदर्शि वि तिष्ठते बाधते कृष्णमभ्वं ।
स्वरुं न पेशो विदथेष्वंजञ्चित्रं दिवो दुहिता भानुमश्रेत् ॥ ५ ॥

प्रति । अर्चिः । रुशत् । अस्याः । अदर्शिः । वि । तिष्ठते ।
बाधते । कृष्णं । अभ्वं ।

स्वरुं । न । पेशः । विदथेषु । अंजन् । चित्रं । दिवः । दुहिता ।
भानुं । अश्रेत् ॥ ५ ॥

अतारिष्म तमसस्पारमस्योषा उच्छंती वयुना कृणोति ।
श्रिये छंदो न स्मयते विभाती सुप्रतीका सौमनसायाजीगः॥६॥

अतारिष्म । तमसः । पारं । अस्य । उषाः । उच्छंती । वयुना ।
कृणोति ।

श्रिये । छंदः । न । स्मयते । विऽभाती । सुऽप्रतीका । सौमनसाय ।
अजीगरिति ॥ ६ ॥

भास्वती नेत्री सूनृतानां दिवः स्तवे दुहिता गोतमेभिः ।
प्रजावतो नृवतो अश्वबुध्यानुषो गोअग्राँ उप मासि वाजान् ॥७॥

…सा । नेत्री । सूनृतानां । दिवः । स्तवे । दुहिता । गोतमेभिः ।
प्रजाऽवंतः । नृऽवंतः । अश्वऽबुध्यान् । उषः । गोऽअंग्रान् ।
उप । मासि । वाजान् ॥७॥

उषस्तमश्यां यशसं सुवीरं दासप्रवर्ग रयिमश्वबुध्यं ।
सुदंससा श्रवसा या विभासि वाजप्रसूता सुभगे बृहंतं ॥८॥
उषः । तं । अश्यां । यशसं । सुऽवीरं । दासऽप्रवर्ग । रयिं ।
अश्वऽबुध्यं ।
सुऽदंससा । श्रवसा । या । विऽभासि । वाजऽप्रसूता । सुऽभगे ।
बृहंतं ॥ ८ ॥

विश्वानि देवी भुवनाभिचक्ष्या प्रतीची चक्षुरुर्विया विभाति ।
विश्वं जीवं चरसे बोधयंती विश्वस्य वाचमविदन्मनायोः ॥९॥
विश्वानि । देवी । भुवना । अभिऽचक्ष्य । प्रतीची । चक्षुः ।
उर्विया । वि । भाति ।
विश्वं । जीवं । चरसे । बोधयंती । विश्वस्य । वाचं । अविदत् ।
मनायोः ॥ ९ ॥

पुनः …नजायमाना …राणा समानं वर्णमभि शुंभमाना ।
श्वघ्नी … कृ…विज आमिनाना मर्तस्य देवी जरयंत्या… ॥१०॥

पुनःऽपुनः । जायमाना । पुराणी । समानं । वर्णं । अभि ।
शुंभमाना ।

श्वघ्नीऽइव । कृत्नुः । विजः । आऽमिनाना । मर्तस्य । देवी ।
जरयंती । आयुः ॥ १० ॥

व्यूर्ण्वती दिवो अंताँ अबोध्यप स्वसारं सनुतर्युयोति ।
प्रमिनती मनुष्या युगानि योषा जारस्य चक्षसा वि भाति
॥ ११ ॥

विऽऊर्ण्वती । दिवः । अंतान् । अबोधि । अप । स्वसारं । सनुतः ।
युयोति ।

प्रऽमिनती । मनुष्या । युगानि । योषा । जारस्य । चक्षसा । वि ।
भाति ॥ ११ ॥

पशून्न चित्रा सुभगा प्रथाना सिंधुर्न क्षोद उर्विया व्यश्वैत् ।
अमिनती दैव्यानि व्रतानि सूर्यस्य चेति रश्मिभिर्दृशाना॥१२॥

पशून् । न । चित्रा । सुऽभगा । प्रथाना । सिंधुः । न । क्षोदः ।
उर्विया । वि । अश्वैत् ।

अमिनती । दैव्यानि । व्रतानि । सूर्यस्य । चेति । रश्मिऽभिः ।
दृशाना ॥१२॥

प्रातरनुवाकस्योषस्ये क्रतावौष्णिहे छंदस्युषस्तश्चित्रमिमात तृचो विनियुक्तः ।
आश्विनशस्त्रे च ।

उषस्तच्चित्रमा भरास्मभ्यं वाजिनीवति ।
येन तोकं च तनयं च धामहे ॥ १३ ॥

उषः । तत् । चित्रं । आ । भर । अस्मभ्यं । वाजिनीऽवति ।
येन । तोकं । च । तनयं । च । धामहे ॥ १३ ॥

उषो अद्येह गोमत्यश्वावति विभावरि ।
रेवदस्मे व्युच्छ सूनृतावति ॥ १४ ॥

उषः । अद्य । इह । गोऽमति । अश्वऽवति । विभाऽवरि ।
रेवत् । अस्मे इति । वि । उच्छ । सूनृताऽवति ॥ १४ ॥

युक्ष्वा हि वाजिनीवत्यश्वाँ अद्यारुणाँ उषः ।
अथा नो विश्वा सौभगान्या वह ॥ १५ ॥

युक्ष्व । हि । वाजिनीऽवति । अश्वान् । अद्य । अरुणान् । उषः ।
अथ । नः । विश्वा । सौभगानि । आ । वह ॥ १५ ॥

अश्विना वर्तिरस्मदा गोमद्दस्रा हिरण्यवत् ।
अर्वाग्रथं समनसा नि यच्छतं ॥ १६ ॥

अश्विना । वर्तिः । अस्मत् । आ । गोऽमत् । दस्रा । हिरण्यऽवत् ।
अर्वाक् । रथं । सऽमनसा । नि । यच्छतं ॥ १६ ॥

यावित्था श्लोकमा दिवो ज्योतिर्जनाय चक्रथुः ।
आ न ऊर्जं वहतमश्विना युवं ॥ १७ ॥

यौ । इत्था । श्लोकं । आ । दिवः । ज्योतिः । जनाय । चक्रथुः ।
आ । नः । ऊर्जं । वहतं । अश्विना । युवं ॥ १७ ॥

एह देवा मयोभुवा दस्रा हिरण्यवर्तनी ।
उषर्बुधो वहन्तु सोमपीतये ॥ १८ ॥

आ । इह । देवा । मयःऽभुवा । दस्रा । हिरण्यवर्तनी इति हिरण्यऽवर्तनी ।
उषःऽबुधः । वहन्तु । सोमऽपीतये ॥ १८ ॥

अप न इत्यष्टर्चं [पंचदशेऽनुवाके] चतुर्थं सूक्तं कुत्सस्यार्षं गायत्रम् ।
शुचिगुणकोऽग्निः शुद्धोऽग्निर्वा देवता । विनियोगो लैङ्गिकः ।

अप नः शोशुचदघमग्ने शुशुग्ध्या रयिं । अप नः शोशुचदघं ॥१॥

अप । नः । शोशुचत् । अघं । अग्ने । शुशुग्धि । आ । रयिं । अप ।
न । शोशुचत् । अघं ॥ १ ॥

सुक्षेत्रिया सुगातुया वसूया च यजामहे । अप नः शोशुचदघं ॥२॥

सुऽक्षेत्रिया । सुगातुऽया । वसुऽया । च । यजामहे । अप । नः ।
शोशुचत् । अघं ॥ २ ॥

प्र यद्भन्दिष्ठ एषां प्रास्माकासश्च सूरयः । अप नः शोशुचदघं ॥३॥

प्र । यत् । भन्दिष्ठः । एषां । प्र । अस्माकासः । च । सूरयः । अप ।
नः । शोशुचत् । अघं ॥ ३ ॥

प्र यत्ते अग्ने सूरयो जायेमहि प्र ते वयं । अप नः शोशुचदघं ॥४॥

प्र । यत् । ते । अग्ने । सूरयः । जायेमहि । प्र । ते । वयं । अप । नः ।
शोशुचत् । अघं ॥ ४ ॥

प्र यद॒ग्नेः सह॑स्वतो वि॒श्वतो॒ यन्ति॑ भा॒नवः॑ । अप॑ नः॒ शोशु॑चद॒घम् ॥५॥

प्र । यत् । अ॒ग्नेः । सह॑स्वतः । वि॒श्वतः॑ । यन्ति॑ । भा॒नवः॑ । अप॑ । नः॒ । शोशु॑चत् । अ॒घम् ॥ ५ ॥

त्वं हि वि॑श्वतोमुख वि॒श्वतः॑ परि॒भूरसि॑ । अप॑ नः॒ शोशु॑चद॒घम् ॥६॥

त्वम् । हि । वि॒श्व॒तः॒ऽमु॒ख॒ । वि॒श्वतः॑ । प॒रि॒ऽभूः । असि॑ । अप॑ । नः॒ । शोशु॑चत् । अ॒घम् ॥ ६ ॥

द्विषो॑ नो विश्वतोमु॒खाति॑ ना॒वेव॑ पारय । अप॑ नः॒ शोशु॑चद॒घम् ॥७॥

द्विषः॑ । नः॒ । वि॒श्व॒तः॒ऽमु॒ख॒ । अति॑ । ना॒वाऽइ॑व । पा॒र॒य॒ । अप॑ । नः॒ । शोशु॑चत् । अ॒घम् ॥ ७ ॥

स नः॒ सिन्धु॑मिव ना॒वयाति॑ पर्षा स्व॒स्तये॑ । अप॑ नः॒ शोशु॑चद॒घम् ॥८॥

सः । नः॒ । सिन्धु॑म्ऽइव । ना॒वया॑ । अति॑ । प॒र्ष॒ । स्व॒स्तये॑ । अप॑ । नः॒ । शोशु॑चत् । अ॒घम् ॥ ८ ॥

चंद्रमा इत्येकोनविंशत्यृचं [पंचदशेऽनुवाके] द्वादशं सूक्तम् । अप्त्यां पुत्रस्य त्रितस्य कूपे पतितस्य कुत्सस्य वाऽऽर्षम् । अंत्या त्रिष्टुप् । सं मा तपंती [ऋ. ८] त्येषा यवमध्या महाबृहती । शिष्टाः पंक्तयः । विश्वे देवा देवता । विनियोगः । अत्र शाट्यायनिन इतिहासमाचक्षते । एकतो द्वितस्त्रित इति पुरा त्रय ऋषयो बभूवुः । ते कदाचिन्मरुद्भूमावरण्ये वर्तमानाः पिपासया संतप्तगात्राः संत एकं कूपमाविंदन् । तत्र त्रिताख्य एको जलपानाय कूपं प्राविशत् । स्वयं पीत्वेतरयोश्च कूपादुदकमुद्धृत्य

प्रादात्। तौ तदुदकं पीत्वा त्रितं कूपे पातयित्वा तदीयं धनं सर्वमपहृत्य कूपं च रथचक्रेण पिधाय प्रास्थिषातां। ततः कूपे पतितः स त्रितः कूपादुत्तरीतुमशक्नुवन् सर्वे देवा मामुद्धरंत्विति मनसा सस्मार। ततस्तेषां स्तावकमिदं सूक्तं ददर्श। तत्र रात्रौ कूपस्यांतश्चंद्रमसो रश्मीन् पश्यन् परिदेवयते।

चंद्रमा अप्स्वं१तरा सुपर्णो धावते दिवि ।
न वो हिरण्यनेमयः पदं विंदंति विद्युतो वित्तं मे अस्य रोदसी ॥१॥

चंद्रमाः । अप्ऽसु । अंतः । आ । सुऽपर्णः । धावते । दिवि ।
न । वः । हिरण्यऽनेमयः । पदं । विंदंति । विऽद्युतः । वित्तं ।
मे । अस्य । रोदसी इति ॥ १ ॥

मो षु देवा अदः स्व१रव पादि दिवस्परि ।
मा सोम्यस्य शंभुवः शूने भूम कदा चन वित्तं मे अस्य रोदसी ॥३॥

मो इति । सु । देवाः । अदः । स्वः । अव । पादि । दिवः । परि ।
मा । सोम्यस्य । शंऽभुवः । शूने । भूम । कदा । चन । वित्तं ।
मे । अस्य । रोदसी इति ॥३॥

यज्ञं पृच्छाम्यवमं स तद्दूतो वि वोचति ।
क्व ऋतं पूर्व्यं गतं कस्तद्बिभर्ति नूतनो वित्तं मे अस्य रोदसी ॥४॥

यज्ञं । पृच्छामि । अवमं । सः । तत् । दूतः । वि । वोचति ।
क्व । ऋतं । पूर्व्यं । गतं । कः । तत् । बिभर्ति । नूतनः । वित्तं ।
मे । अस्य । रोदसी इति ॥ ४ ॥

अमी ये देवाः स्थनं त्रिष्वा रोचने दिवः ।
कद्व ऋतं कदनृतं क्व प्रत्ना व आहुतिर्वित्तं मे अस्य रोदसी ॥५॥
अमी इति । ये । देवाः । स्थनं । त्रिषु । आ । रोचने । दिवः ।
कत् । वः । ऋतं । कत् । अनृतं । क्व । प्रत्ना । वः । आऽहुतिः ।
वित्तं । मे । अस्य । रोदसीं इति ॥ ९ ॥

कद्व ऋतस्यं धर्णसि कद्वरुणस्य चक्षणं ।
कदर्यम्णो महस्पथाति क्रामेम दूढ्यो वित्तं मे अस्य रोदसी॥६॥
कत् । वः । ऋतस्यं । धर्णसि । कत् । वरुणस्य । चक्षणं ।
कत् । अर्यम्णः । महः । पथा । अति । क्रामेम । दुःऽध्यः ।
वित्तं । मे । अस्य । रोदसी इति ॥६॥

अहं सो अस्मि यः पुरा सुते वदामि कानि चित् ।
तं मा व्यंत्याध्यो ३ वृको न तृष्णजं मृगं वित्तं मे अस्य रोदसी॥७॥
अहं । सः । अस्मि । यः । पुरा । सुते । वदामि । कानि ।
चित् । तं । मा । व्यंति । आऽध्यः । वृकः । न । तृष्णऽजं । मृगं ।
वित्तं । मे । अस्य । रोदसी इति ॥ ७ ॥

सं मा तपंत्यभितः सपत्नीरिव पर्शवः ।
मूषो न शिश्ना व्यदंति माध्यः
स्तोतारं ते शतक्रतो वित्तं मे अस्य रोदसी ॥ ८ ॥

सं। मा। तपंति। अभितः। सपत्नीःऽइव। पर्शवः।
मूषः। न। शिश्ना। वि। अदंति। मा। आऽध्यः। स्तोतारं।
ते। शतक्रतो इति शतऽक्रतो। वित्तं। मे। अस्य। रोदसी इति ॥८॥

अमी ये सप्त रश्मयस्तत्रा मे नाभिराततां
त्रितस्तद्वेदाप्त्यः स जामित्वाय रेभति वित्तं मे अस्य रोदसी॥९॥

अमी इति। ये। सप्त। रश्मयः। तत्र। मे। नाभिः। आऽतता।
त्रितः। तत्। वेद। आप्त्यः। सः। जामिऽत्वाय। रेभति। वित्तं।
मे। अस्य। रोदसी इति ॥९॥

अमी ये पंचोक्षणो मध्ये तस्थुर्महो दिवः।
देवत्रा नु प्रवाच्यं सध्रीचीना नि वावृतुर्वित्तं मे अस्य रोदसी॥१०॥

अमी इति। ये। पंच। उक्षणः। मध्ये। तस्थुः। महः। दिवः।
देवऽत्रा। नु। प्रऽवाच्यं। सध्रीचीनाः। नि। ववृतुः। वित्तं।
मे। अस्य। रोदसी इति ॥ १० ॥

सुपर्णा एत आसते मध्य आरोधने दिवः।
ते सेधंति पथो वृकं तरंतं यव्हतीरपो वित्तं मे अस्य रोदसी॥११॥

सुऽपर्णाः। एते। आसते। मध्ये। आऽरोधने। दिवः।
ते। सेधंति। पथः। वृकं। तरंतं। यव्हतीः। अपः। वित्तं।
मे। अस्य। रोदसी इति ॥ ११ ॥

नव्यं तदुक्थ्यं हितं देवासः सुप्रवाचनं ।
ऋतमर्षन्ति सिंधवः सत्यं तातान सूर्यो वित्तं मे अस्य रोदसी॥१२

नव्यं । तत् । उक्थ्यं । हितं । देवासः । सुऽप्रवाचनं ।
ऋतं। अर्षति । सिंधवः । सत्यं । ततान । सूर्यः । वित्तं । मे ।
अस्य । रोदसी इति ॥ १२ ॥

अग्ने तव त्यदुक्थ्यं देवेष्वस्त्याप्यं ।
स नः सत्तो मनुष्वदा देवान्यक्षि विदुष्टरो वित्तं मे अस्य
रोदसी ॥ १३ ॥

अग्ने । तव । त्यत् । उक्थ्यं । देवेषु । अस्ति । आप्यं ।
सः । नः । सत्तः । मनुष्वत् । आ । देवान् । यक्षि । विदुःऽतरः ।
वित्तं । मे । अस्य । रोदसी इति ॥ १३ ॥

सत्तो होता मनुष्वदा देवाँ अच्छा विदुष्टरः ।
अग्निर्हव्या सुषूदति देवो देवेषु मेधिरो वित्तं मे अस्य रोदसी ॥१४॥

सत्तः । होता । मनुष्वत् । आ । देवान् । अच्छ । विदुःऽतरः ।
अग्निः । हव्या । सुसूदति । देवः । देवेषु । मेधिरः । वित्तं । मे ।
अस्य । रोदसी इति ॥ १४ ॥

ब्रह्मा कृणोति वरुणो गातुविदं तमीमहे ।
व्यूर्णोति हृदा मतिं नव्यो जायतामृतं वित्तं मे अस्य रोदसी ॥१५॥

ब्रह्म । कृणोति । वरुणः । गातुऽविदं । तं । ईमहे ।
वि । ऊर्णोति । हृदा । मतिं । नव्यः । जायतां । ऋतं । वित्तं ।
मे । अस्य । रोदसी इति ॥ १५ ॥

असौ यः पंथा आदित्यो दिवि प्रवाच्यं कृतः ।
न स देवा अतिक्रमे तं मर्तासो न पश्यथ वित्तं मे अस्य रोदसी ॥१६॥

असौ । यः । पंथाः । आदित्यः । दिवि । प्रऽवाच्यं । कृतः ।
न । सः । देवाः । अतिऽक्रमे । तं । मर्तासः । न । पश्यथ ।
वित्तं । मे । अस्य । रोदसी इति ॥ १६ ॥

त्रितः कूपेऽवहितो देवान्हवत ऊतये ।
तच्छुश्राव बृहस्पतिः कृण्वन्नंहूरणादुरु वित्तं मे अस्य रोदसी ॥१७॥

त्रितः । कूपे । अवऽहितः । देवान् । हवते । ऊतये ।
तत् । शुश्राव । बृहस्पतिः । कृण्वन् । अंहूरणात् । उरु । वित्तं ।
मे । अस्य । रोदसी इति ॥ १७ ॥

अरुणो मा सकृद्वृकः पथा यंतं ददर्श हि ।
उज्जिहीते निचाय्या तष्टेव पृष्टयामयी वित्तं मे अस्य रोदसी ॥१८॥

अरुणः । मा । सकृत् । वृकः । पथा । यंतं । ददर्श । हि ।
उत् । जिहीते । निऽचाय्य । तष्टाऽइव । पृष्टिऽआमयी । वित्तं ।
मे । अस्य । रोदसी इति ॥ १८ ॥

एनांगूषेण वयमिंद्रवंतोऽभि ष्याम वृजने सर्ववीराः।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः
॥ १९ ॥

एना । आंगूषेण । वयं । इंद्रऽवंतः । अभि । स्याम । वृजने ।
सर्वऽवीराः ।
तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः ।
पृथिवी । उत । द्यौः ॥ १९ ॥

'ततं म' इति नवर्चं [षोडशेऽनुवाके] पंचमं सूक्तं कुत्सस्यार्षं ऋभुदेवताकम्। पंचमीनवम्यौ त्रिष्टुभौ। शिष्टाः सप्त जगत्यः। अभिप्लवषडहस्य चतुर्थेऽहनि वैश्वदेवशस्त्र इदमार्भवं निविद्धानम्।

ततं मे अपस्तदु तायते पुनः स्वादिष्ठा धीतिरुचथाय शस्यते।
अयं समुद्र इह विश्वदेव्यः स्वाहाकृतस्य समु तृप्णुत
ऋभवः ॥ १ ॥

ततं । मे । अपः । तत् । ऊं इति । तायते । पुनरिति । स्वादिष्ठा ।
धीतिः । उचथाय । शस्यते ।
अयं । समुद्रः । इह । विश्वऽदेव्यः । स्वाहाऽकृतस्य । सं । ऊं इति ।
तृप्णुत । ऋभवः ॥ १ ॥

आभोगयं प्र यदिच्छंत ऐतनापाकाः प्रांचो मम के चिदापयः।
सौधन्वनासश्चरितस्य भूमनागच्छत सवितुर्दाशुषो गृहं ॥२॥

आऽभोगयं । प्र । यत् । इच्छंतः । ऐतन । अपाकाः । प्रांचः ।
मम । के । चित् । आपयः ।
सौधन्वनासः । चरितस्य । भूमना । अगच्छत । सवितुः । दाशुषः ।
गृहं ॥ २ ॥

तत्सविता वोऽमृतत्वमासुवदगोह्यं यच्छ्रवयंत ऐतन ।
त्यं चिच्चमसमसुरस्य भक्षणमेकं संतमकृणुता चतुर्वयं ॥ ३ ॥

तत् । सविता । वः । अमृतऽत्वं । आ । असुवत् । अगोह्यं ।
यत् । श्रवयंतः । ऐतन ।
त्यं । चित् । चमसं । असुरस्य । भक्षणं । एकं । संतं । अकृणुत ।
चतुःऽवयं ॥ ३ ॥

विष्ट्वी शमी तरणित्वेन वाघतो मर्तासः संतो अमृतत्वमानशुः ।
सौधन्वना ऋभवः सूरचक्षसः संवत्सरे समपृच्यंत धीतिभिः
॥ ४ ॥

विष्ट्वी । शमी । तरणिऽत्वेन । वाघतः । मर्तासः । संतः ।
अमृतऽत्वं । आनशुः ।
सौधन्वनाः । ऋभवः । सूरऽचक्षसः । संवत्सरे । सं । अपृच्यंत ।
धीतिऽभिः ॥ ४ ॥

क्षेत्रमिव वि ममुस्तेजनेनँ एकं पात्रमृभवो जेहमानं ।
उपस्तुता उपमं नाधमाना अमर्त्येषु श्रवं इच्छमानाः ॥ ५ ॥

क्षेत्रंऽइव । वि । ममुः । तेजनेन । एकं । पात्रं । ऋभवः । जेहमानं ।
उपऽस्तुताः । उपऽमं । नाधमानाः । अमर्त्येषु । श्रवः । इच्छमानाः ॥ ५ ॥

आ मनीषामंतरिक्षस्य नृभ्यः स्रुचेव घृतं जुहवाम विद्मना ।
तरणित्वा ये पितुरस्य सश्चिर ऋभवो वाजमरुहन्दिवो रजः ॥ ६ ॥

आ । मनीषां । अंतरिक्षस्य । नृऽभ्यः । स्रुचाऽइव । घृतं । जुहवाम । विद्मना ।
तरणिऽत्वा । ये । पितुः । अस्य । सश्चिरे । ऋभवः । वाजं । अरुहन् । दिवः । रजः ॥ ६ ॥

ऋभुर्न इंद्रः शवसा नवीयानृभुर्वाजेभिर्वसुभिर्वसुर्ददिः ।
युष्माकं देवा अवसाहनि प्रियेऽभि तिष्ठेम पृत्सुतीरसुन्वतां ॥ ७ ॥

ऋभुः । नः । इंद्रः । शवसा । नवीयान् । ऋभुः । वाजेभिः । वसुऽभिः । वसुः । ददिः ।
युष्माकं । देवाः । अवसा । अहनि । प्रिये । अभि । तिष्ठेम । पृत्सुतीः । असुन्वतां ॥ ७ ॥

निश्चर्मण ऋभवो गामपिंशत सं वत्सेनासृजता मातरं पुनः।
सौधन्वनासः स्वपस्यया नरो जिव्री युवाना पितराकृणोतन ॥ ८ ॥

निः । चर्मणः । ऋभवः । गां । अपिंशत । सं । वत्सेन । असृजत । मातरं । पुनरिति ।
सौधन्वनासः । सुऽअपस्यया । नरः । जिव्री इति । युवाना । पितरा । अकृणोतन ॥ ८ ॥

वाजेभिर्नो वाजसातावविड्ढ्यृभुमाँ इंद्र चित्रमा दर्षि राधः।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥ ९ ॥

वाजेभिः । नः । वाजऽसातौ । अविड्ढि । ऋभुऽमान् । इंद्र । चित्रं । आ । दर्षि । राधः ।
तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी । उत । द्यौः ॥ ९

यो जात इति पंचदशर्चं [द्वितीयेऽनुवाके] प्रथमं सूक्तं गार्त्समदं त्रैष्टुभमैन्द्रम्। संप्लवे निष्केवल्ये निविद्धानीयस्य पुरस्ताद्यो जात एव इति शंस्येत्। आभिप्लविके तृतीयेऽहनि निष्केवल्ये 'यो जात एव' इति निविद्धानीयम्। विश्वजिति माध्यंदिनसवने मैत्रावरुणः स्वशस्त्रे प्राकृतात् सूक्तात्पूर्वं 'यो जात' इति सामसूक्तं शंसेत्। अग्निष्टुन्निष्केवल्ये निविद्धानमिदम्। महाव्रते निष्केवल्ये यो जात इति सूक्तम्।

अत्रेतिहासो बृहद्देवतया मुक्तः। संयुज्य तपसात्मान मैद्रं बिभ्रन्महद् वपुः। अदृश्यत मुहूर्तेन दिवि च व्योम्नि चेह च ॥ तमिंद्र इति मत्वा तु दैत्यौ भीमपराक्रमौ। धुनिश्च चुमुरिश्चोभौ सायुधावभिपेततुः ॥ विदित्वा स तयोभावं मृषिः पापं चिकीर्षतोः। यो जात इति सूक्तेन कर्माण्यैंद्राण्य कीर्तयत् ॥ अन्ये त्वन्यथा वर्णयन्ति। पुरा किलेंद्रादयो वैन्ययज्ञं समाजग्मुः। गृत्समदोऽपि तत्रागत्य सदस्यासीत्। दैत्याश्चेन्द्रजिघांसया तत्र समागमन्। तान् दृष्ट्वा निर्जगामेंद्रो यज्ञाद्गृत्समदाकृतिः। स च गृत्समदो वैन्येन पूजितो यज्ञवाटान्निरगच्छत्। निर्गच्छंतं तमृषिं दृष्ट्वा अयमेव इंद्र इति मन्यमाना स्तमसुराः परिवव्रुः। नाहमिंद्रस्तुच्छः किंत्वेवंगुणोपेतः स इत्यनेन सूक्तेन तान् प्रत्युवाच। अपरे त्वेवं कथयंति। गृत्समदस्य यज्ञे प्रविष्ट मेकाकिन मिंद्रं ज्ञात्वाऽसुराः परिवव्रुः। स इंद्रो गृत्समदरूपेण यज्ञवाटान्निर्गत्य स्वर्गं जगाम। ततोऽसुरा इंद्रो विलंबित इत्यंतः प्रविश्य गृत्समदं दृष्ट्वा पूर्वमेव गृत्समदो गतः अयं त्विंद्रोऽस्मद्भयाद् गृत्समदरूपेणास्त इति तं जगृहुः। स तान् नाहमिंद्रोऽयमित्यनेन सूक्तेन प्रत्युवाच। अयमेवार्थो महाभारते प्रपंचितः ॥

[म. भा. अनुशासनपर्व. अ. ९ श्लो. ५९]

यो जात एव प्रथमो मनस्वान्देवो देवान्क्रतुना पर्यभूषत्। यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इंद्रः ॥ १ ॥

यः। जातः। एव। प्रथमः। मनस्वान्। देवः। देवान्। क्रतुना। परिऽअभूषत्।
यस्य। शुष्मात्। रोदसी इति। अभ्यसेतां। नृम्णस्य। मह्ना। सः। जनासः। इंद्रः ॥ १ ॥

यः पृथिवीं व्यथमानामदृंहद्यः पर्वतान्प्रकुपिताँ अरम्णात् ।
यो अंतरिक्षं विममे वरीयो यो द्यामस्तभ्नात्स जनास इंद्रः ॥२॥

यः । पृथिवीं । व्यथमानां । अदृंहत् । यः । पर्वतान् । प्रऽकुपितान् ।
अरम्णात् ।
यः । अंतरिक्षं । विऽममे । वरीयः । यः । द्यां । अस्तभ्नात् । सः ।
जनासः । इंद्रः ॥ २ ॥

यो हत्वाहिमरिणात्सप्त सिंधून्यो गा उदाजदपधा वलस्य ।
यो अश्मनोरंतरग्निं जजान संवृक्समत्सु स जनास इंद्रः॥३॥

यः । हत्वा । अहिं । अरिणात् । सप्त । सिंधून् । यः । गाः ।
उत्ऽआजत् । अपऽधा । वलस्य ।
यः । अश्मनोः । अंतः । अग्निं । जजान । संऽवृक् । समत्ऽसु ।
सः । जनासः । इंद्रः ॥ ३ ॥

येनेमा विश्वा च्यवना कृतानि यो दासं वर्णमधरं गुहाकः ।
श्वघ्नीव यो जिगीवां लक्षमाददर्यः पुष्टानि स जनास
इंद्रः ॥ ४ ॥

येन । इमा । विश्वा । च्यवना । कृतानि । यः । दासं । वर्णं ।
अधरं । गुहा । अकरित्यकः ।
श्वघ्नीऽईव । यः । जिगीवान् । लक्षं । आदत् । अर्यः । पुष्टानि ।
सः । जनासः । इंद्रः ॥४॥

यं स्मा पृच्छंति कुह सेति घोरमुतेमाहुर्नैषो अस्तीत्येनं ।
सो अर्यः पुष्टीर्विज इवा मिनाति श्रदस्मै धत्त स जनास
इंद्रः ॥ ५ ॥

यं । स्म । पृच्छंति । कुह । सः । इति । घोरं । उत । ईं । आहुः ।
न । एषः । अस्ति । इति । एनं ।
सः । अर्यः । पुष्टीः । विजःऽइव । आ । मिनाति । श्रत् । अस्मै ।
धत्त । सः । जनास । इंद्रः ॥ ५ ॥

यो रध्रस्य चोदिता यः कृशस्य यो ब्रह्मणो नाधमानस्य कीरेः ।
युक्तग्राव्णो योऽविता सुशिप्रः सुतसोमस्य स जनास इंद्रः ॥ ६

यः । रध्रस्य । चोदिता । यः । कृशस्य । यः । ब्रह्मणः ।
नाधमानस्य । कीरेः ।
युक्तऽग्राव्णः । यः । अविता । सुऽशिप्रः । सुतऽसोमस्य । सः ।
जनासः । इंद्रः ॥ ६ ॥

यस्याश्वासः प्रदिशि यस्य गावो यस्य ग्रामा यस्य विश्वे
रथासः ।
यः सूर्यं य उषसं जजान यो अपां नेता स जनास इंद्रः ॥७॥
यस्य । अश्वासः । प्रऽदिशि । यस्य । गावः । यस्य । ग्रामाः
यस्य । विश्वे । रथासः ।
यः । सूर्यं । यः । उषसं । जजान । यः । अपां । नेता । सः ।
जनासः । इंद्रः ॥ ७ ॥

यं क्रंदसी संयती विव्हयेते परेऽवर उभया अमित्राः ।
समानं चिद्रथमातस्थिवांसा नाना हवेते स जनास इंद्रः ॥८॥

यं । क्रंदसी इति । संयती इति संऽयती । विव्हयेते इति विऽव्हयेते
परे । अवरे । उभयाः । अमित्राः ।
समानं । चित् । रथं । आतस्थिऽवांसा । नाना । हवेते इति ।
सः । जनासः । इंद्रः ॥ ८ ॥

यस्मान्न ऋते विजयंते जनासो यं युध्यमाना अवसे हवंते ।
यो विश्वस्य प्रतिमानं बभूव यो अच्युतच्युत्स जनास
इंद्रः ॥ ९ ॥

यस्मात् । न । ऋते । विऽजयंते । जनासः । यं । युध्यमानाः
अवसे । हवंते ।
यः । विश्वस्य । प्रतिऽमानं । बभूव । यः । अच्युतऽच्युत् । सः ।
जनासः । इंद्रः ॥ ९ ॥

यः शश्वतो मह्येनो दधानानमन्यमानाञ्छर्वा जघान ।
यः शर्धते नानुददाति शृध्यां यो दस्योर्हंता स जनास
इंद्रः ॥ १० ॥

यः । शश्वतः । महि । एनः । दधानान् । अमन्यमानान् ।
शर्वा । जघान ।
यः । शर्धते । न । अनुऽददाति । शृध्यां । यः । दस्योः । हंता ।
सः । जनासः । इंद्रः ॥ १० ॥

य शंबरं पर्वते॒षु क्षियंतं चत्वारिंश्यां शरद्यन्वविंदत् ।
ओजायमानं यो अहिं जघान दानुं शयानं स जनास इंद्रः ॥ ११ ॥

यः । शंबरं । पर्वतेषु । क्षियंतं । चत्वारिंश्यां । शरदि । अनुऽअविंदत् ।
ओजायमानं । यः । अहिं । जघानं । दानुं । शयानं । सः । जनासः । इंद्रः ॥ ११ ॥

यः सप्तरश्मिर्वृषभस्तुविष्मानवासृजत्सर्तवे सप्त सिंधून् ।
यो रौहिणमस्फुरद्वज्रबाहुर्द्यामारोहंतं स जनास इंद्रः ॥ १२ ॥

यः । सप्तऽरश्मिः । वृषभः । तुविष्मान् । अवऽअसृजत् । सर्तवे । सप्त । सिंधून् ।
यः । रौहिणं । अस्फुरत् । वज्रऽबाहुः । द्यां । आऽरोहंतं । सः । जनासः । इंद्रः ॥ १२ ॥

द्यावा चिदस्मै पृथिवी नमेते शुष्माच्चिदस्य पर्वता भयंते ।
यः सोमपा निचितो वज्रबाहुर्यो वज्रहस्तः स जनास इंद्रः ॥ १३ ॥

द्यावा । चित् । अस्मै । पृथिवी इति । नमेते इति । शुष्मात् ।
चित् । अस्य । पर्वताः । भयंते ।
यः । सोमऽपाः । निऽचितः । वज्रंऽबाहुः । यः । वज्रंऽहस्तः ।
सः । जनासः । इंद्रः ॥ १३ ॥

यः सुन्वंतमवति यः पचंतं यः शंसंतं यः शशमानमूती ।
यस्य ब्रह्म वर्धनं यस्य सोमो यस्येदं राधः स जनास
इंद्रः ॥ १४ ॥

यः । सुन्वंतं । अवंति । यः । पचंतं । यः । शंसंतं । यः ।
शशमानं । ऊती ।
यस्यं । ब्रह्मं । वर्धनं । यस्यं । सोमः । यस्यं । इदं । राधः । सः ।
जनासः । इंद्रः ॥ १४ ॥

यः सुन्वते पचते दुध्र आ चिद्वाजं दर्दर्षि स किलासि
सत्यः ।
वयं त इंद्र विश्वह प्रियासः सुवीरासो विदथमा
वदेम ॥ १५ ॥

यः । सुन्वते । पचंते । दुध्रः । आ । चित् । वाजं । दर्दर्षि । सः ।
किलं । असि । सत्यः ।
वयं । ते । इंद्र । विश्वह । प्रियासः । सुऽवीरासः । विदथं । आ ।
वदेम ॥ १५ ॥

प्र पर्वतानामिति त्रयोदशर्चं [तृतीयेऽनुवाके] चतुर्थं सूक्तम्। अन्त्याऽनुष्टुप्। शिष्टास्त्रिष्टुभः। अत्र चतुर्थीषष्ठयष्टमीदशमीनां नदीवाक्यत्वान्नद्य एव ऋषयः। शिष्टानां विश्वामित्रवाक्यत्वात्स एव ऋषिः। इन्द्रो देवता। यद्यपि षष्ठ्यां सप्तम्यां च विश्वामित्रो नद्यश्च स्तूयंते तथापीन्द्र एव देवता। सूक्तविनियोगो लैङ्गिकः॥ पुरा किल विश्वामित्रः पैजवनस्य सुदासो राज्ञः पुरोहितो बभूव। स च पौरोहित्येन लब्धधनः सर्वं धन मादाय विपाट्छुतुद्र्योः संभेदमाययावनुययुरितरे। अथोत्तितीर्षुर्विश्वामित्रोऽगाधजले ते नद्यौ दृष्ट्वोत्तरणार्थमाद्याभिस्तिसृभिस्तुष्टाव॥

[विश्वामित्रः—]

प्र पर्वतानामुशती उपस्थादश्वे इव विषिते हासमाने।
गावेव शुभ्रे मातरा रिहाणे विपाट्छुतुद्री पयसा जवेते॥१॥

प्र। पर्वतानां। उशती इति। उपऽस्थात्। अश्वे इवेत्यश्वेऽइव। विसिते इति विऽसिते। हासमाने इति।
गावाऽइव। शुभ्रे इति। मातरा। रिहाणे इति। विऽपाट्। शुतुद्री। पयसा। जवेते इति॥ १॥

इंद्रेषिते प्रसवं भिक्षमाणे अच्छा समुद्रं रथ्येव याथः।
समाराणे ऊर्मिभिः पिन्वमाने अन्या वामन्यामप्येति शुभ्रे॥२

इंद्रेषिते इतींद्रऽइषिते। प्रऽसवं। भिक्षमाणे इति। अच्छ। समुद्रं। रथ्याऽइव। याथः।
समाराणे इति संऽआराणे। ऊर्मिऽभिः। पिन्वमाने इति। अन्या। वां। अन्यां। अपि। एति। शुभ्रे इति॥२॥

अच्छा सिंधुं मातृतंमामयासं विपांशमुर्वीं सुभगांमगन्म ।
वत्सामिव मातरा संरिहाणे समानं योनिमनु संचरंती ॥३॥

अच्छे । सिंधुं । मातृऽतमां । अयासं । विऽपांशं । उर्वीं । सुऽभगां । अगन्म ।
वत्संऽईव । मातरा । संरिहाणे इति संऽरिहाणे । समानं । योनिं । अनु । संचरंती इति संऽचरंती ३ ॥

[नद्यौ—]

एना वयं पयंसा पिन्वंमाना अनु योनिं देवकृतं चरंतीः ।
न वर्तवे प्रसवः सर्गतक्तः किंयुर्विप्रो नद्यो जोहवीति ॥४॥

एना । वयं । पयंसा । पिन्वंमानाः । अनु । योनिं । देवऽकृतं । चरंतीः ।
न । वर्तवे । प्रऽसवः । सर्गंऽतक्तः । किंऽयुः । विप्रः । नद्यः । जोहवीति ॥ ४ ॥

[विश्वामित्रः—]

रमंध्वं मे वचंसे सोम्याय ऋतावरीरुपं मुहूर्तमेवैः ।
प्र सिंधुमच्छा बृहती मंनीषावस्युरंह्वे कुशिकस्यं सूनुः ॥५॥

रमंध्वं । मे । वचंसे । सोम्याय । ऋतंऽवरीः । उपं । मुहूर्तं । एवैः ।
प्र । सिंधुं । अच्छे । बृहती । मनीषा । अवस्युः । अह्वे । कुशिकस्यं । सूनुः ॥ ५ ॥

[नद्यौ—] (इन्द्रस्तुतिः)

इंद्रो अस्माँ अरदद्वज्रबाहुरपाहन्वृत्रं परिधिं नदीनां ।
देवोऽनयत्सविता सुपाणिस्तस्य वयं प्रसवे याम उर्वीः ॥६॥

इंद्रः । अस्मान् । अरदत् । वज्रऽबाहुः । अप । अहन् । वृत्रं । परिऽधिं । नदीनां ।
देवः । अनयत् । सविता । सुऽपाणिः । तस्य । वयं । प्रऽसवे । यामः । उर्वीः ॥ ६ ॥

* प्रवाच्यं शश्वधा वीर्यं १ तदिंद्रस्य कर्म यदहिं विवृश्चत् ।
वि वज्रेण परिषदो जघानायन्नापोऽयनमिच्छमानाः ॥ ७ ॥

प्रऽवाच्यं । शश्वधा । वीर्यं । तत् । इंद्रस्य । कर्म । यत् । अहिं । विऽवृश्चत् ।
वि । वज्रेण । परिऽसदः । जघान । आयन् । आपः । अयनं । इच्छमानाः ॥७॥

[नद्यौ—विश्वामित्रं प्रति]

एतद्वचो जरितर्मापि मृष्ठा आ यत्ते घोषानुत्तरा युगानि ।
उक्थेषु कारो प्रति नो जुषस्व मा नो नि कः पुरुषत्रा नमस्ते ॥ ८ ॥

---

* विश्वामित्र इमा मृचं वक्तीति केचिदाधुनिकाः

एतत् । वचः । जरितः । मा । अपि । मृष्ठाः । आ । यत् । ते ।
घोषान् । उत्ऽतरा । युगानि ।
उक्थेषु । कारो इति । प्रति । नः । जुषस्व । मा । नः । नि ।
करिति कः । पुरुषऽत्रा । नमः । ते ॥ ८ ॥

[**विश्वामित्रः—**]

ओ षु स्वसारः कारवे शृणोत ययौ वो दूरादनसा रथेन ।
नि षू नमध्वं भवता सुपारा अधोअक्षाः सिंधवः स्रोत्याभिः ॥ ९ ॥

ओ इति । सु । स्वसारः । कारवे । शृणोत । ययौ । वः । दूरात् ।
अनसा । रथेन ।
नि । सु । नमध्वं । भवत । सुऽपाराः । अधःऽअक्षाः । सिंधवः ।
स्रोत्याभिः ॥९॥

[**नद्यो—**]

आ ते कारो शृणवामा वचांसि ययाथ दूरादनसा रथेन ।
नि ते नंसै पीप्यानेव योषा मर्यायेव कन्या शश्वचै ते ॥१०॥

आ । ते । कारो इति । शृणवाम । वचांसि । ययाथ । दूरात् ।
अनसा । रथेन ।
नि । ते । नंसै । पीप्यानाऽइव । योषा । मर्यायऽइव । कन्या ।
शश्वचै । तु इति । ते ॥१०॥

[विश्वामित्रः--]

यदंग त्वा भरताः संतरेयुर्गव्यन्ग्राम इषित इंद्रजूतः ।
अर्षादह प्रसवः सर्गतक्त आ वो वृणे सुमतिं यज्ञियानां ॥ ११ ॥

यत् । अंग । त्वा । भरताः । संऽतरेयुः । गव्यन् । ग्रामः ।
इषितः । इंद्रऽजूतः ।
अर्षात् । अह । प्रऽसवः । सर्गऽतक्तः । आ । वः । वृणे । सुऽमतिं ।
यज्ञियानां ॥ ११ ॥

अतारिषुर्भरता गव्यवः समभक्त विप्रः सुमतिं नदीनां ।
प्र पिन्वध्वमिषयंतीः सुराधा आ वक्षणाः पृणध्वं यात शीभं ॥ १२ ॥

अतारिषुः । भरताः । गव्यवः । सं । अभक्त । विप्रः । सुऽमतिं ।
नदीनां ।
प्र । पिन्वध्वं । इषयंतीः । सुऽराधाः । आ । वक्षणाः पृणध्वं ।
यात । शीभं ॥ १२ ॥

उद्व ऊर्मिः शम्या हंत्वापो योक्त्राणि मुंचत ।
मादुष्कृतौ व्येनसाघ्न्यौ शूनमारतां ॥ १३ ॥

उत् । वः । ऊर्मिः । शम्याः । हंतु । आपः । योक्त्राणि । मुंचत ।
मा । अदुःऽकृतौ । विऽएनसा । अघ्न्यौ । शूनं । आ । अरतां ॥ १३ ॥

' मम द्विते ' ति दशर्चं [चतुर्थेऽनुवाके] दशमं सूक्तम्। पुरुकुत्सस्य पुत्रस्त्रसदस्यू राजर्षिः। आद्यासु षट्स्वात्मनः स्तुत्यत्वादात्मा देवता। अवशिष्टानां चतसृणामिंद्रावरुणौ देवता। त्रिष्टुप् छंदः। विनियोगः। आभिप्लविकेषूक्थेषु तृतीयसवने मैत्रावरुणशस्त्रेषु स्तोमवृद्धावावापार्थम्।

मर्म द्विता राष्ट्रं क्षत्रियस्य विश्वायो विश्वे अमृता यथा नः।
क्रतुं सचंते वरुणस्य देवा राजामि कृष्टेरुपमस्य वव्रेः
॥ १ ॥

मर्म। द्विता। राष्ट्रं। क्षत्रियस्य। विश्वऽआयोः। विश्वे। अमृताः। यथा। नः।

क्रतुं। सचंते। वरुणस्य। देवाः। राजामि। कृष्टेः। उपमस्य। वव्रेः॥ १ ॥

अहं राजा वरुणो मह्यं तान्यसुर्याणि प्रथमा धारयंत।
क्रतुं सचंते वरुणस्य देवा राजामि कृष्टेरुपमस्य वव्रेः ॥२॥

अहं। राजा। वरुणः। मह्यं। तानि। असुर्याणि। प्रथमा। धारयंत।

क्रतुं। सचंते। वरुणस्य। देवाः। राजामि। कृष्टेः। उपमस्य। वव्रेः
॥ २ ॥

अहमिंद्रो वरुणस्ते महित्वोर्वी गंभीरे रजसी सुमेके।
त्वष्टेव विश्वा भुवनानि विद्वान्त्समैरयं रोदसी धारयं च
॥ ३ ॥

अहं । इंद्रः । वरुणः । ते इति । महिऽत्वा । उर्वी इति । गभीरे इति ।
रजसी इति । सुमेके इति सुऽमेके ।
त्वष्टाऽइव । विश्वा । भुवनानि । विद्वान् । सं । ऐरयं । रोदसी इति ।
धारयं । च ॥ ३ ॥

अहमपो अपिन्वमुक्षमाणा धारयं दिवं सदन ऋतस्य ।
ऋतेन पुत्रो अदितेर्ऋतावोत त्रिधातु प्रथयद्वि भूम ॥ ४ ॥

अहं । अपः । अपिन्वं । उक्षमाणाः । धारयं । दिवं । सदने ।
ऋतस्य ।
ऋतेन । पुत्रः । अदितेः । ऋतऽवा । उत । त्रिऽधातु । प्रथयत् ।
वि । भूम ॥ ४ ॥

मां नरः स्वश्वा वाजयंतो मां वृताः समरणे हवंते ।
कृणोम्याजिं मघवाहमिंद्र इयर्मि रेणुमभिभूत्योजाः ॥ ५ ॥

मां । नरः । सुऽअश्वाः । वाजयंतः । मां । वृताः । संऽअरणे ।
हवंते ।
कृणोमि । आजिं । मघऽवा । अहं । इंद्रः । इयर्मि । रेणुं ।
अभिभूतिऽओजाः ॥ ५ ॥

अहं ता विश्वा चकरं नकिर्मा दैव्यं सहो वरते अप्रतीतं ।
यन्मा सोमासो ममदन्यदुक्थोभे भयेते रजसी अपारे ॥ ६ ॥

अहं । ता । विश्वा । चकरं । नकिः । मा । दैव्यं । सहः । वरते ।
अप्रतिऽइतं ।
यत् । मा । सोमासः । ममदन् । यत् । उक्था । उभे इति ।
भयेते इति । रजसी इति । अपारे इति ॥ ६ ॥

विदुष्टे विश्वा भुवनानि तस्य ता प्र ब्रवीषि वरुणाय वेधः ।
त्वं वृत्राणि शृण्विषे जघन्वान्त्वं वृताँ अरिणा इंद्र सिंधून्
॥ ७ ॥
विदुः । ते । विश्वा । भुवनानि । तस्य । ता । प्र । ब्रवीषि । वरुणाय ।
वेधः ।
त्वं । वृत्राणि । शृण्विषे । जघन्वान् । त्वं । वृतान् । अरिणाः ।
इंद्र । सिंधून् ॥ ७ ॥

अस्माकमत्र पितरस्त आसन्त्सप्त ऋषयो दौर्गहे बध्यमाने ।
त आयजंत त्रसदस्युमस्या इंद्रं न वृत्रतुरमर्धदेवं ॥ ८ ॥
अस्माकं । अत्र । पितरः । ते । आसन् । सप्त । ऋषयः ।
दौःऽगहे । बध्यमाने ।
ते । आ । अयजंत । त्रसदस्युं । अस्याः । इंद्रं । न । वृत्रऽतुरं ।
अर्धऽदेवं ॥ ८ ॥

[illegible] हि वामद[illegible]भिर्हव्येभिरिंद्रावरुणा नमोभिः ।
अथा [illegible]जानं त्रसद[illegible]स्या वृत्रहणं दद[illegible]र्धदेवं ॥ ९ ॥

पुरुऽकुत्सानी । हि । वां । अदाशत् । हव्येभिः । इंद्रावरुणा । नमःऽभिः ।

अथ । राजानं । त्रसदस्युं । अस्याः । वृत्रऽहनं । ददथुः । अर्धऽदेवं ॥ ९ ॥

राया वयं ससवांसो मदेम हव्येन देवा यवसेन गावः ।
तां धेनुमिंद्रावरुणा युवं नो विश्वाहा धत्तमनपस्फुरंतीं ॥१०॥

राया । वयं । ससऽवांसः । मदेम । हव्येन । देवाः । यवसेन । गावः । तां । धेनुं । इंद्रावरुणा । युवं । नः । विश्वाहा । धत्तं । अनपऽस्फुरंतीं । ॥ १० ॥

'इदमु त्यदि' त्येकादशर्चं [पंचमेऽनुवाके] षष्ठं सूक्तं वामदेवस्यार्षं त्रैष्टुभमुषोदेवताकम् । प्रातरनुवाक उषस्ये क्रतौ त्रैष्टुभे छंदस्याश्विनशस्त्र इदं सूक्तम् ।

इदमु त्यत्पुरुतमं पुरस्ताज्ज्योतिस्तमसो वयुनावदस्थात् ।
नूनं दिवो दुहितरो विभातीर्गातुं कृणवन्नुषसो जनाय ॥१॥

इदं । ऊं इति । त्यत् । पुरुऽतमं । पुरस्तात् । ज्योतिः । तमसः । वयुनऽवत् । अस्थात् ।

नूनं । दिवः । दुहितरः । विऽभातीः । गातुं । कृणवन् । उषसः । जनाय ॥ १ ॥

अस्थुरु चित्रा उषसः पुरस्तान्मिता इव स्व वोऽध्वरेषु ।
व्यू व्रजस्य तमसो द्वारोच्छंतीरव्रञ्छुचयः पावकाः ॥ २ ॥

अस्थुः । ऊं इति । चित्राः । उषसः । पुरस्तात् । मिताःऽइव ।
स्वरवः । अध्वरेषु ।
वि । ऊं इति । व्रजस्य । तमसः । द्वारा । उच्छंतीः । अव्रन् ।
शुचयः । पावकाः ॥ २ ॥

उच्छंतीरद्य चितयंत भोजान्राधोदेयायोषसो मघोनीः ।
अचित्रे अंतः पणयः ससंत्वबुध्यमाना तमसो विमध्ये॥३॥

उच्छंतीः । अद्य । चितयंत । भोजान् । राधःऽदेयाय । उषसः ।
मघोनीः ।
अचित्रे । अंतरिति । पणयः । ससंतु । अबुध्यमानाः । तमसः ।
विऽमध्ये ॥ ३ ॥

कुवित्स देवीः सनयो नवो वा यामो बभूयादुषसो वो अद्य।
येना नवग्वे अंगिरे दशग्वे सप्तास्ये रेवती रेवदूष ॥ ४ ॥

कुवित् । सः । देवीः । सनयः । नवः । वा । यामः । बभूयात्।
उषसः । वः । अद्य ।
येन । नवऽग्वे । अंगिरे । दशऽग्वे । सप्तऽआस्ये । रेवतीः । रेवत् ।
ऊष ॥ ४ ॥

यूयं हि देवीर्ऋतयुग्भिरश्वैः परिप्रयाथ भुवनानि सद्यः ।
प्रबोधयंतीरुषसः ससंतं द्विपाच्चतुष्पाच्चरथाय जीवं ॥ ५ ॥

यूयं । हि । देवीः । ऋतयुक्ऽभिः । अश्वैः । परिऽप्रयाथ ।
भुवनानि । सद्यः ।
प्रऽबोधयंतीः । उषसः । ससंतं । द्विऽपात् । चतुःऽपात् । चरथाय ।
जीवं ॥ ५ ॥

क्व स्विदासां कतमा पुराणी यया विधाना विदधुर्ऋभूणां ।
शुभं यच्छुभ्रा उषसश्चरंति न वि ज्ञायंते सदृशीरजुर्याः ॥६॥

क्व । स्वित् । आसां । कतमा । पुराणी । यया । विऽधाना ।
विऽदधुः । ऋभूणां ।
शुभं । यत् । शुभ्राः । उषसः । चरंति । न । वि । ज्ञायंते ।
सऽदृशीः । अजुर्याः ॥ ६ ॥

ता घा ता भद्रा उषसः पुरासुरभिष्टिद्युम्ना ऋतजातसत्याः ।
यास्वीजानः शशमान उक्थैः स्तुवञ्छंसन्द्रविणं सद्य आप
॥ ७ ॥

ताः । घ । ताः । भद्राः । उषसः । पुरा । आसुः । अभिष्टिऽद्युम्नाः ।
ऋतजातऽसत्याः ।
यासु । ईजानः । शशमानः । उक्थैः । स्तुवन् । शंसन् । द्रविणं ।
सद्यः । आप ॥ ७ ॥

ता आ चरंति समना पुरस्तात्समानतः समना पप्रथानाः ।
ऋतस्य देवीः सदसो बुधाना गवां न सर्गा उषसो जरंते
॥ ८ ॥

ताः । आ । चरंति । समना । पुरस्तात् । समानतः । समना । पप्रथानाः ।
ऋतस्य । देवीः । सदसः । बुधानाः । गवां । न । सर्गाः । उषसः । जरंते ॥ ८ ॥

ता इन्न्वे३व समना समानीरमीतवर्णा उषसश्चरंति ।
गूहंतीरभ्वमसितं रुशद्भिः शुक्रास्तनूभिः शुचयो रुचानाः
॥ ९ ॥

ताः । इत् । नु । एव । समना । समानीः । अमीतऽवर्णाः । उषसः । चरंति ।
गूहंतीः । अभ्वं । असितं । रुशत्ऽभिः । शुक्राः । तनूभिः । शुचयः । रुचानाः ॥ ९ ॥

रयिं दिवो दुहितरो विभातीः प्रजावंतं यच्छतास्मासु देवीः ।
स्योनादा वः प्रतिबुध्यमानाः सुवीर्यस्य पतयः स्याम ॥ १० ॥

रयिं । दिवः । दुहितरः । विऽभातीः । प्रजाऽवंतं । यच्छत । अस्मासु । देवीः ।
स्योनात् । आ । वः । प्रतिऽबुध्यमानाः । सुऽवीर्यस्य । पतयः । स्याम ॥ १० ॥

तद्वो दिव इति व्युष्टायां जपेत् ।

तद्वो दिवो दुहितरो विभातीरुप ब्रुव उषसो यज्ञकेतुः ।
वयं स्याम यशसो जनेषु तद्द्यौश्च धत्तां पृथिवी च देवी ॥ ११ ॥

तत् । वः । दिवः । दुहितरः । विऽभातीः । उप । ब्रुवे । उषसः । यज्ञऽकेतुः ।
वयं । स्याम । यशसः । जनेषु । तत् । द्यौः । च । धत्तां । पृथिवी । च । देवी ॥ ११ ॥

'ऋतेन ऋत' मिति [पंचमेऽनुवाके] नवर्चं षष्ठं सूक्तमात्रेयस्य श्रुतविद आर्षं त्रैष्टुभं मैत्रावरुणम् । विनियोगो लैङ्गिकः ॥

ऋतेन ऋतमपिहितं ध्रुवं वां सूर्यस्य यत्र विमुचंत्यश्वान् ।
दश शता सह तस्थुस्तदेकं देवानां श्रेष्ठं वपुषामपश्यं ॥ १ ॥

ऋतेन । ऋतं । अपिऽहितं । ध्रुवं । वां । सूर्यस्य । यत्र । विऽमुचंति । अश्वान् ।
दश । शता । सह । तस्थुः । तत् । एकं । देवानां । श्रेष्ठं । वपुषां । अपश्यं ॥ १ ॥

तत्सु वां मित्रावरुणा महित्वमीर्मा तस्थुषीरहभिर्दुदुह्रे ।
विश्वाः पिन्वथः स्वसरस्य धेना अनु वामेकः पविरा ववर्त ॥ २ ॥

तत् । सु । वां । मित्रावरुणा । महिऽत्वं । ईर्मा । तस्थुषीः ।
अहंऽभिः । दुदुहे ।

विश्वाः । पिन्वथः । स्वसंरस्य । धेनाः । अनु । वां । एकः । पविः ।
आ । ववर्त ॥ २ ॥

अधारयतं पृथिवीमुत द्यां मित्रराजाना वरुणा महोभिः ।
वर्धयतमोषधीः पिन्वतं गा अव वृष्टिं सृजतं जीरदानू ॥३॥

अधारयतं । पृथिवीं । उत । द्यां । मित्रऽराजाना । वरुणा ।
महःऽभिः ।

वर्धयतं । ओषधीः । पिन्वतं । गाः । अव । वृष्टिं । सृजतं ।
जीरदानू इति' जीरऽदानू ॥ ३ ॥

आ वामश्वासः सुयुजो वहंतु यतरश्मय उप यंत्ववार्क् ।
घृतस्य निर्णिगनु वर्तते वामुप सिंधवः प्रदिवि' क्षरंति ॥४॥

आ । वां । अश्वासः । सुऽयुजः । वहंतु । यतऽरश्मयः । उप ।
यंतु । अर्वाक् ॥ ४ ॥

घृतस्य । निःऽनिक् । अनु । वर्तते । वां । उप । सिंधवः । प्रऽदिवि' ।
क्षरंति ॥ ४ ॥

अनु श्रुतामुमतिं वर्धदुर्वी बर्हिरिव यजुषा रक्षमाणा ।
[illegible] धृतदक्षाधि गर्ते मित्रासाथे वरुण[illegible]तः ॥ ५ ॥

अनु । श्रुतां । अमतिं । वर्धत् । उर्वीं । बर्हिःऽइव । यजुषा ।
रक्षमाणा ।
नमस्वंता । धृतऽदक्षा । अधि । गर्ते । मित्र । आसाथे इति ।
वरुण । इळासु । अंतरिति ॥ ५ ॥

अक्रविहस्ता सुकृते परस्पा यं त्रासाथे वरुणेळास्वंतः ।
राजाना क्षत्रमहृणीयमाना सहस्रस्थूणं बिभृथः सह द्वौ ॥६॥

अक्रविऽहस्ता । सुऽकृते । परःऽपा । यं । त्रासाथे इति । वरुणा ।
इळासु । अंतरिति ।
राजाना । क्षत्र । अहृणीयमाना । सहस्रऽस्थूणं । बिभृथः । सह ।
द्वौ ॥ ६ ॥

हिरण्यनिर्णिगयो अस्य स्थूणा वि भ्राजते दिव्य १ श्वाजनीव ।
भद्रे क्षेत्रे निमिता तिल्विले वा सनेम मध्वो अधिगर्त्यस्य ॥७॥

हिरण्यऽनिर्निक् । अयः । अस्य । स्थूणा । वि । भ्राजते । दिवि ।
अश्वाजनीऽइव ।
भद्रे । क्षेत्रे । निऽमिता । तिल्विले । वा । सनेम । मध्वः ।
अधिऽगर्त्यस्य ॥ ७ ॥

हिरण्यरूपमुषसो व्युष्टावयःस्थूणमुदिता सूर्यस्य ।
आ रोहथो वरुण मित्र गर्तमतश्चक्षाथे अदितिं दितिं च ॥८॥

हिरण्यऽरूपं । उषसः । विऽउष्टौ । अयःऽस्थूणं । उत्ऽइता । सूर्यस्य ।
आ । रोहथः । वरुण । मित्र । गर्तं । अतः । चक्षाथे इति । अदितिं । दितिं । च ॥ ८ ॥

दाक्षायणयज्ञे यद्बंहिष्ठमिति नवमी द्वितीयस्याममावास्यायां मैत्रावरुणस्य हविषो याज्या । मैत्रावरुणे पशौ हविष एषैव याज्या ।

यद्बंहिष्ठं नातिविधे सुदानू अच्छिद्रं शर्म भुवनस्य गोपा ।
तेन नो मित्रावरुणावविष्टं सिषासन्तो जिगीवांसः स्याम ॥९॥

यत् । बंहिष्ठं । न । अतिऽविधे । सुदानू इति सुऽदानू । अच्छिद्रं । शर्म । भुवनस्य । गोपा ।
तेन । नः । मित्रावरुणौ । अविष्टं । सिसासंतः । जिगीवांसः । स्याम ॥ ९ ॥

अच्छा वदेति दशर्चं [षष्ठेऽनुवाके] एकादशं सूक्तं भौमस्यात्रेरार्षम् । यत्पार्जन्येत्येषा नवम्यनुष्टुप्, वि वृक्षानित्याद्यास्तिस्रो जगत्यः, शिष्टाःषट् त्रिष्टुभः । पर्जन्यो देवता । अनेन सूक्तेन प्रत्यृचं वा दिश उपस्थेयाः ॥

अच्छा वद तवसं गीर्भिराभिः स्तुहि पर्जन्यं नमसा विवास ।
कनिक्रदद्वृषभो जीरदानू रेतो दधात्योषधीषु गर्भं ॥ १ ॥

अच्छ । वद । तवसं । गीःऽभिः । आभिः । स्तुहि । पर्जन्यं ।
नमसा । आ । विवास ।
कनिक्रदत् । वृषभः । जीरऽदानुः । रेतः । दधाति । ओषधीषु ।
गर्भं ॥ १ ॥

वि वृक्षान् हंत्युत हंति रक्षसो विश्वं बिभाय भुवनं
महावधात् ।
उतानागा ईषते वृष्ण्यावतो यत्पर्जन्यः स्तनयन् हंति
दुष्कृतः ॥२॥

वि । वृक्षान् । हंति । उत । हंति । रक्षसः । विश्वं । बिभाय ।
भुवनं । महाऽवधात् ।
उत । अनागाः । ईषते । वृष्ण्यऽवतः । यत् । पर्जन्यः । स्तनयन् ।
हंति । दुःऽकृतः ॥ २ ॥

रथीव कशयाश्वाँ अभिक्षिपन्नाविर्दूतान्कृणुते वर्ष्याँ ३ अह ।
दूरात्सिंहस्य स्तनथा उदीरते यत्पर्जन्यः कृणुते
वर्ष्यं १ नभः ॥३॥

रथीऽइव । कशया । अश्वान् । अभिऽक्षिपन् । आविः । दूतान् ।
कृणुते । वर्ष्यान् । अह ।
दूरात् । सिंहस्य । स्तनथाः । उत् । ईरते । यत् । पर्जन्यः । कृणुते ।
वर्ष्यं । नभः ॥ ३ ॥

प्र वाता इति चतुर्थी पर्जन्यस्य चरोर्याज्या ।

प्र वाता वांति पतयंति विद्युत उदोषधीर्जिहते पिन्वते स्वः ।
इरा विश्वस्मै भुवनाय जायते यत्पर्जन्यः पृथिवीं रेतसावति
॥ ४ ॥

प्र । वाताः । वांति । पतयंति । विऽद्युतः । उत् । ओषधीः ।
जिहते । पिन्वते । स्व १ रिति स्वः ।
इरा । विश्वस्मै । भुवनाय । जायते । यत् । पर्जन्यः । पृथिवीं । रेतसा ।
अवति ॥ ४ ॥

यस्य व्रते पृथिवी नंनमीति यस्य व्रते श॒फ॒वज्जर्भुरीति ।
यस्य व्रत ओषधीर्विश्वरूपाः स नः पर्जन्य महि शर्म यच्छ
॥ ५ ॥

यस्य । व्रते । पृथिवी । नंनमीति । यस्य । व्रते । शफऽवत् ।
जर्भुरिति ।
यस्य । व्रते । ओषधीः । विश्वऽरूपाः । सः । नः । पर्जन्य । महि ।
शर्म । यच्छ ॥ ५ ॥

दिवो नो वृष्टिं मरुतो ररीध्वं प्र पिन्वत वृष्णो अश्वस्य
धाराः ।
अर्वाङेतेन स्तनयित्नुनेह्यपो निषिंचन्नसुर पिता नः ॥ ६ ॥

दिवः । नः । वृष्टिं । मरुतः । ररीध्वं । प्र । पिन्वत । वृष्णः ।
अश्वस्य । धाराः ।
अर्वाङ् । एतेन । स्तनयित्नुना । आ । इहि । अपः । निऽसिंचन् ।
असुरः । पिता । नः ॥ ६ ॥

अभि क्रंद स्तनय गर्भमा धा उदन्वता परि दीया रथेन ।
दृतिं सु कर्ष विषितं न्यंचं समा भवंतूद्वतो निपादाः ॥७॥

अभि । क्रंद । स्तनय । गर्भं । आ । धाः । उदन्ऽवता । परि ।
दीय । रथेन ।
दृतिं । सु । कर्ष । विऽसितं । न्यंचं । समाः । भवंतु । उत्ऽवतः ।
निऽपादाः ॥ ७ ॥

महांतं कोशमुदचा नि षिंच स्यंदंतां कुल्या विषिताः
पुरस्तात् ।
घृतेन द्यावापृथिवी व्युंधि सुप्रपाणं भवत्वघ्न्याभ्यः ॥ ८ ॥

महांतं । कोशं । उत् । अच । नि । सिंच । स्यंदंतां । कुल्याः ।
विऽसिताः । पुरस्तात् ।
घृतेन । द्यावापृथिवी इति । वि । उंधि । सुऽप्रपानं । भवतु ।
अघ्न्याभ्यः ॥ ८ ॥

यत्पर्जन्य कनिक्रदत्स्तनयन् हंसि दुष्कृतः ।

प्रतीदं विश्वं मोदते यत्किं च पृथिव्यामधि ॥ ९ ॥

यत् । पर्जन्य । कनिक्रदत् । स्तनयन् । हंसि । दुःऽकृतः ।

प्रति । इदं । विश्वं । मोदते । यत् । किं । च । पृथिव्यां । अधि ॥ ९ ॥

अवर्षीर्वर्षमुदु षू गृभायाकर्धन्वान्यत्येतवा उ ।

अजीजन ओषधीर्भोजनाय कमुत प्रजाभ्योऽविदो मनीषां ॥ १० ॥

अवर्षीः । वर्षं । उत् । ऊं इति । सु । गृभाय । अकः । धन्वानि । अतिऽएतवै । ऊं इति ।

अजीजनः । ओषधीः । भोजनाय । कं । उत । प्रऽजाभ्यः । अविदः । मनीषां ॥ १० ॥

बळित्थेति तृचात्मकं [षष्ठेऽनुवाके] द्वादशं सूक्तं भौमस्यात्रेरार्षं पृथिवी देवताकमानुष्टुभं । सूक्तविनियोगो लैङ्गिकः । आद्या देवानां हविष्षु पृथिव्या अनुवाक्या ।

बळित्था पर्वतानां खिद्रं बिभर्षि पृथिवि ।

प्र या भूमिं प्रवत्वति मह्ना जिनोषि महिनि ॥ १ ॥

बट् । इत्था । पर्वतानां । खिद्रं । बिभर्षि । पृथिवि ।
प्र । या । भूमिं । प्रवत्वति । मह्ना । जिनोषि । महिनि ॥ १ ॥

स्तोमासस्त्वा विचारिणि प्रति ष्टोभन्त्यक्तुभिः ।
प्र या वाजं न हेषन्तं पेरुमस्यस्यर्जुनि ॥ २ ॥

स्तोमासः । त्वा । विऽचारिणि । प्रति । स्तोभंति । अक्तुऽभिः ।
प्र । या । वाजं । न । हेषंतं । पेरुं । अस्यसि । अर्जुनि ॥ २ ॥

देवानां हविःषु दृळहा चिदिति पृथिव्या याज्या । एषैव भूमिस्तोमे-
निष्केवल्ये सूक्तमुखीया ।

दृळहा चिद्या वनस्पतीन्क्ष्मया दर्धर्ष्योजसा ।
यत्ते अभ्रस्य विद्युतो दिवो वर्षन्ति वृष्टयः ॥ ३ ॥

दृळ्हा । चित् । या वनस्पतीन् । क्ष्मया । दर्धर्षि । ओजसा ।
यत् । ते । अभ्रस्य । विऽद्युतः । दिवः । वर्षंति । वृष्टयः ॥३॥

'प्र सम्राज' इत्यष्टर्चं [षष्ठेऽनुवाके] त्रयोदशं सूक्तं मात्रेयं त्रैष्टुभं
वारुणम् । विनियोगो लैङ्गिकः ॥

प्र सम्राजे बृहदर्चा गभीरं ब्रह्म प्रियं वरुणाय श्रुताय ।
वि यो जघान शमितेव चर्मोपस्तिरे पृथिवीं सूर्याय ॥ १ ॥

प्र । संऽराजे । बृहत् । अर्च । गभीरं । ब्रह्म । प्रियं । वरुणाय ।
श्रुताय ।

वि । यः । जघान । शमिता ईव । चर्म । उपऽस्तिरे । पृथिवीं ।
सूर्याय ॥ १ ॥

वनेषु व्य१ंतरिक्षं ततान वाजमर्वत्सु पय उस्रियासु ।
हृत्सु क्रतुं वरुणो अप्स्व १ ग्निं दिवि सूर्यमदधात्सोममद्रौ ॥२॥

वनेषु । वि । अंतरिक्षं । ततान । वाजं । अर्वत्ऽसु । पयः ।
उस्रियासु ।

हृत्ऽसु । क्रतुं । वरुणः । अप्ऽसु । अग्निं । दिवि । सूर्यं । अदधात् ।
सोमं । अद्रौ ॥ २ ॥

नीचीनबारं वरुणः कवंधं प्र ससर्ज रोदसी अंतरिक्षं ।
तेन विश्वस्य भुवनस्य राजा यवं न वृष्टिर्व्युनत्ति भूम ॥ ३ ॥

नीचीनऽबारं । वरुणः । कवंधं । प्र । ससर्ज । रोदसी । इति ।
अंतरिक्षं ।

तेन । विश्वस्य । भुवनस्य । राजा । यवं । न । वृष्टिः । वि । उनत्ति ।
। भूम ॥ ३ ॥

उनत्ति भूमिं पृथिवीमुत द्यां यदा दुग्धं वरुणो वष्ट्यादित् ।
समभ्रेण वसत पर्वतासस्तविषीयंतः श्रथयंत वीराः ॥ ४ ॥

उनत्ति । भूमिं । पृथिवीं । उत । द्यां । यदा । दुग्धं । वरुणः ।
वष्टि । आत् । इत् ।
सं । अभ्रेर्ण । वसत । पर्वतासः । तविषीऽयंतः । श्रथयंत । वीराः
॥ ४ ॥

इमामू ष्वांसुरस्यं श्रुतस्यं महीं मायां वरुणस्य प्र वोचं ।
मानेनेव तस्थिवाँ अंतरिक्षे वि यो ममे पृथिवीं सूर्येण ॥५॥

इमां । ऊं इति । सु । आसुरस्यं । श्रुतस्यं । महीं । मायां ।
वरुणस्य । प्र । वोचं ।
मानेनऽइव । तस्थिऽवान् । अंतरिक्षे । वि । यः । ममे । पृथिवीं ।
सूर्येण ॥ ५ ॥

इमामू नु कवितमस्य मायां महीं देवस्य नकिरा दधर्ष ।
एकं यदुद्गा न पृणंत्येनीरासिंचंतीरवनंयः समुद्रं ॥ ६ ॥

इमां । ऊं इति । नु । कविऽतमस्य । मायां । महीं । देवस्यं ।
नकिः । आ । दधर्ष ।
एकं । यत् । उद्गा । न । पृणंति । एनीः । आऽसिंचंतीः ।
अवनंयः । समुद्रं ॥ ६ ॥

अर्यम्यं वरुण मित्र्यं वा सखायं वा सदमिद्भ्रातरं वा ।
वेशं वा नित्यं वरुणारणं वा यत्सीमागश्चकृमा शिश्रथस्तत्
॥ ७ ॥

अर्यम्यं । वरुण । मित्र्यं । वा । सखायं । वा । सदं । इत् ।
भ्रातरं । वा ।
वेशं । वा । नित्यं । वरुण । अरणं । वा । यत् । सीं । आगंः ।
चकृम । शिश्रथः । तत् ॥ ७ ॥

कितवासो यद्रिरिपुर्न दीवि यद्वा घा सत्यमुत यन्न विद्म ।
सर्वा ता वि ष्य शिथिरेव देवाधा ते स्याम वरुण
प्रियासः ॥ ८ ॥

कितवासः । यत् । रिरिपुः । न । दीवि । यत् । वा । घ । सत्यं ।
उत । यत् । न । विद्म ।
सर्वा । ता । वि । स्य । शिथिराऽइव । देव । अधं । ते । स्याम ।
वरुण । प्रियासः ॥ ८ ॥

'शुक्रं ते' इति चतुर्ऋचं [पंचमेऽनुवाके] नवमं सूक्तं भरद्वाजस्यार्षं पौष्णम् । द्वितीया जगती शिष्टास्त्रिष्टुभः । वैश्वदेवे पर्वणि वैश्वदेवस्य हविषः शुक्रं त इति याज्या । एकादशिनस्य पौष्णस्य पशोर्वपाया एषैव याज्या । अमाभिष्टवेऽप्येषा ।

शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवासि ।
विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह राति-
रस्तु ॥ १ ॥

शुक्रं । ते । अन्यत् । यजतं । ते । अन्यत् । विषुरूपे इति ।
विषुऽरूपे । अहनी इति । द्यौःऽइव । असि ।
विश्वाः । हि । मायाः । अवसि । स्वधाऽवः । भद्रा । ते । पूषन् ।
इह । रातिः । अस्तु ॥ १ ॥

अजाश्वः पशुपा वाजपस्त्यो धियंजिन्वो भुवने विश्वे अर्पितः ।
अष्ट्रां पूषा शिथिरामुद्वरीवृजत्संचक्षाणो भुवना देव ईयते ॥ २ ॥

अजऽअश्वः । पशुऽपाः । वाजऽपस्त्यः । धियंऽजिन्वः । भुवने ।
विश्वे । अर्पितः ।
अष्ट्रां । पूषा । शिथिरां । उत्ऽवरीवृजत् । संऽचक्षाणः । भुवना
। देवः । ईयते ॥ २ ॥

पौष्णस्य पशोर्वपापुरोडाशयोर्यास्ते पूषन्नित्यादिके द्वे ऋचावनुवाक्ये ।

यास्ते पूषन्नावो अंतः समुद्रे हिरण्ययीरंतरिक्षे चरंति ।
ताभिर्यासि दूत्यां सूर्यस्य कामेन कृत श्रव इच्छमानः ॥ ३ ॥

याः । ते । पूषन् । नावः । अंतरिति । समुद्रे । हिरण्ययीः ।
अंतरिक्षे । चरंति ।
ताभिः । यासि । दूत्यां । सूर्यस्य । कामेन । कृत । श्रवः । इच्छमानः ॥ ३ ॥

पूषा सुबंधुर्दिव आ पृथिव्या इळस्पतिर्मघवा दस्मवर्चाः ।
यं देवासो अददुः सूर्यायै कामेन कृतं तवसं स्वंचं ॥ ४ ॥

पूषा । सुऽबंधुः । दिवः । आ । पृथिव्याः । इळः । पतिः ।
मघऽवा । दस्मऽवर्चाः ।

यं । देवासः । अददुः । सूर्यायै । कामेन । कृतं । तवसं ।
सुऽअंचं ॥ ४ ॥

'युवां नरे' ति दशर्चं [पंचमेऽनुवाके] त्रयोदशं सूक्तं वसिष्ठस्यार्षं जागतमैंद्रावरुणम् । आभिप्लविकेषूक्थ्येषु स्तोमवृद्धौ प्रशास्तुरिदं सूक्तमावापार्थम् ।

युवां नरा पश्यमानास आप्यं प्राचा गव्यंतः पृथुपर्शवो ययुः ।
दासा च वृत्रा हतमार्याणि च सुदासमिंद्रावरुणावसावतं ॥१॥

युवां । नरा । पश्यमानासः । आप्यं । प्राचा । गव्यंतः ।
पृथुऽपर्शवः । ययुः ।

दासा । च । वृत्रा । हतं । आर्याणि । च । सुऽदासं । इंद्रावरुणा ।
अवसा । अवतं ॥ १ ॥

यत्रा नरः समयंते कृतध्वजो यस्मिन्नाजा भवति किं चन प्रियं ।
यत्रा भयंते भुवना स्वर्दृशस्तत्रा न इंद्रावरुणाधि वोचतं ॥२॥

यत्र । नरः । संऽअयंते । कृतऽध्वजः । यस्मिन् । आजा । भवति ।
किं । चन । प्रियं ।

यत्र । भयंते । भुवना । स्वःऽदृशः । तत्र । नः । इंद्रावरुणा । अधि ।
वोचतं ॥ २ ॥

सं भूम्या अंता ध्वसिरा अदृक्षतेंद्रावरुणा दिवि घोष आरुहत् ।
अस्थुर्जनानामुप मामरातयो ऽर्वागवसा हवनश्रुता गतं ॥३॥
सं । भूम्याः । अंताः । ध्वसिराः । अदृक्षत । इंद्रावरुणा । दिवि । घोषः । आ । अरुहत् ।
अस्थुः । जनानां । उप । मां । अरातयः । अर्वाक् । अवसा हवनऽश्रुता । आ । गतं ॥ ३ ॥

इंद्रावरुणा वधनाभिरप्रति भेदं वन्वंता प्र सुदासमावतं ।
ब्रह्माण्येषां शृणुतं हवीमनि सत्या तृत्सूनामभवत्पुरोहितिः ॥४॥
इंद्रावरुणा । वधनाभिः । अप्रति । भेदं । वन्वंता । प्र । सुऽदासं । आवतं ।
ब्रह्माणि । एषां । शृणुतं । हवीमनि । सत्या । तृत्सूनां । अभवत् । पुरःऽहितिः ॥ ४ ॥

इंद्रावरुणावभ्या तपंति माघान्यर्यो वनुषामरातयः ।
युवं हि वस्व उभयस्य राजथोऽध स्मा नोऽवतं पार्ये दिवि ॥ ५ ॥
इंद्रावरुणौ । अभि । आ । तपंति । मा । अघानि । अर्यः । वनुषां । अरातयः ।
युवं । हि । वस्वः । उभयस्य । राजथः । अध । स्म । नः । अवतं । पार्ये । दिवि ॥ ५ ॥

युवा हवंत उभयास आजिष्विंद्रं च वस्वो वरुणं च सातये ।
यत्र राजभिर्दशभिर्निबाधितं प्र सुदासमावतं तृत्सुभिः सह॥६॥

युवां । हवंते । उभयासः । आजिषु । इंद्रं । च । वस्वः । वरुणं ।
च । सातये ।

यत्र । राजऽभिः । दशऽभिः । निऽबाधितं । प्र । सुऽदासं ।
आवतं । तृत्सुऽभिः । सह ॥ ६ ॥

दश राजानः समिता अयज्यवः सुदासमिंद्रावरुणा न युयुधुः ।
सत्या नृणामद्मसदामुपस्तुतिर्देवा एषामभवन्देवहूतिषु ७ ॥

दश । राजानः । संऽइताः । अयज्यवः । सुऽदासं । इंद्रावरुणा । न ।
युयुधुः ।

सत्या । नृणां । अद्मऽसदां । उपऽस्तुतिः । देवाः । एषां ।
अभवन् । देवऽहूतिषु ॥ ७ ॥

दाशराज्ञे परियत्ताय विश्वतः सुदास इंद्रावरुणावशिक्षतं ।
श्वित्यंचो यत्र नमसा कपर्दिनो धिया धीवंतो असपंत
तृत्सवः ॥ ८ ॥

दाशऽराज्ञे । परिऽयत्ताय । विश्वतः । सुऽदासे । इंद्रावरुणौ ।
अशिक्षतं ।

श्वित्यंचः । यत्र । नमसा । कपर्दिनः । धिया । धीऽवंतः । असपंत ।
तृत्सवः ॥ ८ ॥

वृत्राण्यन्यः समिथेषु जिघ्नते व्रतान्यन्यो अभिरक्षते सदा।
हवामहे वां वृषणा सुवृक्तिभिरस्मे इंद्रावरुणा शर्म यच्छतं ॥९॥

वृत्राणि । अन्यः । संऽइथेषु । जिघ्नते । व्रतानि । अन्यः । अभि । रक्षते । सदा ।
हवामहे । वां । वृषणा । सुवृक्तिऽभिः । अस्मे इति । इंद्रावरुणा । शर्म । यच्छतं ॥ ९ ॥

अस्मे इंद्रो वरुणो मित्रो अर्यमा द्युम्नं यच्छंतु महि शर्म सप्रथः।
अवध्रं ज्योतिरदितेर्ऋतावृधो देवस्य श्लोकं सवितुर्मनामहे ॥ १० ॥

अस्मे इति । इंद्रः । वरुणः । मित्रः । अर्यमा । द्युम्नं । यच्छंतु । महि । शर्म । सऽप्रथः ।
अवध्रं । ज्योतिः । अदितेः । ऋतऽवृधः । देवस्य । श्लोकं । सवितुः । मनामहे ॥ १० ॥

'धीरात्वस्ये' त्यष्टर्चं [पंचमेऽनुवाके] षोडशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वरुणदेवत्यम् । आभिप्लविकेषूक्थ्येषु तृतीयसवने स्तोमवृद्धौ प्रशास्तुरिदमावापार्थम् ।

धीरात्वस्य महिना जनूंषि वि यस्तस्तंभ रोदसी चिदुर्वी।
प्र नाकमृष्वं नुनुदे बृहंतं द्विता नक्षत्रं पप्रथच्च भूम ॥ १ ॥

धीरा । तु । अस्य । महिना । जनूंषि । वि । यः । तस्तंभं ।
रोदसी इति । चित् । उर्वी इति ।
प्र । नाकं । ऋष्वं । नुनुदे । बृहंतं । द्विता । नक्षत्रं । पप्रथंत् ।
च । भूमं ॥ १ ॥

उत स्वया तन्वा३ सं वंदे तत्कदा न्वं१ तर्वरुणे भुवानि।
किं मे हव्यमहृणानो जुषेत कदा मृळीकं सुमना अभिख्यं
॥ २ ॥

उत । स्वया । तन्वा । सं । वदे । तत् । कदा । नु । अंतः ।
वरुणे । भुवानि ।
किं । मे । हव्यं । अहृणानः । जुषेत । कदा । मृळीकं । सुऽमनाः ।
अभि । ख्यं ॥ २ ॥

पृच्छे तदेनो वरुण दिदृक्षूपो एमि चिकितुषो विपृच्छं ।
समानमिन्मे कवयश्चिदाहुरयं ह तुभ्यं वरुणो हृणीते ॥ ३ ॥

पृच्छे । तत् । एनः । वरुण । दिदृक्षु । उपो इति । एमि । चिकितुषः ।
विऽपृच्छं ।
समानं । इत् । मे । कवयः । चित् । आहुः । अयं । ह । तुभ्यं ।
वरुणः । हृणीते ॥ ३ ॥

किमाग आस वरुण ज्येष्ठं यत्स्तोतारं जिघांससि सखायं ।
प्र तन्मे वोचो दूळभ स्वधावोऽव त्वानेना नमसा तुर इयां ॥४॥

किं । आगः । आस । वरुण । ज्येष्ठं । यत् । स्तोतारं । जिघांससि ।
सखायं ।
प्र । तत् । मे । वोचः । दुःऽदभ । स्वधाऽवः । अव । त्वा ।
अनेनाः । नमसा । तुरः । इयां ॥ ४ ॥

अव द्रुग्धानि पित्र्या सृजा नोऽव या वयं चकृमा तनूभिः ।
अव राजन्पशुतृपं न तायुं सृजा वत्सं न दाम्नो वसिष्ठं ॥५॥

अव । द्रुग्धानि । पित्र्या । सृज । नः । अव । या । वयं । चकृम ।
तनूभिः ।
अव । राजन् । पशुऽतृपं । न । तायुं । सृज । वत्सं । न । दाम्नः ।
वसिष्ठं ॥ ५ ॥

न स स्वो दक्षो वरुण ध्रुतिः सा सुरा मन्युर्विभीदको अचित्तिः ।
अस्ति ज्यायान्कनीयस उपारे स्वप्नश्चनेदनृतस्य प्रयोता ॥६॥

न । सः । स्वः । दक्षः । वरुण । ध्रुतिः । सा । सुरा । मन्युः ।
विऽभीदकः । अचित्तिः ।
अस्ति । ज्यायान् । कनीयसः । उपऽअरे । स्वप्नः । चन । इत् ।
अनृतस्य । प्रऽयोता ॥ ६ ॥

अरं दासो न मीळ्हुषे कराण्यहं देवाय भूर्णयेऽनागाः ।
अचेतयदचितो देवो अर्यो गृत्सं राये कवितरो जुनाति ॥७॥

अरं । दासः । न । मीळ्हुषे । कराणि । अहं । देवाय । भूर्णये । अनागाः ।
अचेतयत् । अचितः । देवः । अर्यः । गृत्सं । राये । कविऽतरः । जुनाति ॥ ७ ॥

एकादशिने वारुणे पशावयमिति पुरोडाशस्यानुवाक्या ॥

अयं सु तुभ्यं वरुण स्वधावो हृदि स्तोम उपश्रितश्चिदस्तु ।
शं नः क्षेमे शमु योगे नो अस्तु यूयं पात स्वस्तिभिः सदा नः ॥ ८ ॥

अयं । सु । तुभ्यं । वरुण । स्वधाऽवः । हृदि । स्तोमः । उपऽश्रितः चित् । अस्तु ।
शं । नः । क्षेमे । शं । ऊं इति । योगे । नः । अस्तु । यूयं पात । स्वस्तिऽभिः । सदा । नः ॥ ८ ॥

प्र शुंध्युवमिति सप्तर्चं [पंचमेऽनुवाके] अष्टादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वारुणम् । गतो विनियोगः ॥

प्र शुंध्युवं वरुणाय प्रेष्ठां मतिं वसिष्ठ मीळ्हुषे भरस्व ।
य ईमर्वाचं करते यजत्रं सहस्रामघं वृषणं बृहंतं ॥ १ ॥

प्र । शुन्ध्युवं । वरुणाय । प्रेष्ठां । मतिं । वसिष्ठ । मीळ्हुषे । भरस्व ।
यः । ईं । अर्वाञ्चं । करते । यजत्रं । सहस्रऽमघं । वृषणं । बृहंतं ॥ १ ॥

अधान्वस्य संदृशं जगन्वानग्नेरनीकं वरुणस्य मंसि ।
स्व १ र्यदश्मन्नधिपा उ अंधोऽभि मा वपुर्दृशये निनीयात् ॥ २ ॥

अध । नु । अस्य । संऽदृशं । जगन्वान् । अग्नेः । अनीकं ।
वरुणस्य । मंसि ।
स्वः । यत् । अश्मन् । अधिऽपाः । ऊं इति । अंधः । अभि । मा ।
वपुः । दृशये । निनीयात् ॥ २ ॥

आ यद्रुहाव वरुणश्च नावं प्र यत्समुद्रमीरयाव मध्यं ।
अधि यदपां स्नुभिश्चराव प्र प्रेंख ईंखयावहै शुभे कं ॥ ३ ॥

आ । यत् । रुहाव । वरुणः । च । नावं । प्र । यत् । समुद्रं ।
ईरयाव । मध्यं ।
अधि । यत् । अपां । स्नुऽभिः । चराव । प्र । प्रऽईंखे । ईंखयावहै ।
शुभे । कं ॥ ३ ॥

वसिष्ठं ह वरुणो नाव्याधादृषिं चकार स्वपा महोभिः ।
स्तोतारं विप्रः सुदिनत्वे अह्नां यान्नु द्यावस्ततनन्यादुषासः
॥ ४ ॥

वसिष्ठं । ह । वरुणः । नावि । आ । अधात् । ऋषिं । चकार ।
सुऽअपाः । महःऽभिः ।

स्तोतारं । विप्रः । सुदिनऽत्वे । अह्नां । यात् । नु । द्यावः ।
ततनन् । यात् । उषसः ॥ ४ ॥

क्व१ त्यानि नौ सख्या बभूवुः सचावहे यदवृकं पुराचित् ।
बृहंतं मानं वरुण स्वधावः सहस्रद्वारं जगमा गृहं ते ॥ ५ ॥

क्व । त्यानि । नौ । सख्या । बभूवुः । सचावहे इति । यत् ।
अवृकं । पुरा । चित् ।

बृहंतं । मानं । वरुण । स्वधाऽवः । सहस्रऽद्वारं । जगम । गृहं ।
ते ॥ ५ ॥

य आपिर्नित्यो वरुण प्रियः सन्त्वामागांसि कृणवत्सखा ते ।
मा त एनस्वंतो यक्षिन्भुजेम यंधि ष्मा विप्रः स्तुवते वरूथं
॥ ६ ॥

यः । आपिः । नित्यः । वरुण । प्रियः । सन् । त्वां । आगांसि ।
कृणवत् । सखा । ते ।
मा । ते । एनस्वंतः । यक्षिन् । भुजेम । यंधि । स्म । विप्रः ।
स्तुवते । वरूथं ॥ ६ ॥

अत्र ऋग्विधानं । ध्रुवासु त्वासु क्षितिषु जपन् बंधात् प्रमुच्यते ।
तिष्ठन्रात्री जपेदेतां पिशाचस्तं न गच्छति ॥

ध्रुवासु त्वासु क्षितिषु क्षियंतो व्य१स्मत्पाशं वरुणो
मुमोचत् ।
अवो वन्वाना अदितेरुपस्थाद्यूयं पात स्वस्तिभिः सदा नः
॥ ७ ॥

ध्रुवासु । त्वा । आसु । क्षितिषु । क्षियंतः । वि । अस्मत् । पाशं ।
वरुणः । मुमोचत् ।
अवः । वन्वानाः । अदितेः । उपऽस्थात् । यूयं । पात । स्वस्तिऽभिः ।
सदा । नः ॥ ७ ॥

यत्स्थ इति षळृचं [द्वितीयेऽनुवाके] पंचमं सूक्तं कण्वपुत्रस्य प्रगाथस्यार्षं माश्विनम् । आद्या बृहती । द्वितीया मध्येज्योतिस्त्रिष्टुप् । तृतीयाऽनुष्टुप् । चतुर्थ्यास्तारपंक्तिः । पंचमी बृहती षष्ठी सतोबृहती । प्रातरनुवाकाश्विने क्रतौ बार्हते छंदस्याश्विनशस्त्रे चेदं सूक्तम् ।

यत्स्थो दीर्घप्रसद्मनि यद्वादो रोचने दिवः ।
यद्वा समुद्रे अध्याकृते गृहेऽत आ यातमश्विना ॥ १ ॥

यत् । स्थः । दीर्घऽप्र॑सद्मनि । यत् । वा । अदः । रोचने । दिवः ।
यत् । वा । समुद्रे । अधि । आऽकृ॑ते । गृहे । अतः । आ । यातं ।
अश्विना ॥ १ ॥

यद्वा यज्ञं मनवे संमिमिक्षथुरेवेत्काणवस्य बोधतं ।
बृहस्पतिं विश्वान्देवाँ अहं हुव इंद्राविष्णू अश्विनावाशुहेषसा ॥ २ ॥

यत् । वा । यज्ञं । मनवे । संऽमिमिक्षथुः । एव । इत् । काणवस्य ।
बोधतं । बृहस्पतिं । विश्वान् । देवान् । अहं । हुवे । इंद्राविष्णू इति ।
अश्विनौ । आशुऽहेषसा ॥ २ ॥

त्या न्व१श्विना हुवे सुदंससा गृभे कृता ।
ययोरस्ति प्र णः सख्यं देवेष्वध्याप्यं ॥ ३ ॥

त्या । नु । अश्विना । हुवे । सुऽदंससा । गृभे । कृता । ययोः ।
अस्ति । प्र । नः । सख्यं । देवेषु । अधि । आप्यं ॥ ३ ॥

ययोरधि प्र यज्ञा असूरे संति सूरयः ।
ता यज्ञस्याध्वरस्य प्रचेतसा स्वधाभिर्या पिबतः सोम्यं मधु ॥ ४ ॥

ययोः । अधि । प्र । यज्ञाः । असूरे । संति । सूरयः ।
ता । यज्ञस्य । अध्वरस्य । प्रऽचेतसा । स्वधाभिः । या । पिबतः ।
सोम्यं । मधु ॥ ४ ॥

यदद्याश्विनावपाग्यत्प्राक्स्थो वाजिनीवसू ।

यद्द्रुह्यव्यनवि तुर्वशे यदौ हुवे वामथ मा गतं ॥ ५ ॥

यत् । अद्य । अश्विनौ । अपाक् । यत् । प्राक् । स्थः ।

वाजिनीवसू इति वाजिनीऽवसू ।

यत् । द्रुह्यवि । अनवि । तुर्वशे । यदौ । हुवे । वां । अथ । मा ।

आ । गतं ॥ ५ ॥

यदंतरिक्षे पतथः पुरुभुजा यद्वेमे रोदसी अनु ।

यद्वा स्वधाभिरधितिष्ठथो रथमत आ यातमश्विना ॥ ६ ॥

यत् । अंतरिक्षे । पतथः । पुरुऽभुजा । यत् । वा । इमे इति । रोदसी

इति । अनु ।

यत् । वा । स्वधाभिः । अधिऽतिष्ठथः । रथं । अतः । आ । यातं ।

अश्विना ॥ ६ ॥

उपास्मा इति नवर्चं [प्रथमेऽनुवाके] एकादशं सूक्तम् । असितो देवल ऋषिः । तौ च कश्यपगोत्रजा । गायत्रं छंदः । सोमःपवमानो देवता । प्रातस्तोत्रेऽस्यैदसूक्तस्य प्रागुत्तमाया इदमादिकं सर्वं पावमानं विकल्पेना· वंपनीयं ॥ अभिष्टवे धर्मदुघावत्सेऽपनीयमाने नमस्ते इत्येषा ।

उपास्मै गायता नरः पवमानायेंदवे । अभि देवाँ इयक्षते ॥१॥

उप । अस्मै । गायत । नरः । पवमानाय । इंदवे । अभि । देवान् ।

इयक्षते ॥ १ ॥

अभि ते मधुना पयोऽथर्वाणो अशिश्रयुः । देवं देवाय देवयु ॥२॥

अभि । ते । मधुना । पर्यः । अर्थर्वाणः । अशिश्रयुः । देवं । देवार्य ।
देवऽयु ॥ २ ॥

स नः पवस्व शं गवे शं जनाय मर्वते । शं राजन्नोषधीभ्यः
॥ ३ ॥

सः । नः । पवस्व । शं । गवे । शं । जनाय । शं । अर्वते । शं ।
राजन् । ओषधीभ्यः ॥३॥

बभ्रवे नु स्वतवसेऽरुणाय दिविस्पृशे । सोमाय गाथमर्चत ॥४॥

बभ्रवे । नु । स्वऽतवसे । अरुणाय । दिविऽस्पृशे । सोमाय । गाथं ।
अर्चत ॥ ४ ॥

हस्तच्युतभिरद्रिभिः सुतं सोमं पुनीतन । मधावा धावता मधु
॥ ५ ॥

हस्तऽच्युतेभिः । अद्रिऽभिः । सुतं । सोमं । पुनीतन । मधौ । आ ।
धावत । मधु ॥ ५ ॥

नमसेदुप सीदत दध्नेदभि श्रीणीतन । इंदुमिंद्रे दधातन ॥६॥

नमसा । इत् । उप । सीदत । दध्ना । इत् । अभि । श्रीणीतन ।
इंदुं । इंद्रे । दधातन ॥ ६ ॥

अमित्रहा विचर्षणिः पवस्व सोम शं गवे । देवेभ्यो

अमित्रऽहा । विऽचर्षणिः । पवस्व । सोम । शं । गवे । देवेभ्यः ।
अनुत्तमऽकृत् ॥ ७ ॥

इंद्राय सोम पातवे मदाय परि षिच्यसे । मनश्चिन्मनसस्पतिः ॥ ८ ॥

इंद्राय । सोम । पातवे । मदाय । परि । सिच्यसे । मनःऽचित् ।
मनसः । पतिः ॥ ८ ॥

पवमान सुवीर्यं रयिं सोम रिरीहि नः । इंदविंद्रेण नो युजा ॥ ९ ॥

पवमान । सुऽवीर्यं । रयिं । सोम । रिरीहि । नः । इंदो इति ।
इंद्रेण । नः । युजा ॥ ९ ॥

परेयिवांसमिति षोडशर्चं चतुर्दशं सूक्तं विवस्वतः पुत्रस्य यमस्यार्षं । अंगिरसो नः पितरो नवग्वा इति षष्ठ्या अंगिरः पित्रथर्वभृगुलक्षणा लिंगोक्ता देवताः । प्रेहीत्याद्यास्तिस्रो लिंगोक्तदेवताकाः पितृदेवताका वा । अतिद्रवसारमेयावित्यादिकस्तृचः सरमापुत्रौ यौ श्वानौ परलोकमार्गमभितः स्थितौ तद्देवताकः । शिष्टा यमदेवत्याः । यमाय सोममिति त्रयोदश्याद्या अनुष्टुभः । यमाय मधुमत्तममित्येषा बृहती । आदितो द्वादश त्रिष्टुभः । प्रातरनुवाकाश्विनशस्त्रयोरुक्तः सूक्तविनियोगः । महापितृयज्ञे यमयागाख्या याज्या ।

परेयिवांसं प्रवतो महीरनु बहुभ्यः पंथामनुपस्पशानं ।
वैवस्वतं संगमनं जनानां यमं राजानं हविषा दुवस्य ॥ १ ॥

परेयिऽवांसं । प्रऽवतः । महीः । अनु । बहुऽभ्यः । पंथां ।
अनुऽपस्पशानं ।
वैवस्वतं । संऽगमनं । जनानां । यमं । राजानं । हविषा ।
दुवस्य ॥ १ ॥

यमो नो गातुं प्रथमो विवेद नैषा गव्यूतिरपभर्तवा उं ।
यत्रा नः पूर्वे पितरः परेयुरेना जज्ञानाः पथ्या३ अनु स्वाः ॥२॥

यमः । नः । गातुं । प्रथमः । विवेद । न । एषा । गव्यूतिः ।
अपऽभर्तवै । उं इति ।
यत्र । नः । पूर्वे । पितरः । पराऽईयुः । एना । जज्ञानाः । पथ्याः ।
अनु । स्वाः ॥ २ ॥

आग्निमारुते मातली कव्यैरित्येषा धाय्या ।

मातली कव्यैर्यमो अंगिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः ।
यांश्च देवा वावृधुर्ये च देवान्त्स्वाहान्ये स्वधयान्ये मदंति ॥३॥

मातली । कव्यैः । यमः । अंगिरःऽभिः । बृहस्पतिः । ऋक्वऽभिः ।
ववृधानः ।
यान् । च । देवाः । ववृधुः । ये । च । देवान् । स्वाहा । अन्ये ।
स्वधया । अन्ये । मदंति ॥ ३ ॥

महापितृयज्ञे ...म यमेत्यादिके द्वे अनुवाक्ये । सप्ताग्निमारुतेऽपि धाय्या ।

इमं यम प्रस्तरमा हि सीदांगिंरोभिः पितृभिः संविदानः ।
आ त्वा मंत्राः कविशस्ता वहंत्वेना राजन्हविषा मादयस्व ॥४॥

इमं । यम । प्रऽस्तरं । आ । हि । सीदं । अंगिरःऽभिः । पितृऽभिः ।
संऽविदानः ।
आ । त्वा । मंत्राः । कविऽशस्ताः । वहंतु । एना । राजन् ।
हविषा । मादयस्व ॥ ४ ॥

अंगिरोभिरा गंहि यज्ञियेभिर्यमं वैरूपैरिह मादयस्व ।
विवस्वंतं हुवे यः पिता तेऽस्मिन्यज्ञे बर्हिष्या निषद्यं ॥ ५ ॥

अंगिरःऽभिः । आ । गहि । यज्ञियेभिः । यम । वैरूपैः । इह ।
मादयस्व ।
विवस्वंतं । हुवे । यः । पिता । ते । अस्मिन् । यज्ञे । बर्हिषि ।
आ । निऽसद्यं ॥ ५ ॥

अंगिरसो नः पितरो नवंग्वा अथर्वाणो भृगवः सोम्यासः ।
तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥ ६ ॥

अंगिरसः । नः । पितरः । नवंऽग्वाः । अथर्वाणः भृगवः ।
सोम्यासः ।
तेषां । वयं । सुऽमतौ । यज्ञियानां । अपि । भद्रे । सौमनसे ।
स्याम ॥ ६ ॥

सत्रमध्ये दीक्षितस्य मरणे प्रेहीत्याद्याः पंचर्चस्तृतीयावर्जिता होत्रा शंसनीयाः ।

प्रेहि प्रेहि पथिभिः पूर्व्येभिर्यत्रा नः पूर्वे पितरः परेयुः ।
उभा राजाना स्वधया मदन्ता यमं पश्यासि वरुणं च देवं ॥ ७ ॥

प्र । इहि । प्र । इहि । पथिऽभिः । पूर्व्येभिः । यत्र । नः । पूर्वे । पितरः । पराऽईयुः ।
उभा । राजाना । स्वधया । मदन्ता । यमं । पश्यासि । वरुणं । च । देवं ॥ ७ ॥

सं गच्छस्व पितृभिः सं यमेनेष्टापूर्तेन परमे व्योमन् ।
हित्वायावद्यं पुनरस्तमेहि सं गच्छस्व तन्वा सुवर्चाः ॥८॥

सं । गच्छस्व । पितृऽभिः । सं । यमेन । इष्टापूर्तेन । परमे । विऽओमन् ।
हित्वाय । अवद्यं । पुनः । अस्तं । आ । इहि । सं । गच्छस्व । तन्वा । सुऽवर्चाः ॥ ८ ॥

पैतृमेधिके कर्मणि श्मशानायतनं प्रोक्षत्यपेत वीतेति ।

अपेत वीत वि च सर्पतातोऽस्मा एतं पितरो लोकमक्रन् ।
अहोभिरद्भिरक्तुभिर्व्यक्तं यमो ददात्यवसानमस्मै ॥ ९ ॥

अर्प । इत । वि । इत । वि । च । सर्पत । अतः । अस्मै । एतं । पितरः । लोकं । अक्रन् ।

अहःऽभिः । अत्ऽभिः । अक्तुऽभिः । विऽअक्तं । यमः । ददाति । अवऽसानं । अस्मै ॥ ९ ॥

अनुस्तरण्या वृक्कौ पार्श्वयोराम्रफलाकृती । तावुद्धृत्य प्रेतस्य हस्तयोर्निदधात्यति द्रव सारमेयाविति द्वाभ्यां ।

अति द्रव सारमेयौ श्वानौ चतुरक्षौ शबलौ साधुना पथा ।
अथा पितॄन्त्सुविदत्राँ उपेहि यमेन ये सधमादं मदंति ॥१०॥

अति । द्रव । सारमेयौ । श्वानौ । चतुःऽअक्षौ । शबलौ । साधुना । पथा ।

अथ । पितॄन् । सुऽविदत्रान् । उप । इहि । यमेन । ये । सधऽमादं । मदंति ॥ १० ॥

यौ ते श्वानौ यम रक्षितारौ चतुरक्षौ पथिरक्षी नृचक्षसौ ।
ताभ्यामेनं परि देहि राजन्त्स्वस्ति चास्मा अनमीवं च धेहि ॥११॥

यौ । ते । श्वानौ । यम । रक्षितारौ । चतुःऽअक्षौ । पथिरक्षी इति पथिऽरक्षी । नृऽचक्षसौ ।

ताभ्यां । एनं । परि । देहि । राजन् । स्वस्ति । च । अस्मै । अनमीवं । च । धेहि ॥ ११ ॥

उरूणसावसुतृपा उदुंबलौ यमस्य दूतौ चरतो जनाँ अनु ।
तावस्मभ्यं दृशये सूर्याय पुनर्दातामसुमद्येह भद्रं ॥ १२ ॥

उरुऽनसौ । असुऽतृपौ । उदुंबलौ । यमस्य । दूतौ । चरतः । जनान् ।
अनु ।
तौ । अस्मभ्यं । दृशये । सूर्याय । पुनः । दातां । असुं । अद्य ।
इह । भद्रं ॥ १२ ॥

यमाय सोमं सुनुत यमाय जुहुता हविः ।
यमं ह यज्ञो गच्छत्यग्निदूतो अरंकृतः ॥१३॥

यमाय । सोमं । सुनुत । यमाय । जुहुत । हविः ।
यमं । ह । यज्ञः । गच्छति । अग्निऽदूतः अरंऽकृतः ॥ १३ ॥

यमाय घृतवद्धविर्जुहोत प्र च तिष्ठत ।
स नो देवेष्वा यमद्दीर्घमायुः प्र जीवसे ॥ १४ ॥

यमाय । घृतऽवत् । हविः । जुहोत । प्र । च । तिष्ठत ।
सः । नः । देवेषु । आ । यमत् । दीर्घं । आयुः । प्र । जीवसे ॥ १४ ॥

यमाय मधुमत्तमं राज्ञे हव्यं जुहोतन ।
इदं नम ऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यः ॥ १५ ॥

यमाय । मधुमत्ऽतमं । राज्ञे । हव्यं । जुहोतन । इदं । नमः । ऋषिऽभ्यः । पूर्वऽजेभ्यः । पूर्वेभ्यः । पथिकृत्ऽभ्यः ॥ १५ ॥

त्रिकद्रुकेभिः पतति षळुर्वीरेकमिद्बृहत् ।
त्रिष्टुब्गायत्री छंदांसि सर्वा ता यम आहिता ॥ १६ ॥

त्रिऽकद्रुकेभिः । पतति । षट् । उर्वीः । एकं । इत् । बृहत् । त्रिऽस्तुप् । गायत्री । छंदांसि । सर्वा । ता । यमे । आऽहिता ॥ १६ ॥

प्रावेपा इति चतुर्दशर्चं [तृतीयेऽनुवाके] पंचमं सूक्तमैलूषस्य कवषस्यार्षं मुजवतः पुत्रस्याक्षाख्यस्य वा । सप्तमी जगती शिष्टास्त्रयोदश त्रिष्टुभः । अत्र द्वादश्यक्षान् स्तौति नवम्याद्या च सप्तमी । अतस्ता-स्तद्देवत्याः । त्रयोदशी कृषिं स्तौति । अतस्तस्याः सा देवता । एवं पंच गताः । शिष्टाभिर्नवभिः कितवोऽक्षश्च निंद्यन्ते अतस्ता अपि तद्देवत्याः ॥

प्रावेपा मा बृहतो मादयंति प्रवातेजा इरिणे वर्वृतानाः ।
सोमस्येव मौजवतस्य भक्षो विभीदको जागृविर्मह्यमच्छान् ॥ १ ॥

प्रावेपाः । मा । बृहतः । मादयंति । प्रवातेऽजाः । इरिणे । वर्वृतानाः । सोमस्यऽइव । मौजऽवतस्य । भक्षः । विऽभीदकः । जागृविः । मह्यं । अच्छान् ॥ १ ॥

न मा मिमेथ न जिहीळ एषा शिवा सखिभ्य उत मह्यमासीत् ।
अक्षस्याहमेकपरस्य हेतोरनुव्रतामप जायामरोधं ॥ २ ॥

न । मा । मिमेथ । न । जिहीळे । एषा । शिवा । सखिऽभ्यः ।
उत । मह्यं । आसीत् ।
अक्षस्य । अहं । एकऽपरस्य । हेतोः । अनुऽव्रतां । अप । जायां ।
अरोधं ॥ २ ॥

द्वेष्टि श्वश्रूरप जाया रुणद्धि न नाथितो विंदते मर्डितारं ।
अश्वस्येव जरतो वस्न्यस्य नाहं विंदामि कितवस्य भोगं ॥३॥

द्वेष्टि । श्वश्रूः । अप । जाया । रुणद्धि । न । नाथितः । विंदते ।
मर्डितारं ।
अश्वस्यऽइव । जरतः । वस्न्यस्य । न । अहं । विंदामि । कितवस्य ।
भोगं ॥ ३ ॥

अन्ये जायां परि मृशंत्यस्य यस्यागृधद्वेदने वाज्य१क्षः ।
पिता माता भ्रातर एनमाहुर्न जानीमो नयता बद्धमेतं ॥४॥

अन्ये । जायां । परि । मृशंति । अस्य । यस्य । अगृधत् । वेदने ।
वाजी । अक्षः ।
पिता । माता । भ्रातरः । एनं । आहुः । न । जानीमः । नयत ।
बद्धं । एतं ॥ ४ ॥

यदादीध्ये न दविषाण्येभिः परायद्भ्योऽव हीये सखिभ्यः ।
न्युप्ताश्च बभ्रवो वाचमक्रतँ एमीदेषां निष्कृतं जारिणीव ॥५॥

यत् । आऽदीध्ये । न । दविषाणि । एभिः । पराऽयत्ऽभ्यः । अव ।
हीये । सखिऽभ्यः ।
निऽउप्ताः । च । बभ्रवः । वाचं । अक्रत । एमि । इत् । एषां ।
निःऽकृतं । जारिणीऽइव ॥ ५ ॥

सभामेति कितवः पृच्छमानो जेष्यामीति तन्वा३ शूशुजानः ।
अक्षासो अस्य वि तिरंति कामं प्रतिदीव्ने दधत आ कृतानि ॥६॥

सभां । एति । कितवः । पृच्छमानः । जेष्यामि । इति । तन्वा ।
शूशुजानः ।
अक्षासः । अस्य । वि । तिरंति । कामं । प्रतिऽदीव्ने । दधतः ।
आ । कृतानि ॥ ६ ॥

अक्षास इदंकुशिनो नितोदिनो निकृत्वानस्तपनास्तापयिष्णवः ।
कुमारदेष्णा जयतः पुनर्हणो मध्वा संपृक्ताः कितवस्य
बर्हणा ॥ ७ ॥

अक्षासः । इत् । अंकुशिनः । निऽतोदिनः । निऽकृत्वानः ।
तपनाः । तापयिष्णवः ।
कुमारऽदेष्णाः । जयतः । पुनःऽहनः । मध्वा । संऽपृक्ताः ।
कितवस्य । बर्हणा ॥ ७ ॥

त्रिपंचाशः क्रीळति व्रात एषां देव इव सविता सत्यधर्मा ।
उग्रस्य चिन्मन्यवे ना नमंते राजा चिदेभ्यो नम इत्कृणोति॥८॥

त्रिऽपंचाशः । क्रीळति । व्रातः । एषां । देवःऽइव । सविता । सत्यऽधर्मा ।
उग्रस्य । चित् । मन्यवे । न । नमंते । राजा । चित् । एभ्यः । नमः । इत् । कृणोति ॥ ८ ॥

नीचा वर्तंत उपरि स्फुरंत्यहस्तासो हस्तवंतं सहंते ।
दिव्या अंगारा इरिणे न्युप्ताः शीताः संतो हृदयं निर्दहंति॥९॥

नीचा । वर्तंते । उपरि । स्फुरंति । अहस्तासः । हस्तऽवंतं । सहंते ।
दिव्याः । अंगाराः । इरिणे । निऽउप्ताः । शीताः । संतः । हृदयं । निः । दहंति ॥ ९ ॥

जाया तप्यते कितवस्य हीना माता पुत्रस्य चरतः क्व स्वित् ।
ऋणावा बिभ्यद्धनमिच्छमानोऽन्येषामस्तमुप नक्तमेति ॥१०॥

जाया । तप्यते । कितवस्य । हीना । माता । पुत्रस्य । चरतः । क्व । स्वित् ।
ऋणऽवा । बिभ्यत् । धनं । इच्छमानः । अन्येषां । अस्तं । उप । नक्तं । एति ॥ १० ॥

स्त्रियं दृष्ट्वाय कितवं ततापान्येषां जायां सुकृतं च योनिं।
पूर्वाण्हे अश्वान्युयुजे हि बभ्रून्त्सो अग्नेरंते वृषलः पपाद॥११॥

स्त्रियं। दृष्ट्वाय। कितवं। तताप। अन्येषां। जायां। सुऽकृतं।
च। योनिं।
पूर्वाण्हे। अश्वान्। युयुजे। हि। बभ्रून्। सः। अग्नेः। अंते।
वृषलः। पपाद॥ ११॥

यो वः सेनानीर्महतो गणस्य राजा व्रातस्य प्रथमो बभूव।
तस्मै कृणोमि न धना रुणध्मि दशाहं प्राचीस्तदृतं वदामि॥१२॥

यः। वः। सेनाऽनीः। महतः। गणस्य। राजा। व्रातस्य।
प्रथमः। बभूव।
तस्मै। कृणोमि। न। धना। रुणध्मि। दश। अहं। प्राचीः।
तत्। ऋतं। वदामि॥ १२॥

अक्षैर्मा दीव्यः कृषिमित्कृषस्व वित्ते रमस्व बहु मन्यमानः।
तत्र गावः कितव तत्र जाया तन्मे वि चष्टे सवितायमर्यः॥१३॥

अक्षैः। मा। दीव्यः। कृषिं। इत्। कृषस्व। वित्ते। रमस्व।
बहु। मन्यमानः।
तत्र। गावः। कितव। तत्र। जाया। तत्। मे। वि। चष्टे।
सविता। अयं। अर्यः॥ १३॥

मित्रं कृणुध्वं खलुं मृळतां नो मा नो घोरेण चरताभि धृष्णु।
नि वो नु मन्युर्विशतामरातिरन्यो बभ्रूणां प्रसितौ न्वस्तु ॥१४॥

मित्रं। कृणुध्वं। खलुं। मृळतं। नः। मा। नः। घोरेणं। चरत।
अभि। धृष्णु।
नि। वः। नु। मन्युः। विशतां। अरातिः। अन्यः। बभ्रूणां।
प्रऽसितौ। नु। अस्तु॥ १४॥

प्र सुव इति नवर्चं [षष्ठेऽनुवाके] सप्तमं सूक्तम्। प्रियमेधपुत्रस्य सिंधुक्षित आर्षं जागतं नदीदेवताकम्। अग्निष्टोमे मरुत्वतीयशस्त्र इदं सूक्तं निविद्धानम्। सौमिकचातुर्मास्येषु वैश्वदेवेऽप्येतन्मरुत्वतीयं निविद्धानम्। महाव्रतेऽपि निष्केवल्य एतत्सूक्तम्॥

प्र सु वं आपो महिमानंमुत्तमं कारुर्वोचाति सदने विवस्वतः।
प्र सप्तसप्त त्रेधा हि चंक्रमुः प्र सृत्वरीणामति सिंधुरोजसा॥१॥

प्र। सु। वः। आपः। महिमानं। उत्ऽतमं। कारुः। वोचाति।
सदने। विवस्वतः।
प्र। सप्तऽसप्त। त्रेधा। हि। चक्रमुः। प्र। सृत्वरीणां। अति।
सिंधुः। ओजसा॥ १॥

प्र तेऽरदद्वरुणो यातवे पथः सिंधो यद्वाजाँ अभ्यद्रवस्त्वं।
भूम्या अधि प्रवता यासि सानुना यद[illegible] जगतामिरज्यसि
॥ २॥

प्र । ते । अरदत् । वरुणः । यातवे । पथः । सिंधो इति । यत् । वाजान् । अभि । अद्रवः । त्वं ।
भूम्याः । अधि । प्रऽवता । यासि । सानुना । यत् । एषां । अग्रं । जगतां । इरज्यसि ॥ २ ॥

दिवि स्वनो यतते भूम्योपर्यनंतं शुष्ममुदियर्ति भानुना ।
अभ्रादिव प्र स्तनयंति वृष्टयः सिंधुर्यदेति वृषभो न रोरुवत् ॥ ३ ॥

दिवि । स्वनः । यतते । भूम्यां । उपरि । अनंतं । शुष्मं । उत् । इयर्ति । भानुना ।
अभ्रात्ऽइव । प्र । स्तनयंति । वृष्टयः । सिंधुः । यत् । एति । वृषभः । न । रोरुवत् ॥ ३ ॥

अभि त्वा सिंधो शिशुमिन्न मातरो वाश्रा अर्षंति पयसेव धेनवः ।
राजेव युध्वा नयसि त्वमित्सिचौ यदासामग्रं प्रवतामिनक्षसि ॥ ४ ॥

अभि । त्वा । सिंधो इति । शिशुं । इत् । न । मातरः । वाश्राः । अर्षंति । पयसाऽइव । धेनवः ।
राजाऽइव । युध्वा । नयसि । त्वं । इत् । सिचौ । यत् । आसां । अग्रं । प्रऽवतां । इनक्षसि ॥ ४ ॥

इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या ।
असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया॥५॥

इमं । मे । गंगे । यमुने । सरस्वति । शुतुद्रि । स्तोमं । सचत ।
परुष्णि । आ ।
असिक्न्या । मरुत्ऽवृधे । वितस्तया । आर्जीकीये । शृणुहि । आ ।
सुऽसोमया ॥५॥

तृष्टामया प्रथमं यातवे सजूः सुसर्त्वा रसया श्वेत्या त्या ।
त्वं सिंधो कुभया गोमतीं क्रुमुं मेहत्न्वा सरथं याभिरीयसे ॥६॥

तृष्टऽअमया । प्रथमं । यातवे । सऽजूः । सुऽसर्त्वा । रसया ।
श्वेत्या । त्या ।
त्वं । सिंधो इति । कुभया । गोऽमतीं । क्रुमुं । मेहत्न्वा । सऽरथं ।
याभिः । ईयसे ॥ ६ ॥

ऋजीत्येनी रुशती महित्वा परि ज्रयांसि भरते रजांसि ।
अदब्धा सिंधुरपसामपस्तमाश्वा न चित्रा वपुषीव दर्शता॥७॥

ऋजीती । एनी । रुशती । महीऽत्वा । परि । ज्रयांसि । भरते ।
रजांसि ।
अदब्धा । सिंधुः । अपसां । अपःऽतमा । अश्वा । न । चित्रा ।
वपुषीऽइव । दर्शता ॥ ७ ॥

स्वश्वा सिंधुः सुरथा सुवासा हिरण्ययी सुकृता वाजिनीवती।
ऊर्णावती युवतिः सीलमावत्युताधि वस्ते सुभगा मधुवृधं ॥८॥

सुऽअश्वा। सिंधुः। सुऽरथा। सुऽवासाः। हिरण्ययी। सुऽकृता। वाजिनीऽवती।
ऊर्णाऽवती। युवतिः। सीलमाऽवती। उत। अधि। वस्ते। सुऽभगा। मधुऽवृधं ॥ ८ ॥

सुखं रथं युयुजे सिंधुरश्विनं तेन वाजं सनिषदस्मिन्नाजौ।
महान्ह्यस्य महिमा पनस्यतेऽदब्धस्य स्वयशसो विरप्शिनः ॥९॥

सुऽखं। रथं। युयुजे। सिंधुः। अश्विनं। तेन। वाजं। सनिषत्। अस्मिन्। आजौ।
महान्। हि। अस्य। महिमा। पनस्यते। अदब्धस्य। स्वऽयशसः। विऽरप्शिनः ॥ ९ ॥

चक्षुष इति सप्तर्चं [षष्ठेऽनुवाके] चतुर्दशं सूक्तं भुवनपुत्रस्य विश्वकर्मण आर्षं त्रैष्टुभं विश्वकर्मदैवत्यम्।

चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नम्नमाने।
यदेदन्ता अददृहंत पूर्व आदिद्द्यावापृथिवी अप्रथेतां ॥ १ ॥

चक्षुषः। पिता। मनसा। हि। धीरः। घृतं। एने इति। अजनत्।
नम्नमाने इति।

यदा। इत्। अंताः। अदृहंत। पूर्वे। आत्। इत्। द्यावापृथिवी इति।
अप्रथेतां ॥ १ ॥

वैश्वकर्मणस्य पशो हविषः एषानुवाक्या।

विश्वकर्मा विमना आद्विहाया धाता विधाता परमोत संदृक्।
तेषामिष्टानि समिषा मदंति यत्रा सप्तऋषीन्पर एकमाहुः ॥ २ ॥

विश्वऽकर्मा। विऽमनाः। आत्। विऽहायाः। धाता। विऽधाता।
परमा। उत। संऽदृक्।

तेषां। इष्टानि। सं। इषा। मदंति। यत्र। सप्तऽऋषीन्। परः।
एकं। आहुः ॥ २ ॥

पूर्वोक्त एव पशौ पुरोडाशस्य यो नः पितेत्येषा याज्या।

यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा।
यो देवानां नामधा एक एव तं संप्रश्नं भुवना यंत्यन्या ॥ ३ ॥

यः। नः। पिता। जनिता। यः। विऽधाता। धामानि। वेद।
भुवनानि। विश्वा।

यः। देवानां। नामऽधाः। एकः। एव। तं। संऽप्रश्नं। भुवना।
यंति। अन्या ॥ ३ ॥

त आयंजंत द्रविणं सम॑स्मा ऋषंयः पूर्वे जरितारो न भूना ।
असूर्ते सूर्ते रजांसि निषत्ते ये भूतानि समकृण्वन्निमानि ॥ ४ ॥

ते । आ । अयजंत । द्रविणं । सं । अस्मै । ऋषंयः । पूर्वे । जरितारः ।
न । भूना ।
असूर्ते । सूर्ते । रजांसि । निऽसत्ते । ये । भूतानि । संऽअकृण्वन् ।
इमानि ॥ ४ ॥

परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति ।
कं स्विद्गर्भं प्रथमं दध्र आपो यत्र देवाः समपश्यंत विश्वे ॥५॥

परः । दिवा । परः । एना । पृथिव्या । परः । देवेभिः । असुरैः ।
यत् । अस्ति ।
कं । स्वित् । गर्भं । प्रथमं । दध्रे । आपः । यत्र । देवाः । संऽअपश्यंत ।
विश्वे ॥ ५ ॥

तमिद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छंत विश्वे ।
अजस्य नाभावध्येकमर्पितं यस्मिन्विश्वानि भुवनानि तस्थुः ॥६

तं । इत् । गर्भं । प्रथमं । दध्रे । आपः । यत्र । देवाः । संऽअगच्छंत । विश्वे ।
अजस्य । नाभौ । अधि । एकं । अर्पितं । यस्मिन् । विश्वानि ।
भुवनानि । तस्थुः ॥ ६ ॥

न तं विदाथ य इमा जजानान्यद्युष्माकमंतरं बभूव ।
नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरंति ॥ ७ ॥

न । तं । विदाथ । यः । इमा । जजान । अन्यत् । युष्माकं । अंतरं । बभूव ।
नीहारेण । प्रावृताः । जल्प्याः । च । असुऽतृपः । उक्थऽशासः । चरंति ॥ ७ ॥

हये जाय इत्यष्टादशर्चं [अष्टमेऽनुवाके] पंचमं सूक्तं त्रैष्टुभम् । हये जाय, इषुर्न श्रिये, या सुजूर्णिः, कदा सूनुः, सुदेवो अद्य, अंतरिक्षप्रां, सचा यदासु जहतीष्वित्याद्यास्तिस्रश्चेति नवर्चं (१, ३, ६, १२, १४, १७, ८–१०) ऐळस्य पुरूरवसो वाक्यानि । अतस्तासां स ऋषिः । शिष्टा नवोर्वश्या वाक्यानि । अतस्तासु सार्षिका । उभयोर्वाक्येषु योऽर्थः प्रतिपाद्यते सा देवता ॥

पुरूरवाः––

हये जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवावहै नु ।
न नौ मंत्रा अनुदितास एते मयस्करन्परतरे चनाहन् ॥१॥

हये । जाये । मनसा । तिष्ठ । घोरे । वचांसि । मिश्रा । कृणवावहै । नु ।
न । नौ । मंत्राः । अनुदितासः । एते । मयः । करन् । परऽतरे । चन । अहन् ॥ १ ॥

उर्वशी—

किमेता वाचा कृणवा तवाहं प्राक्रमिषमुषसामग्रियेव ।
पुरूरवः पुनरस्तं परेहि दुरापना वात इवाहमस्मि ॥ २ ॥

किं । एता । वाचा । कृणव । तव । अहं । प्र । अक्रमिषं । उषसां । अग्रियाऽइव ।
पुरूरवः । पुनः । अस्तं । परा । इहि । दुःऽआपना । वातःऽइव । अहं । अस्मि ॥ २ ॥

पुरूरवाः—

इषुर्न श्रिय इषुधेरसना गोषाः शतसा न रंहिः ।
अवीरे क्रतौ वि दविद्युतन्नोरा न मायुं चितयंत धुनयः ॥३॥

इषुः । न । श्रिये । इषुऽधेः । असना । गोऽसाः । शतऽसाः । न । रंहिः ।
अवीरे । क्रतौ । वि । दविद्युतत् । न । उरा । न । मायुं । चितयंत । धुनयः ॥ ३ ॥

उर्वशी—

सा वसु दधती श्वशुराय वय उषो यदि वष्ट्यंतिगृहात् ।
अस्तं ननक्षे यस्मिञ्चाकन् × × × × ॥४॥

सा । वसु । दधती । श्वशुराय । वयः । उषः । यदि । वष्टि । अंतिऽगृहात् ।
अस्तं । ननक्षे । यस्मिन् । चाकन् । × × × × ॥ ४ ॥

× × × × × × × ×

पुरूरवोऽनु ते केतमायं राजा मे वीर तन्वं१स्तदासीः ॥५॥

× × × × × × × ×

पुरूरवः । अनु । ते । केतं । आयं । राजा । मे । वीर । तन्वः । तत् । आसीः ॥ ५ ॥

पुरूरवाः—

या सुजूर्णिः श्रेणिः सुम्नआपिर्हृदेचक्षुर्न ग्रंथिनी चरण्युः ।
ता अंजयोऽरुणयो न सस्रुः श्रिये गावो न धेनवोऽनवंत ॥६॥

या । सुऽजूर्णिः । श्रेणिः । सुम्नेऽआपिः । हृदेऽचक्षुः । न । ग्रंथिनी । चरण्युः ।
ताः । अंजयः । अरुणयः । न । सस्रुः । श्रिये । गावः । न । धेनवः । अनवंत ॥ ६ ॥

उर्वशी—

समस्मिञ्जायमान आसत ग्ना उतेमवर्धन्नद्य१ः स्वगूर्ताः ।
महे यत्त्वा पुरूरवो रणायावर्धयन्दस्युहत्याय देवाः ॥ ७ ॥

सं । अस्मिन् । जायमाने । आसत । ग्नाः । उत । ईं । अवर्धन् ।
नद्यः । स्वऽगूर्ताः ।

महे । यत् । त्वा । पुरूरवः । रणाय । अवर्धयन् । दस्युऽहत्याय ।
देवाः ॥ ७ ॥

पुरूरवाः—

सचा यदासु जहतीष्वत्कममानुषीषु मानुषो निषेवे ।
अप स्म मत्तरसंती न भुज्युस्ता अत्रसन्रथस्पृशो नाश्वाः ॥८॥

सचा । यत् । आसु । जहतीषु । अत्कं । अमानुषीषु । मानुषः ।
निऽसेवे ।

अप । स्म । मत् । तरसंती । न । भुज्युः । ताः । अत्रसन् ।
रथऽस्पृशः । न । अश्वाः ॥ ८ ॥

यदासु मर्तो अमृतासु निस्पृक्सं क्षोणीभिः क्रतुभिर्न पृंक्ते ।
ता आतयो न तन्वः शुंभत स्वा अश्वासो न क्रीळयो
दंदशानाः ॥ ९ ॥

यत् । आसु । मर्तः । अमृतासु । निऽस्पृक् । सं । क्षोणीभिः ।
क्रतुऽभिः । न । पृंक्ते ।

ताः । आतयः । न । तन्वः । शुंभत । स्वाः । अश्वासः । न ।
क्रीळयः । दंदशानाः ॥ ९ ॥

विद्युन्न या पतंती दविद्योद्भरंती मे अप्या काम्यानि ।
जनिष्टो अपो नर्यः सुजातः प्रोर्वशी तिरत दीर्घमायुः ॥१०॥

विऽद्युत् । न । या । पतंती । दविद्योत् । भरंती । मे । अप्या ।
काम्यानि ।
जनिष्टो इति । अपः । नर्यः । सुऽजातः । प्र । उर्वशी । तिरत ।
दीर्घं । आयुः ॥ १० ॥

उर्वशी—

जज्ञिष इत्था गोपीथ्याय हि दधाथ तत्पुरूरवो म ओजः ।
अशासं त्वा विदुषी सस्मिन्नहन्न म आशृणोः किमभुग्वदासि
॥ ११ ॥

जज्ञिषे । इत्था । गोऽपीथ्याय । हि । दधाथ । तत् । पुरूरवः ।
मे । ओजः ।
अशासं । त्वा । विदुषी । सस्मिन् । अहन् । न । मे । आ ।
अशृणोः । किं । अभुक् । वदासि ॥ ११ ॥

पुरूरवाः—

कदा सूनुः पितरं जात इच्छाच्चक्रन्नाश्रु वर्तयद्विजानन् ।
को दंपती समनसा वि यूयोदध यदग्निः श्वशुरेषु दीदयत् ॥१२॥

कदा । सूनुः । पितरं । जातः । इच्छात् । चक्रन् । न । अश्रु ।
वर्तयत् । विऽजानन् ।
कः । दंपती इति दंऽपती । सऽमनसा । वि । यूयोत् । अध ।
यत् । अग्निः । श्वशुरेषु । दीदयत् ॥ १२ ॥

उर्वशी—

प्रति ब्रवाणि वर्तयते अश्रु चक्रन्न क्रंदद।ध्ये शिवायै ।
प्र तत्ते हिनवा यत्ते अस्मे परेह्यस्तं नहि मूर मापः ॥ १३॥

प्रति । ब्रवाणि । वर्तयते । अश्रु । चक्रन् । न । क्रंदत् । आऽध्ये ।
शिवायै ।
प्र । तत् । ते । हिनव । यत् । ते । अस्मे इति । परा । इहि । अस्तं ।
नहि । मूर । मा । आपः ॥ १३॥

पूरूरवाः—

सुदेवो अद्य प्रपतेदनावृत्परावतं परमां गंतवा उ ।
अधा शयीत निर्ऋतेरुपस्थेऽधैनं वृका रभसासो अद्युः॥१४॥

सुऽदेवः । अद्य । प्रऽपतेत् । अनावृत् । पराऽवतं । परमां ।
गंतवै । उं इति ।
अध । शयीत । निःऽऋतेः । उपऽस्थे । अध । एनं । वृकाः ।
रभसासः । अद्युः ॥ १४ ॥

उर्वशी—

पुरूरवो मा मृथा मा प्र पप्तो मा त्वा वृकासो अशिवास उ क्षन् ।
न वै स्त्रैणानि सख्यानि संति सालावृकाणां हृदयान्येता॥१५॥

पुरूरवः । मा । मृथाः । मा । प्र । पप्तः । मा । त्वा । वृकासः । अशिवासः । ऊं इति । क्षन् ।
न । वै । स्त्रैणानि । सख्यानि । संति । सालावृकाणां । हृदयानि । एता ॥ १५ ॥

यद्विरूपाचरं मर्त्येष्ववसं रात्रीः शरदश्चतस्रः ।
घृतस्य स्तोकं सकृदन्ह आश्नां तादेवेदं तातृपाणा चरामि ॥ १६ ॥

यत् । विऽरूपा । अचरं । मर्त्येषु । अवसं । रात्रीः । शरदः । चतस्रः ।
घृतस्य । स्तोकं । सकृत् । अन्हः । आश्नां । तात् । एव । इदं । ततृपाणा । चरामि ॥ १६ ॥

पुरूरवाः—

अंतरिक्षप्रां रजसो विमानीमुप शिक्षाम्युर्वशीं वसिष्ठः ।
उप त्वा रातिः सुकृतस्य तिष्ठान्नि वर्तस्व हृदयं तप्यते मे॥१७॥

अंतरिक्षऽप्रां । रजसः । विऽमानीं । उप । शिक्षामि । उर्वशीं । वसिष्ठः ।
उप । त्वा । रातिः । सुऽकृतस्य । तिष्ठात् । नि । वर्तस्व ।
हृदयं । तप्यते । मे ॥ १७ ॥

उर्वशी—

इति त्वा देवा इम आहुरैळ यथेमेतद्भवसि मृत्युबंधुः ।
प्रजा ते देवान्हविषा यजाति स्वर्ग उ त्वमपि मादयासे ॥१८॥

इति । त्वा । देवाः । इमे । आहुः । ऐळ । यथा । ईं । एतत् ।
भवसि । मृत्युऽबंधुः ।
प्रऽजा । ते । देवान् । हविषा । यजाति । स्वःऽगे । ऊं इति । त्वं ।
अपि । मादयासे ॥ १८ ॥

किमिच्छंतीत्येकादशर्चं [नवमेऽनुवाके] नवमं सूक्तं त्रैष्टुभम् । ऐन्द्रपुरोहितस्य बृहस्पते र्गोषु वलनाम्नोऽसुरस्य भटैः पणिनामकैरसुरैरपहृत्य गुहायां निहितासु सतीषु बृहस्पतिप्रेरितेनेंद्रेण गवामन्वेषणाय सरमा नाम देवशुनी प्रेषिता । सा च महतीं नदीमुत्तीर्य वलपुरं प्राप्य गुप्तस्थाने नीतास्ता गा ददर्श । अथ तस्मिन्नंतरे पणय इदं वृत्तान्तमवगच्छंत एनां मित्रीकर्तुं संवादमकुर्वन् । तत्र प्रथमातृतीयाद्या अयुजोऽंत्यावर्जिताः पणीनां च वचनं । अत्र त ऋषयः सरमा देवता । द्वितीयाचतुर्थ्याद्या युज एकादशी च षट् सरमाया वाक्यानि । अतस्तासु सरमर्षिः पणयो देवता ।

पणयः—

किमिच्छंती सरमा प्रेदमांनड् दूरे ह्यध्वा जगुंरिः पराचैः ।
कास्मेहिंतिः का परिंतक्म्यासीत्कथं रसायां अतरः पयांसि ॥१॥

।किं इच्छंती। सरमा । प्र । इदं । आनट् । दूरे । हि । अध्वा ।
जगुंरिः । पराचैः ।
का । अस्मेऽहिंतिः । का । परिंऽतक्म्या । आसीत् । कथं ।
रसायाः । अतरः । पयांसि ॥ १ ॥

सरमा—

इंद्रस्य दूतीरिंषिता चंरामि मह इच्छंती पणयो निधीन्वः ।
अतिष्कदों भियसा तन्न आवत्तथा रसायाः अतरं पयांसि ॥२॥

इंद्रस्य । दूतीः । इषिता । चरामि । महः । इच्छंती । पणयः ।
निऽधीन् । वः
अतिऽस्कदः । भियसा । तत् । नः । आवत् । तथा । रसायाः ।
अतरं । पयांसि ॥ २ ॥

पणयः—

कीदृङ्ङिंद्रः सरमे का दृशीका यस्येदं दूतीरसंरः पराकात् ।
आ च गच्छान्मित्रमेना दधामाथा गवां गोपंतिर्नो भवाति ॥३॥

कीदृङ् । इंद्रः । सरमे । का । दृशीका । यस्य॑ । इदं । दूतीः ।
अस॑रः । पराकात् ।

आ । च । गच्छात् । मित्रं । एन । दधाम । अर्थ । गवा॑ ।
गोऽपतिः । नः । भवाति ॥ ३ ॥

सरमा—

नाहं तं वेद दभ्यं दभत्स यस्येदं दूतीरसरं पराकात् ।
न तं गूहंति स्रवतो गभीरा हता इंद्रेण पणयः शयध्वे ॥ ४ ॥

न । अहं । तं । वेद । दभ्यं । दभत् । सः । यस्य॑ । इदं । दूतीः ।
अस॑रं । पराकात् ।

न । तं । गूहंति । स्रवतः । गभीराः । हताः । इंद्रेण । पणयः ।
शयध्वे ॥ ४ ॥

पणयः—

इमा गावः सरमे या ऐच्छः परि दिवो अंतान्त्सुभगे पतंती ।
कस्त एना अव सृजादयुध्व्युतास्माकमायुधा संति तिग्मा ॥ ५ ॥

इमाः । गावः । सरमे । याः । ऐच्छः । परि । दिवः । अंतान् ।
सुऽभगे । पतंती ।

कः । ते । एनाः । अव । सृजात् । अयुध्वी । उत । अस्माकं ।
आयुधा । संति । तिग्मा ॥ ५ ॥

सरमा—

असेन्या वः पणयो वचांस्यनिषव्यास्तन्वः संतु पापीः ।
अधृष्टो व एतवा अस्तु पंथा बृहस्पतिर्व उभया न मृळात् ॥६॥

असेन्या । वः । पणयः । वचांसि । अनिषव्याः । तन्वः । संतु । पापीः ।
अधृष्टः । वः । एतवै । अस्तु । पंथाः । बृहस्पतिः । वः । उभया ।
न । मृळात् ॥ ६ ॥

पणयः—

अयं निधिः सरमे अद्रिबुध्नो गोभिरश्वेभिर्वसुभिर्न्यृष्टः ।
रक्षंति तं पणयो ये सुगोपा रेकु पदमलकमा जगंथ ॥ ७ ॥

अयं । निऽधिः । सरमे । अद्रिऽबुध्नः । गोभिः । अश्वेभिः ।
वसुऽभिः । निऽऋष्टः ।
रक्षंति । तं । पणयः । ये । सुऽगोपाः । रेकु । पदं । अलकं ।
आ । जगंथ ॥ ७ ॥

सरमा—

एह गमन्नृषयः सोमशिता अयास्यो अंगिरसो नवग्वाः ।
त एतमूर्वं वि भजंत गोनामथैतद्वचः पणयो वमन्नित् ॥ ८ ॥

आ । इह । गमन् । ऋषयः । सोमऽशिताः । अयास्यः । अंगिरसः ।
नवऽग्वाः ।
ते । एतं । ऊर्वं । वि । भजंत । गोनां । अथ । एतत् । वचः ।
पणयः । वमन् । इत् ॥८॥

पणयः—

एवा च त्वं सरम आजगंथ प्रबाधिता सहसा दैव्येन ।
स्वसारं त्वा कृणवै मा पुनर्गा अप ते गवां सुभगे भजाम ॥९॥

एव । च । त्वं । सरमे । आऽजगंथ । प्रऽबाधिता । सहसा । दैव्येन ।
स्वसारं । त्वा । कृणवै । मा । पुनः । गाः । अप । ते । गवां ।
सुऽभगे । भजाम ॥ ९ ॥

सरमा—

नाहं वेद भ्रातृत्वं नो स्वसृत्वमिंद्रो विदुरंगिरसश्च घोराः ।
गोकामा मे अच्छदयन्यदायमपात इत पणयो वरीयः ॥१०॥

न । अहं । वेद । भ्रातृऽत्वं । नो इति । स्वसृऽत्वं । इंद्रः । विदुः ।
अंगिरसः । च । घोराः ।
गोऽकामाः । मे । अच्छदयन् । यत् । आयं । अप । अतः ।
इत । पणयः । वरीयः ॥१०॥

दूरमित पणयो वरीय उद्गावो यंतु मिनतीर्ऋतेन ।
बृहस्पतिर्या अविंदन्निगूळ्हाः सोमो ग्रावाण ऋषयश्च विप्राः॥११

दूरं । इत । पणयः । वरीयः । उत् । गावः । यंतु । मिनतीः । ऋतेन ।
बृहस्पतिः । याः । अविंदत् । निऽगूळ्हाः । सोमः । ग्रावाणः ।
ऋषयः । च । विप्राः ॥ ११ ॥

'नवा' इति नवर्चं [दशमेऽनुवाके] पंचमं सूक्तम्। भिक्षुर्नामांगिरस ऋषिः। प्रथमाद्वितीये जगत्यौ शिष्टाः सप्त त्रिष्टुभः। अत्र धनस्यान्नस्य च दानं स्तूयते। अतस्तद्देवत्यमिदम्। प्रातरनुवाकाश्विनशस्त्रयोजार्गते छंदसीदं सूक्तम्।

न वा उं देवाः क्षुधमिद्वधं ददुरुताशितमुप गच्छंति मृत्यवः।
उतो रयिः पृणतो नोपं दस्यत्युतापृणन्मर्डितारं न विंदते॥१॥

न। वै। ऊं इति। देवाः। क्षुधं। इत्। वधं। ददुः। उत। आशितं। उपं। गच्छंति। मृत्यवः।
उतो इति। रयिः। पृणतः। न। उपं। दस्यति। उत। अपृणन्। मर्डितारं। न। विंदते॥ १ ॥

य आध्राय चकमानाय पित्वोऽन्नवान्त्सन्रफितायोपजग्मुषे।
स्थिरं मनः कृणुते सेवते पुरोतो चित्स मर्डितारं न विंदते॥२॥

यः। आध्रायं। चकमानाय। पित्वः। अन्नऽवान्। सन्। रफिताय। उपऽजग्मुषे।
स्थिरं। मनः। कृणुते। सेवते। पुरा। उतो इति। चित्। सः। मर्डितारं। न। विंदते॥ २ ॥

स इद्भोजो यो गृहवे ददात्यन्नकामाय चरते कृशाय।
अरमस्मै भवति यामहूता उतापरीषु कृणुते सखायं॥ ३ ॥

सः । इत् । भोजः । यः । गृहवे । ददाति । अन्नऽकामाय ।
चरते । कृशाय ।
अरं । अस्मै । भवति । यामंऽहुतौ । उत । अपरीषु । कृणुते ।
सखायं ॥ ३ ॥

न स सखा यो न ददाति सख्ये सचाभुवे सचमानाय पित्वः ।
अपास्मात्प्रेयान्न तदोको अस्ति पृणंतमन्यमरणं चिदिच्छेत् ॥४॥

न । सः । सखा । यः । न । ददाति । सख्ये । सचाऽभुवे ।
सचमानाय । पित्वः ।
अप । अस्मात् । प्र । इयात् । न । तत् । ओकः । अस्ति । पृणंतं ।
अन्यं । अरणं । चित् । इच्छेत् ॥ ४ ॥

पृणीयादिन्नाधमानाय तव्यान्द्राघीयांसमनु पश्येत पंथां ।
ओ हि वर्तते रथ्येव चक्रान्यमन्यमुप तिष्ठंत रायः ॥ ५ ॥

पृणीयात् । इत् । नाधमानाय । तव्यान् । द्राघीयांसं । अनु ।
पश्येत । पंथां ।
ओ इति । हि । वर्तते । रथ्याऽइव । चक्रा । अन्यंऽअन्यं । उप ।
तिष्ठंत । रायः ॥ ५ ॥

मोघमन्नं विंदते अप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य ।
[illegible] पुष्यति नो सखायं केवलाघो भवति केवलादी ॥६॥

मोर्घं । अन्नं । विन्दते । अप्रऽचेताः । सत्यं । ब्रवीमि । वधः ।
इत् । सः । तस्यं ।
न । अर्यमणं । पुष्यति । नो इति । सखायं । केवलऽअघः ।
भवति । केवलऽआदी ॥ ६ ॥

कृषन्नित्फाल आशितं कृणोति यन्नध्वानमप वृंक्ते चरित्रैः ।
वदन्ब्रह्मावदतो वनीयान्पृणन्नापिरपृणन्तमभि ष्यात् ॥ ७ ॥

कृषन् । इत् । फालः । आशितं । कृणोति । यन् । अध्वानं । अप ।
वृंक्ते । चरित्रैः ।
वदन् । ब्रह्मा । अवदतः । वनीयान् । पृणन् । आपिः । अपृणन्तं ।
अभि । स्यात् ॥ ७ ॥

एकपाद्भूयो द्विपदो वि चक्रमे द्विपात्त्रिपादमभ्येति पश्चात् ।
चतुष्पादेति द्विपदामभिस्वरे संपश्यन्पंक्तीरुपतिष्ठमानः ॥८॥
एकऽपात् । भूयः । द्विऽपदः । वि । चक्रमे । द्विऽपात् । त्रिऽपादं ।
अभि । एति । पश्चात् ।
चतुःऽपात् । एति । द्विऽपदां । अभिऽस्वरे । संऽपश्यन् । पंक्तीः ।
उपऽतिष्ठमानः ॥ ८ ॥

समौ चिद्धस्तौ न समं विविष्टः संमातरा चिन्न समं दुहाते ।
यमयोश्चिन्न समा वीर्याणि ज्ञाती चित्सन्तौ न समं पृणीतः॥९॥

समौ । चित् । हस्तौ । न । समं । विविष्टः । संऽमातरा । चित् ।
न । समं । दुहाते इति ।

यमयोः । चित् । न । समा । वीर्याणि । ज्ञाती इति । चित् । सन्तौ ।
न । समं । पृणीतः ॥ ९ ॥

हिरण्यगर्भ इति दशर्चं [दशमेऽनुवाके] नवमं सूक्तं प्रजापतिपुत्रस्य हिरण्यगर्भस्यार्षं त्रैष्टुभम् । कशब्दाभिधेयः प्रजापतिर्देवता

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥१॥

हिरण्यऽगर्भः । सं । अवर्तत । अग्रे । भूतस्य । जातः । पतिः ।
एकः । आसीत् ।

सः । दाधार । पृथिवीं । द्यां । उत । इमां । कस्मै । देवाय
हविषा । विधेम ॥ १ ॥

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यस्य च्छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम॥२॥

यः । आत्मऽदाः । बलऽदाः । यस्य । विश्वे । उपऽआसते ।
प्रऽशिषं । यस्य । देवाः ।

यस्य । छाया । अमृतं । यस्य । मृत्युः । कस्मै । देवाय । हविषा ।
विधेम ॥ २ ॥

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥३॥

यः । प्राणतः । निऽमिषतः । महिऽत्वा । एकः । इत् । राजा ।
जगतः । बभूव ।
यः । ईशे । अस्य । द्विऽपदः । चतुःऽपदः । कस्मै । देवाय ।
हविषा । विधेम ॥ ३ ॥

यस्येमे हिमवंतो महित्वा यस्य समुद्रं रसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥४॥

यस्य । इमे । हिमऽवंतः । महिऽत्वा । यस्य । समुद्रं । रसया ।
सह । आहुः ।
यस्य । इमाः । प्रऽदिशः । यस्य । बाहू इति । कस्मै । देवाय ।
हविषा । विधेम ॥ ४ ॥

येन द्यौरुग्रा पृथिवी च दृळ्हा येन स्वः स्तभितं येन नाकः ।
यो अंतरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥५॥

येन । द्यौः । उग्रा । पृथिवी । च । दृळ्हा । येन । स्वरिति स्वः ।
स्तभितं । येन । नाकः ।
यः । अंतरिक्षे । रजसः । विऽमानः । कस्मै । देवाय । हविषा ।
विधेम ॥ ५ ॥

यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने ।
यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम ॥६॥

यं । क्रन्दसी इति । अवसा । तस्तभाने इति । अभि । ऐक्षेतां ।
मनसा । रेजमाने इति ।

यत्र । अधि । सूरः । उत्ऽइतः । विऽभाति । कस्मै । देवाय ।
हविषा । विधेम ॥ ६ ॥

आपो ह यद्बृहतीर्विश्वमायन्गर्भं दधाना जनयन्तीरग्निं ।
ततो देवानां समवर्ततासुरेकः कस्मै देवाय हविषा विधेम ॥७॥

आपः । ह । यत् । बृहतीः । विश्वं । आयन् । गर्भं । दधानाः ।
जनयन्तीः । अग्निं ।

ततः । देवानां । सं । अवर्तत । असुः । एकः । कस्मै । देवाय ।
हविषा । विधेम । ॥ ७ ॥

यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जनयन्तीर्यज्ञं ।
यो देवेष्वधि देव एक आसीत्कस्मै देवाय हविषा विधेम ॥८॥

यः । चित् । आपः । महिना । परिऽअपश्यत् । दक्षं । दधानाः ।
जनयन्तीः । यज्ञं ।

यः । देवेषु । अधि । देवः । एकः । आसीत् । कस्मै । देवाय ।
हविषा । विधेम ॥ ८ ॥

मा नो हिंसीज्जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा जजान।
यश्चापश्चंद्रा बृहतीर्जजान कस्मै देवाय हविषा विधेम ॥ ९ ॥

मा । नः । हिंसीत् । जनिता । यः । पृथिव्याः । यः । वा । दिवं ।
सत्यऽधर्मा । जजान ।
यः । च । अपः । चंद्राः । बृहतीः । जजान । कस्मै । देवाय ।
हविषा । विधेम ॥ ९ ॥

इळादधाख्य इष्टययने प्राजापत्यस्य हविषः प्रजापत इत्येषानुवाक्या। केशनखकीटादिभिर्दुष्टानि हवींष्यनयैवाप्सु प्रक्षिपेत् । चौलादिकर्मस्वप्येषा होमार्था।

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां॥१०॥

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां ॥ १० ॥

अहमित्यष्टर्चं [दशमेऽनुवाके] त्रयोदशं सूक्तम् । अंभृणस्य महर्षेर्दुहिता वाङ्नाम्नी ब्रह्मविदुषी स्वात्मानमस्तौत्। अतः सर्षिः । सच्चित्सुखात्मकः सर्वगतः परमात्मा देवता। तेन ह्येषा तादात्म्यमनुभवंती सर्वजगद्रूपेण सर्वस्याधिष्ठानत्वेन चाहमेव सर्वं भवामीति स्वात्मानं स्तौति। द्वितीया जगती शिष्टाः सप्त त्रिष्टुभः ।

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः।
अहं मित्रावरुणोभा बिभर्म्यहमिंद्राग्नी अहमश्विनोभा ॥ १ ॥

अहं। रुद्रेभिः। वसुऽभिः। चरामि। अहं। आदित्यैः। उत। विश्वऽदेवैः।
अहं। मित्रावरुणा। उभा। बिभर्मि। अहं। इन्द्राग्नी इति। अहं। अश्विना। उभा॥ १॥

अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगं।
अहं दधामि द्रविणं हविष्मते सुप्राव्ये यजमानाय सुन्वते॥२॥

अहं। सोमं। आहनसं। बिभर्मि। अहं। त्वष्टारं। उत। पूषणं। भगं।
अहं। दधामि। द्रविणं। हविष्मते। सुप्रऽअव्ये। यजमानाय। सुन्वते॥ २॥

अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानां।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयंतीं॥ ३॥

अहं। राष्ट्री। संऽगमनी। वसूनां। चिकितुषी। प्रथमा। यज्ञियानां।
तां। मा। देवाः। वि। अदधुः। पुरुऽत्रा। भूरिऽस्थात्रां। भूरि। आऽवेशयंतीं॥ ३॥

मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं शृणोत्युक्तं।
अमन्तवो मां त उप क्षियन्ति श्रुधि श्रुत श्रद्धिवं ते वदामि॥

मया । सः । अन्नं । आत्ति । यः । विऽपश्यति । यः । प्राणिति ।
यः । ईं । शृणोति । उक्तं ।
अमंतवः । मां । ते । उप । क्षियंति । श्रुधि । श्रुत । श्रद्धिऽवं ।
ते । वदामि ॥ ४ ॥

अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः ।
यं कामये तंतमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधां ॥५॥

अहं । एव । स्वयं । इदं । वदामि । जुष्टं । देवेभिः । उत ।
मानुषेभिः ।
यं । कामये । तंऽतं । उग्रं । कृणोमि । तं । ब्रह्माणं । तं । ऋषिं ।
तं । सुऽमेधां ॥ ५ ॥

अहं रुद्राय धनुरा तनोमि ब्रह्मद्विषे शरवे हंतवा उं ।
अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आ विवेश ॥ ६ ॥

अहं । रुद्राय । धनुः । आ । तनोमि । ब्रह्मऽद्विषे । शरवे ।
हंतवे । ऊं इति ।
अहं । जनाय । सऽमदं । कृणोमि । अहं । द्यावापृथिवी इति ।
आ । विवेश ॥ ६ ॥

अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वं१तः समुद्रे ।
ततो वि तिष्ठे भुवनानु विश्वोतामूं द्यां वर्ष्मणोप स्पृशामि ॥७॥

अहं । सुवे । पितरं । अस्य । मूर्धन् । मर्म । योनिः । अप्ऽसु । अंतरिति । समुद्रे ।
ततः । वि । तिष्ठे । भुवना । अनु । विश्वा । उत । अमू । द्यां । वर्ष्मणा । उप । स्पृशामि ॥ ७ ॥

अहमेव वातं इव प्र वाम्यारभमाणा भुवनानि विश्वा ।
परो दिवा पर एना पृथिव्यैतावती महिना संबभूव ॥ ८ ॥

अहं । एव । वातःऽइव । प्र । वामि । आऽरभमाणा । भुवनानि । विश्वा ।
परः । दिवा । परः । एना । पृथिव्या । एतावती । महिना । सं । बभूव ॥ ८ ॥

रात्रीत्यष्टर्चे [दशमेऽनुवाके] पंचदशं सूक्तं सोभरिपुत्रस्य कुशिकस्यार्षम्। यद्वा भारद्वाजस्य सुता रात्र्याख्यास्य सूक्तस्यर्षिका । गायत्रं रात्रिदेवताकम्। दुःस्वप्नदर्शन उपोषितेन कर्त्रा पायसेन होतव्यम्। तत्रैतत्सूक्तं करणत्वेन विनियुक्तम ।

रात्री व्यख्यदायती पुरुत्रा देव्य१क्षभिः ।
विश्वा अधि श्रियोऽधित ॥ १ ॥

रात्री । वि । अख्यत् । आऽयती । पुरुऽत्रा । देवी । अक्षऽभिः ।
विश्वाः । अधि । श्रियः । अधित ॥ १ ॥

ओर्वप्रा अमर्त्या निवतो देव्यु१द्वतः ।
ज्योतिषा बाधते तमः ॥ २ ॥

आ। उरु। अप्राः। अमर्त्या। निऽवतः। देवी। उत्ऽवतः। ज्योतिषा।
बाधते। तमः॥ २॥

निरु स्वसारमस्कृतोषसं देव्यायती।
अपेदु हासते तमः॥ ३॥

निः। ऊँ इति। स्वसारं। अकृत। उषसं। देवी। आऽयती।
अप। इत्। ऊँ इति। हासते। तमः॥३॥

सा नो अद्य यस्या वयं नि ते यामन्नविक्ष्महि।
वृक्षे न वसतिं वयः॥ ४॥

सा। नः। अद्य। यस्याः। वयं। नि। ते। यामन्। अविक्ष्महि।
वृक्षे। न। वसतिं। वयः॥ ४॥

नि ग्रामासो अविक्षत नि पद्वंतो नि पक्षिणः।
नि श्येनासश्चिदर्थिनः॥ ५॥

नि। ग्रामासः। अविक्षत। नि। पत्ऽवंतः। नि। पक्षिणः।
नि। श्येनासः। चित्। अर्थिनः॥ ५॥

यावया वृक्यं१ वृकं यवय स्तेनमूर्म्ये। अथा नः सुतरा भव॥६॥

यवय। वृक्यं। वृकं। यवय। स्तेनं। ऊर्म्ये। अथ। नः। सुऽतरा।
भव॥ ६॥

उपं मा पेपिशत्तमः कृष्णं व्यक्तमस्थित । उष ऋणेव यातय ॥७॥

उपं । मा । पेपिशत् । तमः । कृष्णं । विऽअक्तं । अस्थित । उषः ।
ऋणाऽईव । यातय ॥ ७ ॥

उपं ते गा इवाकरं वृणीष्व दुहितर्दिवः । रात्रि स्तोमं न जिग्युषे ॥८

उपं । ते । गाःऽईव । आ । अकरं । वृणीष्व । दुहितः । दिवः ।
रात्रि । स्तोमं । न । जिग्युषे ॥ ८ ॥

'नासदासीदिति [एकादशेऽनुवाके] सप्तर्चं प्रथमं सूक्तं त्रैष्टुभम् । परमेष्ठी नाम प्रजापतिर्ऋषिः । विषयाविभावानां सृष्टिस्थितिप्रलयादीनामत्र प्रतिपाद्यत्वात्तेषां कर्ता परमात्मा देवता । संसवे निमित्तभूते वैश्वदेवसूक्तस्य पुरस्तादेतच्छंस्यम् ।

नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत् ।
किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरं ॥१॥

न । असत् । आसीत् । नो इति । सत् । आसीत् । तदानीं ।
न । आसीत् । रजः । नो इति । विऽओम । परः । यत् ।
किं । आ । अवरीवरीति । कुह । कस्य । शर्मन् । अंभः । किं ।
आसीत् । गहनं । गभीरं ॥ १ ॥

न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः ।
आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास ॥२॥

न । मृत्युः । आसीत् । अमृतं । न । तर्हि । न । रात्र्याः । अह्नः ।
आसीत् । प्रऽकेतः ।

आनीत् । अवातं । स्वधया । तत् । एकं । तस्मात् । ह । अन्यत् ।
न । परः । किं । चन । आस ॥ २ ॥

तम आसीत्तमसा गूळ्हमग्रेऽप्रकेतं सलिलं सर्वमा इदं ।
तुच्छ्येनाभ्वपिहितं यदासीत्तपसस्तन्महिनाजायतैकं ॥३॥

तमः । आसीत् । तमसा । गूळ्हं । अग्रे । अप्रऽकेतं । सलिलं ।
सर्वं । आः । इदं ।

तुच्छ्येन । आभु । अपिऽहितं । यत् । आसीत् । तपसः । तत् ।
महिना । अजायत । एकं ॥ ३ ॥

कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत् ।
सतो बंधुमसति निरविंदन्हृदि प्रतीष्या कवयो मनीषा ॥४॥

कामः । तत् । अग्रे । सं । अवर्तत । अधि । मनसः । रेतः ।
प्रथमं । यत् । आसीत् ।

सतः । बंधुं । असति । निः । अविंदन् । हृदि । प्रतिऽइष्य ।
कवयः । मनीषा ॥ ४ ॥

तिरश्चीनो विततो रश्मिरेषामधः स्विदासी३दुपरि स्विदासी३त् ।
रेतोधा आसन्महिमान आसन्त्स्वधा अवस्तात्प्रयतिः परस्तात्
॥ ५ ॥

तिरश्चीनः । विऽततः । रश्मिः । एषां । अधः । स्वित् । आसी३त् ।
उपरि । स्वित् । आसी३त् ।
रेतःऽधाः । आसन् । महिमानः । आसन् । स्वधा । अवस्तात् ।
प्रऽयतिः । परस्तात् ॥ ५ ॥

को अद्धा वेद क इह प्र वोचत्कुत आजाता कुत इयं विसृष्टिः।
अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आ बभूव॥६॥
कः । अद्धा । वेद । कः । इह । प्र । वोचत् । कुतः । आऽजाता ।
कुतः । इयं । विऽसृष्टिः ।
अर्वाक् । देवाः । अस्य । विऽसर्जनेन । अथ । कः । वेद । यतः ।
आऽबभूव ॥ ६ ॥

इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न ।
यो अस्याध्यक्षः परमे व्योमन्त्सो अंग वेद यदि वा न वेद॥७॥
इयं । विऽसृष्टिः । यतः । आऽबभूव । यदि । वा । दधे । यदि । वा । न ।
यः । अस्य । अधिऽअक्षः । परमे । विऽओमन् । सः। अंग । वेद ।
यदि । वा । न । वेद ॥७॥

अरण्यानीति षडृचं [सप्तमोऽनुवाके] [illegible] ऐरम्मद-
पुत्रस्य देवमुनेरार्षम्। महदरण्यमरण्यानी। तद्देवताकम्। आनुष्टुभम्।

अरण्यान्यरण्यान्यसौ या प्रेव नश्यसि।
कथा ग्रामं न पृच्छसि न त्वा भीरिव विंदतीँ३ ॥ १ ॥

अरण्यानि। अरण्यानि। असौ। या। प्रऽइव। नश्यसि।
कथा। ग्रामं। न। पृच्छसि। न। त्वा। भीःऽइव। विंदतीँ३ ॥ १॥

वृषारवाय वदते यदुपावति चिच्चिकः।
आघाटिभिरिव धावयन्नरण्यानिर्महीयते ॥ २ ॥

वृषऽरवाय। वदते। यत्। उपऽअवति। चिच्चिकः।
आघाटिभिःऽइव। धावयन्। अरण्यानिः। महीयते ॥ २ ॥

उत गाव इवादंत्युत वेश्मेव दृश्यते।
उतो अरण्यानिः सायं शकटीरिव सर्जति ॥ ३ ॥

उत। गावःऽइव। अदंति। उत। वेश्मऽइव। दृश्यते।
उतो इति। अरण्यानिः। सायं। शकटीःऽइव। सर्जति ॥ ३ ॥

गामंगैष आ ह्वयति दार्वंगैषो अपावधीत्।
वसन्नरण्यान्यां सायमक्रुक्षदिति मन्यते ॥

गां। अंग। एषः। आ। ह्वयति। दारु। अंग। एषः। अप। अवधीत्।
वसन्। अरण्यान्यां। सायं। अक्रुक्षत्। इति। मन्यते ॥ ४ ॥

न वा अरण्यानिर्हन्त्यन्यश्चेन्नाभि गच्छति ।
स्वादोः फलस्य जग्ध्वाय यथाकामं नि पद्यते ॥ ५ ॥

न । वै । अरण्यानिः । हन्ति । अन्यः । च । इत् । न । अभिऽगच्छति ।
स्वादोः । फलस्य । जग्ध्वाय । यथाऽकामं । नि । पद्यते ॥ ५ ॥

आंजनगंधिं सुरभिं बह्वन्नामकृषीवलां ।
प्राहं मृगाणां मातरमरण्यानिमशंसिषं ॥ ६ ॥

आंजनऽगंधिं । सुरभिं । बहुऽअन्नां । अकृषिऽवलां ।
प्र । अहं । मृगाणां । मातरं । अरण्यानिं । अशंसिषं ॥ ६ ॥

ऋतमिति तृचं [द्वादशेऽनुवाके] एकोनचत्वारिंशं सूक्तं मधुच्छंदसः पुत्रस्याघमर्षणस्यार्षमानुष्टुभं । रात्र्यादीनां भावानां सृष्ट्यादिप्रतिपादकत्वात्तद्रूप एवार्थो देवता । लिङ्गादिनियोगोऽवगन्तव्यः ॥

ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत ।
ततो रात्र्यजायत ततः समुद्रो अर्णवः ॥ १ ॥

ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत ।
ततो रात्र्यजायत ततः समुद्रो अर्णवः ॥ १ ॥

समुद्रादर्णवादधि संवत्सरो अजायत ।
अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥ २ ॥

समुद्रादर्णवादधि संवत्सरो अजायत ।
अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥ २ ॥

सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयत् ।
दिवं च पृथिवीं चांतरिक्षमथो स्वः ॥ ३ ॥

सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयत् ।
दिवं च पृथिवीं चांतरिक्षमथो स्वः ॥ ३ ॥

यजुर्वेदः

वैदिकपाठावली

अत्र इषे त्वा द्वावध्यायौ दर्शपूर्णमासमन्त्राः। परमेष्ठिनः प्राजापत्यस्यार्षं देवानां वा प्राजापत्यानाम्। तत्रास्मिन्नध्याये सर्वाण्येव यजूंषि।

हरिः ॐ। इषे त्वोर्जे त्वा वायवं स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्वमघ्न्या इन्द्राय भागं प्रजावतीरनमीवा अयक्ष्मा मा वस्तेन ईशत माघशंसो ध्रुवा अस्मिन्गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि ॥ १ ॥

वसोः पवित्रमसि द्यौरसि पृथिव्यसि मातरिश्वनो घर्मोऽसि विश्वधा असि। परमेण धाम्ना दृंहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत् ॥ २ ॥

वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम्। देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ॥ ३ ॥

सा विश्वायुः सा विश्वकर्मा सा विश्वधायाः। इन्द्रस्य त्वा भागं सोमेनातनच्मि विष्णो हव्यं रक्ष ॥ ४ ॥

अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम्। इदमहमनृतात्सत्यमुपैमि ॥ ५ ॥

इमे पाठा (पृ० १२१–२७) वाजसनेयिमाध्यंदिनशुक्लयजुर्वेदसंहिताया उद्धृताः।

कस्त्वा युनक्ति स त्वा युनक्ति कस्मै त्वा युनक्ति तस्मै त्वा युनक्ति । कर्मणे वां वेषाय वाम् ॥ ६ ॥

प्रत्युष्टं रक्षः प्रत्युष्टा अरातयो निष्टप्तं रक्षो निष्टप्ता अरातयः । उर्वन्तरिक्षमन्वेमि ॥ ७ ॥

धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान्धूर्वति तं धूर्व यं वयं धूर्वामः । देवानामसि वह्नितमं सस्नितमं पप्रितमं जुष्टतमं देवहूतमम् ॥८॥

अह्रुतमसि हविर्धानं दृंहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत् । विष्णुस्त्वाक्रमतामुरु वातायापहतं रक्षो यच्छन्तां पञ्च ॥९॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । अग्नये जुष्टं गृह्णाम्यग्नीषोमाभ्यां जुष्टं गृह्णामि ॥ १० ॥

भूताय त्वा नारातये स्वरभिविख्येषं दृंहन्तां दुर्याः पृथिव्याम् । उर्वन्तरिक्षमन्वेमि पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थेऽग्ने हव्यं रक्ष ॥ ११ ॥

पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । देवीरापो अग्रेगुवो अग्रेपुवोऽग्र इममद्य यज्ञं नयताग्रे यज्ञपतिं सुधातुं यज्ञपतिं देवयुवम् ॥१२॥

युष्मा इन्द्रोऽवृणीत वृत्रतूर्ये यूयमिन्द्रमवृणीध्वं वृत्रतूर्ये प्रोक्षिताः स्थ । अग्नये त्वा जुष्टं प्रोक्षाम्यग्नीषोमाभ्यां त्वा

जुष्टं प्रोक्षामि। दैव्याय कर्मणे शुन्धध्वं देवयज्यायै यद्वोऽशुद्धाः पराजघ्नुरिदं वस्तच्छुन्धामि ॥ १३ ॥

शर्मास्यवधूतं रक्षोऽवधूता अरातयोऽदित्यास्त्वगसि प्रति त्वादितिर्वेत्तु। अद्रिरसि वानस्पत्यो ग्रावासि पृथुबुध्नः प्रति त्वादित्यास्त्वग्वेत्तु ॥ १४ ॥

अग्नेस्तनूरसि वाचो विसर्जनं देववीतये त्वा गृह्णामि बृहद्ग्रावासि वानस्पत्यः स इदं देवेभ्यो हविः शमीष्व सुशमि शमीष्व। हविष्कृदेहि हविष्कृदेहि ॥ १५ ॥

कुक्कुटोऽसि मधुजिह्व इषमूर्जमावद त्वया वयं संघातं संघातं जेष्म वर्षवृद्धमसि प्रति त्वा वर्षवृद्धं वेत्तु परापूतं रक्षः परापूता अरातयः। अपहतं रक्षो वायुर्वो विविनक्तु देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना ॥ १६ ॥

धृष्टिरस्यपाग्ने अग्निमामादं जहि निष्क्रव्यादं सेधा देवयजं वह। ध्रुवमसि पृथिवीं दृंह ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य वधाय ॥ १७ ॥

अग्ने ब्रह्म गृभ्णीष्व धरुणमस्यन्तरिक्षं दृंह ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य वधाय। धर्त्रमसि दिवं दृंह ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य वधाय। विश्वाभ्यस्त्वाशाभ्य उपदधामि चितः स्थोर्ध्वचितो भृगूणामङ्गिरसां तपसा तप्यध्वम् ॥ १८ ॥

शर्मास्यवधूतं रक्षोऽवधूताऽअरातयोदित्यास्त्वगसि प्रति त्वादितिर्वेत्तु । धिषणासि पर्वती प्रति त्वादित्यास्त्वग्वेत्तु दिवः स्कम्भनीरसि धिषणासि पार्वतेयी प्रति त्वा पर्वती वेत्तु ॥ १९ ॥

धान्यमसि धिनुहि देवान्प्राणाय त्वोदानाय त्वा व्यानाय त्वा । दीर्घामनु प्रसितिमायुषे धां देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोऽसि।२०।.

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । संवपामि समाप ओषधीभिः समोषधयो रसेन । सं रेवतीर्जगतीभिः पृच्यन्तां संमधुमतीर्मधुमतीभिः पृच्यन्ताम्।२१।

जनयत्यै त्वा संयौमीदमग्नेरिदमग्नीषोमयोरिषे त्वा घर्मोऽसि विश्वायुरुरुप्रथा उरु प्रथस्वोरु ते यज्ञपतिः । प्रथतामग्निष्टे त्वचं मा हिंसीद्देवस्त्वा सविता श्रपयतु वर्षिष्ठेऽधि नाके ॥ २२ ॥

मा भेर्मा संविक्था अतमेरुर्यज्ञोऽतमेरुर्यजमानस्य प्रजा भूयात् । त्रिताय त्वा द्विताय त्वैकताय त्वा ॥ २३ ॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । आददेऽध्वरकृतं देवेभ्य इन्द्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजा वायुरसि तिग्मतेजा द्विषतो वधः ॥ २४ ॥

पृथिवि देवयजन्योषध्यास्ते मूलं मा हिंसिषं व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्यां शतेन पाशैर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् ॥२५॥

अपाररुं पृथिव्यै देवयजनाद्वध्यासं व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्यां शतेन पाशैर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतोमा मौक् । अररो दिवं मा पप्तो द्रप्सस्ते द्यां मा स्कन् व्रजं० मौक् ॥२६॥

गायत्रेण त्वा छन्दसा परिगृह्णामि त्रैष्टुभेन त्वा छन्दसा परिगृह्णामि जागतेन त्वा छन्दसा परिगृह्णामि । सुक्ष्मा चासि शिवा चासि स्योना चासि सुषदा चास्यूर्जस्वती चासि पयस्वती च ॥ २७ ॥

पुरा क्रूरस्य विसृपो विराप्शिन्नुदादाय पृथिवीं जीवदानुम् । यामैरयंश्चन्द्रमसि स्वधाभिस्तामु धीरासो अनुदिश्य यजन्ते । प्रोक्षणीरासादय द्विषतो वधोऽसि ॥ २८ ॥

प्रत्युष्टं रक्षः प्रत्युष्टा अरातयो निष्टप्तं रक्षो निष्टप्ता अरातयः । अनिशितोऽसि सपत्नक्षिद्वाजिनं त्वा वाजेध्यायै संमार्ज्मि । प्रत्युष्टं रक्षः प्रत्युष्टा अरातयो निष्टप्तं रक्षो निष्टप्ता अरातयः । अनिशितासि सपत्नक्षि[illegible]जिनीं त्वा वाजेध्यायै संमार्ज्मि ॥२९॥

अदित्यै रास्नासि विष्णोर्वेष्पोऽस्यूर्जे त्वाऽदब्धेन त्वा चक्षुषावपश्यामि। अग्नेर्जिह्वासि सुहूर्देवेभ्यो धाम्ने धाम्ने मे भव यजुषे यजुषे ॥ ३० ॥

सवितुस्त्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः। तेजोऽसि शुक्रमस्यमृतमसि धाम नामासि प्रियं देवानामनाधृष्टं देवयजनमसि ॥ ३१ ॥

यज्जाग्रतः षट्कण्डिकास्त्रिष्टुभो मनोदेवत्याः । अस्मिन्नध्याये लैङ्गिको विनियोगः ।

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति ।
दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु॥१॥

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः ।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसंकल्पमस्तु ॥२॥

यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ।
यस्मान्न ऋते किंचन कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु॥३॥

येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन सर्वम् ।
येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसंकल्पमस्तु ॥४॥

यस्मिन्नृचः साम यजूंषि यस्मिन्प्रतिष्ठिता रथनाभाविवाराः।
यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे मनः शिवसंकल्पमस्तु ॥५
सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव।
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसंकल्पमस्तु ॥ ६ ॥

अथ षष्ठेऽनुवाके पत्नीविषया मन्त्रा उच्यन्ते।

* सं त्वा नह्यामि पयसा घृतेन सं त्वा नह्याम्यप ओषधीभिः।
सं त्वा नह्यामि प्रजयाऽहमद्य सा दीक्षिता सनवो वाजमस्मे।
प्रैतु ब्रह्मणस्पत्नी वेदिं वर्णेन सीदतु।
अथाहमनुकामिनी स्वे लोके विशा इह।
सुप्रजसस्त्वा वयꣳ सुपत्नीरुप सेदिम।
अग्ने सपत्नदम्भनमदब्धासो अदाभ्यम्।
इमं वि ष्यामि वरुणस्य पाशम्(१) यमबध्नीत सविता सुकेतः।
धातुश्च योनौ सुकृतस्य लोके स्योनं मे सह पत्या करोमि॥
प्रेद्धुदेव्यृतस्य वामीरन्वग्निस्तेऽग्रं नयत्वदितिर्मध्यं ददताꣳरुद्रा-
वसृष्टाऽसि युवा नाम मा मा हिꣳसी वसुभ्यो रुद्रेभ्य
आदित्येभ्यो विश्वेभ्यो वो देवेभ्यः पन्नेजनीर्गृह्णामि यज्ञाय वः
पन्नेजनीः,सादयामि। विश्वस्य ते विश्वावतो वृष्णियावतः (२)
तवाग्ने वामीरनु संदृशि विश्वा रेताꣳसि धिषीय।

---

* इमे पाठाः कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां उद्धृताः

अगन्देवाघ्यज्ञो नि देवीर्देवेभ्यो यज्ञमशिषन्नस्मिन्त्सुन्वाते यजमान आशिषः स्वाहाकृताः समुद्रेष्ठा गन्धर्वमा तिष्ठतानु । वातस्य पत्मन्निड ईडिताः (३)।

अथ षष्ठेऽनुवाके ओषधीवापो विधीयते ।

या जाता ओषधयो देवेभ्यस्त्रियुगं पुरा ।
मन्दामि बभ्रूणामहꣳशतं धामानि सप्त च ॥ १ ॥
शतं वो अम्ब धामानि सहस्रमुत वो रुहः ।
अथा शतक्रत्वो यूयमिमं मे अगदं कृत ॥ २ ॥
पुष्पावतीः प्रसूवतीः फलिनीरफला उत ।
अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः ॥ ३ ॥
ओषधीरिति मातरस्तद्वो देवीरुप ब्रुवे ।
रपाꣳसि विघ्नतीरित रपः (१) चातयमानाः ॥ ४ ॥
अश्वत्थे वो निषदनं पर्णे वो वसतिः कृता ।
गोभाज इत्किलासथ यत्सनवथ पूरुषम् ॥ ५ ॥
यदहं वाजयन्निमा ओषधीर्हस्त आदधे ।
आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥ ६ ॥
यदोषधयः संगच्छन्ते राजानः समिताविव ।
विप्रः स उच्यते भिषग्रक्षोहाऽमीवचातनः ॥ ७ ॥
निष्कृतिर्नाम वो माताऽथा यूयꣳ स्थ संकृतीः ।
सराः पतत्रिणीः (२) स्थन यदामयति निष्कृत ॥ ८ ॥

अन्या वो अन्यामवत्वन्याऽन्यस्या उपावत
ताः सर्वा ओषधयः संविदाना इदं मे प्रावता वचः ॥९॥

उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते।
धनं सनिष्यन्तीनामात्मानं तव पूरुष ॥ १० ॥

अति विश्वाः परिष्ठाः स्तेन इव व्रजमक्रमुः ।
ओषधयः प्राचुच्यवुर्यत्किं च तनुवां रपः ॥ ११ ॥

या (३) स्त आतस्थुरात्मानं या आविविशुः परुः परुः ।
तास्ते यक्ष्मं वि बाधन्तामुग्रो मध्यमशीरिव ॥ १२ ॥

साकं यक्ष्म प्र पत श्येनेन किकिदीविना ।
साकं वातस्य ध्राज्या साकं नश्य निहाकया ॥ १३ ॥

अश्वावतीं सोमवतीमूर्जयन्तीमुदोजसम् ।
आ वित्सि सर्वा ओषधीरस्मा अरिष्टतातये ॥ १४ ॥

याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः ॥ १५ ॥

या (४) ओषधयः सोमराज्ञीः प्रविष्टाः पृथिवीमनु ।
तासां त्वमस्युत्तमा प्र णो जीवातवे सुव ॥ १६ ॥

अवपतन्तीरवदन्दिव ओषधयः परि ।
यं जीवमश्नवामहै न स रिष्याति पूरुषः ॥ १७ ॥

याश्चेदमुपशृण्वन्ति याश्च दूरं परागताः ।
इह संगत्यताः सर्वा अस्मै सं दत्त भेषजम् ॥ १८ ॥
मा वो रिषत्खनिता यस्मै चाहं खनामि वः ।
द्विपच्चतुष्पदस्माकꣳ सर्वमस्त्वनातुरम् ॥ १९ ॥
ओषधयः सं वदन्ते सोमेन सह राज्ञा ।
यस्मै करोति ब्राह्मणस्तꣳ राजन्पारयामसि (५) ॥ २० ॥

अथ षष्ठेऽश्वमेधकर्तृ रथसज्जीकरणभावीनि कवचस्वीकारादीन्यङ्गान्युच्यन्ते।

जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे ।
अनाविद्धया तनुवा जय त्वꣳ स त्वा वर्मणो महिमा पिपर्तु॥१॥
धन्वना गा धन्वनाऽऽजिं जयेम धन्वना तीव्राः समदो जयेम ।
धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम॥२॥
वक्ष्यन्तीवेदा गनीगन्ति कर्णं प्रियꣳ सखायं परिषस्वजाना।
योषेव शिङ्क्ते वितताऽधि धन्व (१) ज्या इयꣳ समने पारयन्ती ॥ ३ ॥
ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे ।
अप शत्रून्विध्यताꣳ संविदाने आर्त्नी इमे विष्फुरन्ती अमित्रान् ॥ ४ ॥
बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनाऽवगत्य ।
इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ॥५॥

रथे तिष्ठन्नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः ।
अभीशूनां महिमानं (२) पनायत मनः पश्चादनु
यच्छन्ति रश्मयः ॥ ६ ॥

तीव्रान्घोषान्कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः ।
अवक्रामन्तः प्रपदैरमित्रान्क्षिणन्ति शत्रूꣳरनपव्ययन्तः ॥७॥

रथवाहनꣳ हविरस्य नाम यत्राऽऽयुधं निहितमस्य वर्म ।
तत्रा रथमुप शग्मꣳ सदेम विश्वाहा वयꣳ सुमनस्यमानाः॥८॥

स्वादुषꣳसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः।
चित्रसेना इषुबला अमृध्राः सतोवीरा उरवो व्रातसाहाः॥९॥

ब्राह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा।
पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्नो अघशꣳस
ईशत ॥ १० ॥

सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः संनद्धा पतति प्रसूता ।
यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यꣳसन्॥११॥

ऋजीते परि वृङ्धि नोऽश्मा भवतु नस्तनूः ।
सोमो अधि ब्रवीतु नोऽदितिः शर्म यच्छतु ॥ १२ ॥

आ जङ्घन्ति सान्वेषां जघनाꣳ उपजिघ्नते ।
अश्वाजनि प्रचेतसोऽश्वान्त्समत्सु चोदय ॥ १३ ॥

अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः।
हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमाꣳसं परि पातु विश्वतः॥१४

वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः ।
गोभिः सनद्धो असि वीडयस्वाऽऽस्थाता ते जयतु जेत्वानि ॥ १५ ॥
दिवः पृथिव्याः परि (५) ओज उद्भृतं वनस्पतिभ्यः
पर्याभृतꣳ सहः ।
अपामोज्मानं परि गोभिरावृतमिन्द्रस्य वज्रꣳ हविषा रथं यज ॥ १६ ॥
इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ।
सेमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ॥ १७ ॥
उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत् ।
स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद् (६) दवीयो अप सेध शत्रून् ॥ १८ ॥
आ क्रन्दय बलमोजो न आ धा निष्टनिहि दुरिता बाधमानः ।
अप प्रोथ दुन्दुभे दुच्छुनाꣳ इत इन्द्रस्य मुष्टिरसि वीडयस्व ॥ १९ ॥
आऽमूरज प्रत्यावर्तयेमाः केतुमद्दुन्दुभिर्वावदीति ।
समश्वपर्णाश्चरन्ति नो नरोऽस्माकमिन्द्र रथिनो जयन्तु (७) ॥ २० ॥

अथर्ववेदः

वाक्‌पतावली

[ऋषिरथर्वा । वाचस्पत्यं चतुरृचमानुष्टुभम् । चतुर्थी चतुष्पदा विराडुरोबृहती ।]

ये त्रिषप्ता इत्येतत् प्रथमं सूक्तम् । अस्य मेधाजननकर्मणि विनियोगः । उपनयनदिवसेऽपि मेधाकामस्य ब्रह्मचारिणोऽनेन सूक्तेनाज्यहोमः कार्यः । तथैव ब्रह्मचारिसंपत्कर्मस्वस्य सूक्तस्य विनियोगः । तथा ग्रामसंपत्कामस्य तत्साधनेष्वेतेषूदुम्बरपलाश-कर्कन्धूतक्षणाधानसमीपस्तरणतृणाधानाभिमन्त्रितान्नसवप्रदानेषु कर्मस्व-स्य सूक्तस्य विनियोगः । तथा सर्वसंपत्कर्मस्वप्यस्य सूक्तस्य विनियोगः । (तथा वर्चस्यकर्मण्यनेन सूक्तेन वर्चस्काम औदुम्बर्यादीनि त्रीणि कु-र्यात् । तथा च) वर्चस्कामायाः कुमार्या दक्षिणोरोरभिमन्त्रणं कौतवपा-होमोऽग्न्युपस्थानमित्येतानि कर्माण्यनेन सूक्तेन तेजस्कामोऽनुतिष्ठेत् । तथा शत्रुहस्तित्रासनकर्माण्यप्यनेनैव संग्रामजयकामो राजा कारयेत् । तथा पञ्च निर्ऋतिकर्माणि शान्तिकपौष्टिकेषु सर्वत्राङ्गत्वेन वा पापक्षयार्थं स्वातन्त्र्येण वा कर्तव्यत्वेन सूत्रकारेणोक्तानि । तत्राद्ययोः कर्मणोः संपातिताभिमन्त्रि-तभक्तप्राशन आज्यहोमे चैतत् सूक्तं विनियुक्तम् । तथा पौष्टिकविशेषे चित्राकर्मणि संपातितसारूपवत्सौदनप्राशनपलाशादिसमिदाधानरूपेऽस्य सूक्तस्य विनियोगः । तेजोव्रते चैतत् सूक्तं विनियुक्तम् । तथा पौष्टिक-मन्त्राणामुपधानोपस्थानयोर्विनियोगविधानेन तन्मध्यपातिनोऽस्य सूक्तस्य तत्रापि विनियोगः। (उपधानं नामाज्यादित्रयोदशद्रव्यहोमः ।) तथा सर्व-व्याधिष्वनेन सूक्तेनाज्यं हुत्वा दर्धपात्रं संपात्यानेनैव व्याधितशरीरं संमार्जयेत्। तथानेनैव सूक्तेन पुत्रकामार्थायाः स्त्रिया मृतापत्यायाश्च संपातितोदकावसेकं पुरोडाशभक्षणं कन्दुकक्रीडनमलंकारधारणं वा कारयेत् । तथोपाकर्मणि माणवकवाचने विनियुक्तम् । तथा राज्ञः पुष्पाभिषेके ये त्रिषप्ता इत्यृचा शाखादिभूतया पर्याहोमः कार्यः ।

तदेवमाथर्वणमन्त्राणां सिद्धमन्त्रत्वेनापरिमितवीर्यत्वप्रदर्शनार्थमादिमसूक्तस्य विस्तरतः सर्वेषु कर्मसूपलक्षणत्वेन सूत्रकृता विनियोगोऽभ्यधायि । ततः सर्वेषां मन्त्राणामभिलषितसर्वफलसाधनत्वं प्रत्येतव्यम् ।

ओ३म् ये त्रिषप्ताः परियन्ति विश्वा रूपाणि बिभ्रतः ।
वाचस्पतिर्बला तेषां तन्वो अद्य दधातु मे ॥ १ ॥
पुनरेहि वाचस्पते देवेन मनसा सह ।
वसोष्पते नि रमय मय्येवास्तु मयि श्रुतम् ॥ २ ॥
इहैवाभि वि तनूभे आर्त्नी इव ज्यया ।
वाचस्पतिर्नि यच्छतु मय्येवास्तु मयि श्रुतम् ॥ ३ ॥
उपहूतो वाचस्पतिरुपास्मान् वाचस्पतिर्ह्वयताम् ।
सं श्रुतेन गमेमहि मा श्रुतेन वि राधिषि ॥ ४ ॥

[ऋषिर्ब्रह्मा । द्यावापृथिवीयम् । आनुष्टुभं द्वितीया ककुम्मती]
इदं जनास इति सूक्तेन वन्ध्यायाः पुत्रप्रजननकर्मणि तस्याः शान्तौषधिसहितोदकाभिषेकं पुरोडाशकंदुकालंकारप्रदानं च कुर्यात् । तथानेन सूक्तेन पुष्टिकामः संपत्कामो वा द्यावापृथिव्योर्यागमुपस्थानं वा कुर्यात् । अत्राद्या दर्शपूर्णमासयोः पत्न्यञ्ज्जा उदपात्रनिनयने विनियुक्ता ।

इदं जनासो विदथ महद्ब्रह्म वदिष्यति ।
न तत् पृथिव्यां नो दिवि येन प्राणन्ति वीरुधः ॥ १ ॥
अन्तरिक्ष आसां स्थाम श्रान्तसदामिव ।
आस्थानमस्य भूतस्य विदुष्टद्वेधसो न वा ॥ २ ॥
यद्रोदसी रेजमाने भूमिश्च निरतक्षतम् ।
आर्द्रं तदद्य सर्वदा समुद्रस्येव स्रोत्याः ॥ ३ ॥

विश्वमन्याम॒भीवारं तद॒न्यस्या॒मधि॑श्रि॒तम्।
दि॒वे च॑ वि॒श्ववे॑दसे पृथि॒व्यै चा॑करं॒ नमः॑ ॥ ४ ॥

[ऋषिर्वेनः। ब्रह्मात्मदैवतम्। त्रैष्टुभम्। तृतीया जगती।]
'वेनस्तत्' इत्यस्याभिमतफलसिद्ध्यसिद्धिविज्ञानकर्मसु विनियोगः।...
अत्र "स नः पिता जनिता" इत्यस्या ऋचोऽग्निचयने षोडशगृहीतोत्तरार्धाज्येन वैश्वकर्मणहोमे विनियोगः।

वे॒नस्तत् प॑श्यत् पर॒मं गुहा॒ यद् यत्र॒ विश्वं॒ भव॒त्येक॑रूपम्।
इ॒दं पृश्नि॑रदुह॒ज्जाय॑माना॒: स्व॒र्विदो॑ अ॒भ्य॑नूषत॒ व्राः ॥ १ ॥

प्र तद् वो॑चेद॒मृत॑स्य वि॒द्वान् ग॑न्ध॒र्वो धाम॑ पर॒मं गुहा॒ यत्।
त्रीणि॑ प॒दानि॒ निहि॑ता॒ गुहा॑स्य॒ यस्तानि॒ वेद॒ स पि॒तुष्पि॒तास॑त् ॥ २ ॥

स नः॑ पि॒ता ज॑नि॒ता स उ॒त बन्धु॒र्धामा॑नि वेद॒ भुव॑नानि॒ विश्वा॑।
यो दे॒वानां॑ नाम॒ध एक॑ ए॒व तं सं॑प्र॒श्नं भुव॑ना यन्ति॒ सर्वा॑ ॥ ३ ॥

परि॒ द्यावा॑पृथि॒वी स॒द्य आ॑यमु॒पाति॑ष्ठे प्रथम॒जामृ॒तस्य॑।
वाच॑मिव व॒क्तरि॑ भुवने॒ष्ठा धा॒स्युरे॒ष न॒न्वे॒३॑षो अ॒ग्निः ॥ ४ ॥

परि॒ विश्वा॒ भुव॑नान्यायमृ॒तस्य॒ तन्तुं॒ वित॑तं दृ॒शे कम्।
यत्र॑ दे॒वा अ॒मृत॑मानशा॒नाः स॑मा॒ने योना॒ वध्यै॑रयन्त ॥ ५ ॥

[ऋषिर्भरद्वाजः । अष्टर्चम् । नानादेवत्यम् । त्रैष्टुभम् । द्वितीया जगती । सप्तम्यष्टमीचा अनुष्टुभौ ।]

'द्यावापृथिवी उरु' इतिसूक्तेनाभिचारकर्मणि दीक्षार्थं वेणुदण्डं वृश्चति। तथानेनैव सूक्तेन द्वेष्यनिषूदनकर्माणि दक्षिणाभिमुखं धावतः शत्रोः पदेषु वृक्षपत्राणि प्रक्षिप्य परशुना छित्वा सपांसून् पर्णच्छेदान् वधकपात्रे प्रक्षिप्यानीय भ्राष्ट्रे भर्जयेत् ।

द्यावापृथिवी उर्व१न्तरिक्षं क्षेत्रस्य पत्न्युरुगायोद्भुतः ।
उतान्तरिक्षमुरु वातगोपं त इह तप्यन्तां मयि तप्यमाने ॥१॥

इदं देवाः शृणुत ये यज्ञियाः स्थ भरद्वाजो मह्यमुक्थानि शंसति ।
पाशे स बद्धो दुरिते नि युज्यतां यो अस्माकं मन इदं हिनस्ति ॥२

इदमिन्द्र शृणुहि सोमप यत् त्वा हृदा शोचता जोहवीमि ।
वृश्चामि तं कुलिशेनेव वृक्षं यो अस्माकं मन इदं हिनस्ति ॥३॥

अशीतिभिस्तिसृभिः सामगेभिरादित्येभिर्वसुभिरङ्गिरोभिः ।
इष्टापूर्तमवतु नः पितॄणामामुं ददे हरसा दैव्येन ॥ ४ ॥

द्यावापृथिवी अनु मा दीधीथां विश्वे देवासो अनु मा रभध्वम् ।
अङ्गिरसः पितरः सोम्यासः पापमार्छत्वपकामस्य कर्ता ॥५॥

अतीव यो मरुतो मन्यते नो ब्रह्म वा यो निन्दिषत् क्रियमाणम् ।
तपूंषि तस्मै वृजिनानि सन्तु ब्रह्मद्विषं द्यौरभिसंतपाति ॥ ६ ॥

सप्त प्राणानष्टौ मन्यस्तांस्ते वृश्चामि ब्रह्मणा ।
अया यमस्य सादनमग्निदूतो अरंकृतः ॥ ७ ॥

आ दंधामि ते पदं समिद्धे जातवेदसि ।
अग्निः शरीरं वेवेष्ट्वसुं वागपिं गच्छतु ॥ ८ ॥

[पतिवेदनं सूक्तम्। अष्टर्चम्। आग्नीषोमीयम् । त्रैष्टुभम्। प्रथमा भुरिक्। द्वितीया पञ्चम्याद्याः सप्तम्यन्ताश्चानुष्टुभः। अष्टमी निचृत्पुरोष्णिक् ।]
' आ नो अग्ने ' इतिसूक्तेन पतिलाभकर्मण्यागमकृसरं संपात्य कुमारी-माशयेदित्यादिकम् ।

आ नो॑ अग्ने सुमतिं संभलो गमेदिमां कुमारीं सह नो भगेन ।
जुष्टा वरेषु समनेषु वल्गुरोषं पत्या सौभगमस्त्वस्यै ॥ १ ॥

सोमंजुष्टं ब्रह्मजुष्टमर्यम्णा संभृतं भगम् ।
धातुर्देवस्य सत्येन कृणोमि पतिवेदनम् ॥ २ ॥

इयमग्ने नारी पतिं विदेष्ट सोमो हि राजा सुभगां कृणोति ।
सुवाना पुत्रान् महिषी भवाति गत्वा पतिं सुभगा वि राजतु॥३॥

यथाखरो मघवंश्चारुरेष प्रियो मृगाणां सुषदा बभूव ।
एवा भगस्य जुष्टेयमस्तु नारी संप्रिया पत्याविराधयन्ती ॥४॥

भगस्य नावमा रोह पूर्णामनुपदस्वतीम् ।
तयोपप्रतारय यो वरः प्रतिकाम्यः ॥ ५ ॥

आ क्रन्दय धनपते वरमामनसं कृणु ।
सर्वं प्रदक्षिणं कृणु यो वरः प्रतिकाम्यः ॥ ६ ॥

इदं हिरण्यं गुल्गुल्वयमौक्षो अथो भगः ।
एते पतिभ्यस्त्वामदुः प्रतिकामाय वेत्तवे ॥ ७ ॥

आ ते नयतु सविता नयतु पतिर्यः प्रतिकाम्यः ।
त्वमस्यै धेह्योषधे ॥ ८ ॥

[ऋषिरथर्वा । नानादेवत्यमुताग्नेयम् । त्रैष्टुभम् । तृतीया चतुष्पदा भुरिक्पंक्तिः । पंचमी षष्ठी चानुष्टुभौ ।]

'अचिक्रदत्' इति सूक्तेन शत्रूत्सादितस्य राज्ञः पुनः स्वराष्ट्रप्रवेशार्थं शत्रुसेनाकारं पुरोडाशमुदकेषु दर्भान् संस्तीर्य तत्र निनयेत् । ततो निमज्जनार्थं तं पुरोडाशं लोष्टेन पूरयेत् । तथानेन सूक्तेन स्वराष्ट्रप्रवेशार्थं क्षीरोदनं संपात्याभिमन्त्र्य राजानमाशयेत् । अत्र 'अचिक्रदत्' इत्यस्य साकमेधाख्यपर्वणि पूर्वेद्युः क्रियमाणायामाग्नेय्यामिष्टयां प्रधानयागानुमन्त्रणे विनियोगः ।

अचिक्रदत् स्वपा इह भुवदग्ने व्यचस्व रोदसी उरूची ।
युञ्जन्तु त्वा मरुतो विश्ववेदस आमुं नय नमसा रातहव्यम् ॥१॥
दूरे चित् सन्तमरुषास इन्द्रमा च्यावयन्तु सख्याय विप्रम् ।
यद् गायत्रीं बृहतीमर्कमस्मै सौत्रामण्या दधृषन्त देवाः ॥ २ ॥
अद्भ्यस्त्वा राजा वरुणो ह्वयतु सोमस्त्वा ह्वयतु पर्वतेभ्यः ।
इन्द्रस्त्वा ह्वयतु विड्भ्य आभ्यः श्येनो भूत्वा विश आ पतेमाः॥३
श्येनो हव्यं नयत्वा परस्मादन्यक्षेत्रे अपरुद्धं चरन्तम् ।
अश्विना पन्थां कृणुतां सुगं त इमं सजाता अभिसंविशध्वम् ॥४॥
ह्वयन्तु त्वा प्रतिजनाः प्रति मित्रा अवृषत ।
इन्द्राग्नी विश्वे देवास्ते विशि क्षेममदीधरन् ॥ ५ ॥
यस्ते हवं विवदत् सजातो यश्च निष्ट्यः ।
अपाञ्चमिन्द्र तं कृत्वाथेममिहाव गमय ॥ ६ ॥

[ऋषिरथर्वा । छन्दः त्रैष्टुभम् । आद्या जगती चतुर्थीपञ्चम्यौ भुरिजौ]

'आ त्वा गन्' इतिसूक्तेन स्वराष्ट्रप्रवेशकर्मण्येव पूर्वसूक्तोक्तानि कर्माणि कुर्यात् । अत्र 'पथ्या रेवतीः' (७) इत्येषा प्रायणीयेष्ट्यां पथ्यास्वस्तियागानुमन्त्रणे विनियुक्ता ।

आ त्वा गन् राष्ट्रं सह वर्चसोदिहि प्राङ् विशां पतिरेकराट् त्वं वि राज ।
सर्वास्त्वा राजन् प्रदिशो ह्वयन्तूपसद्यो नमस्यो भवेह ॥१॥

त्वां विशो वृणतां राज्याय त्वामिमाः प्रदिशः पञ्च देवीः ।
वर्ष्मन् राष्ट्रस्य ककुदि श्रयस्व ततो न उग्रो वि भजा वसूनि ॥२॥

अच्छ त्वा यन्तु हविनः सजाता अग्निर्दूतो अजिरः सं चरातै ।
जायाः पुत्राः सुमनसो भवन्तु बहुं बलिं प्रति पश्यासा उग्रः ॥३॥

अश्विना त्वाग्रे मित्रावरुणोभा विश्वे देवा मरुतस्त्वा ह्वयन्तु ।
अधा मनो वसुदेयाय कृणुष्व ततो न उग्रो वि भजा वसूनि ॥४॥

आ प्र द्रव परमस्याः परावतः शिवे ते द्यावापृथिवी उभे स्ताम् ।
तदयं राजा वरुणस्तथाह स त्वायमह्वत् स उपेदमेहि ॥ ५ ॥

इन्द्रेन्द्र मनुष्याः३ परेहि सं ह्यज्ञास्था वरुणैः संविदानः ।
स त्वायमह्वत् स्वे सधस्थे स देवान् यक्षत् स उ कल्पयाद् विशः ॥६

पथ्या रेवतीर्बहुधा विरूपाः सर्वाः संगत्य वरीयस्ते अक्रन् ।
तास्त्वा सर्वाः संविदाना ह्वयन्तु दशमीमुग्रः सुमना वशेह ॥७॥

[ऋषिरथर्वा (पण्यकामः), अष्टर्चं वैश्वदेवमुतैन्द्राग्नं । त्रैष्टुभं, आद्या भुरिक्, चतुर्थी त्र्यवसाना षट्पदा बृहतीगर्भा विराडत्यष्टिः, पञ्चमी विराजगती, सप्तम्यनुष्टुप्, अष्टमी निचृत्]

'इन्द्रमहं वणिजम्' इति वाणिज्यलाभार्थं विनियुज्यते । विक्रयार्थं पण्यानि विपणिं नयन् वणिक् कर्म वाणिज्यलाभार्थं कुर्यात् । तथानेनैव सूक्तेन पण्यकाम इन्द्रं यजते, उपतिष्ठते वा । तथा क्रय्याच्छमने कर्मणि 'विश्वाहा ते' (८) इत्यृचा पूर्णाहुतिं जुहोति ।

इन्द्रमहं वणिजं चोदयामि स न ऐतु पुरएता नो अस्तु ।
नुदन्नरातिं परिपन्थिनं मृगं स ईशानो धनदा अस्तु मह्यम् ॥१॥

ये पन्थानो बहवो देवयाना अन्तरा द्यावापृथिवी संचरन्ति ।
ते मा जुषन्तां पयसा घृतेन यथा क्रीत्वा धनमाहराणि ॥२॥

इध्मेनाग्न इच्छमानो घृतेन जुहोमि हव्यं तरसे बलाय ।
यावदीशे ब्रह्मणा वन्दमान इमां धियं शतसेयाय देवीम् ॥३॥

इमामग्ने शरणिं मीमृषो नो यमध्वानमगाम दूरम् ।
शुनं नो अस्तु प्रपणो विक्रयश्च प्रतिपणः फलिनं मा कृणोतु ।
इदं हव्यं संविदानौ जुषेथां शुनं नो अस्तु चरितमुत्थितं च ॥४॥

येन धनेन प्रपणं चरामि धनेन देवा धनमिच्छमानः ।
तन्मे भूयो भवतु मा कनीयोऽग्ने सातघ्नो देवान् हविषा नि षेध॥५॥

येन धनेन प्रपणं चरामि धनेन देवा धनमिच्छमानः ।
तस्मिन् म इन्द्रो रुचिमा दधातु प्रजापतिः सविता सोमो अग्निः ॥ ६ ॥

उप॑ त्वा नम॑सा व॒यं होत॑र्वैश्वानर स्तु॒मः ।
स नः॑ प्र॒जास्वा॒त्मसु॒ गोषु॑ प्रा॒णेषु॑ जागृहि ॥ ७ ॥
वि॒श्वाहा॑ ते स॒दमिद्भ॑रेमा॒श्वा॑येव॒ तिष्ठ॑ते जातवेदः ।
रा॒यस्पोषे॑ण स॒मिषा॒ मद॑न्तो॒ मा ते॑ अग्ने प्रति॑वेशा रिषाम॥८॥

[ऋषिरथर्वा, सप्तर्चं चान्द्रमसं साम्मनस्यम् । आनुष्टुभं, पञ्चमी विराड्जगती, षष्ठीरस्तारपंक्तिः, सप्तमी त्रिष्टुप्]

'सहृदयं साम्मनुष्यम्' इति सूक्तेन साम्मनस्यकर्मणि ग्राममध्ये संपातितोदकुम्भनिनयनं, तद्वत् सुराकुम्भनिनयनं, त्रिवर्षवत्सिकाया गोः पिषितानां प्राशनं, संपातितान्नप्राशनं, संपातितसुरायाः पायनं । तथाविधप्रणोदकपायनं च कुर्यात् । तथोपाकर्मण्यप्याज्यहोमेऽस्य सूक्तस्य विनियोगः ।

सहृ॑दयं सांमनस्यमवि॑द्वेषं कृणोमि वः ।
अ॒न्यो अ॒न्यम॒भि ह॑र्यत व॒त्सं जा॒तमि॑वा॒घ्न्या ॥ १ ॥
अनु॑व्रतः पि॒तुः पु॒त्रो मा॒त्रा भ॑वतु॒ संम॑नाः ।
जा॒या पत्ये॒ मधु॑मतीं॒ वाचं॑ वदतु शन्ति॒वाम् ॥ २ ॥
मा भ्राता॒ भ्रात॑रं द्विक्ष॒न्मा स्वसा॑रमु॒त स्वसा॑ ।
स॒म्यञ्चः॒ सव्र॑ता भू॒त्वा वाचं॑ वदत भ॒द्रया॑ ॥ ३ ॥
येन॑ दे॒वा न वि॒यन्ति॒ नो च॑ विद्वि॒षते॑ मि॒थः ।
तत् कृ॑ण्मो॒ ब्रह्म॑ वो गृ॒हे सं॒ज्ञानं॒ पुरु॑षेभ्यः ॥ ४ ॥
ज्याय॑स्वन्तश्चि॒त्तिनो॒ मा वि यौ॑ष्ट संरा॒धय॑न्तः॒ सधु॑रा॒श्चर॑न्तः ।
अ॒न्यो अ॒न्यस्मै॑ व॒ल्गु वद॑न्त॒ एत॑ सध्री॒चीना॑न् वः॒ संम॑नस-
स्कृणोमि ॥ ५ ॥

समानी प्रपा सह वोऽन्नभागः समाने योक्त्रे सह वो युनज्मि।
सम्यञ्चोऽग्निं सपर्यतारा नाभिमिवाभितः ॥ ६ ॥
सध्रीचीनान् वः संमनसस्कृणोम्येकश्नुष्टीन्त्संवननेन सर्वान् ।
देवा इवामृतं रक्षमाणाः सायंप्रातः सौमनसो वो अस्तु ॥७॥

[ऋषिरथर्वाङ्गिराः, राज्याभिषेकं चान्द्रमसञ्चाप्यम् । आनुष्टुभम्, आद्या सप्तमी च भुरिक्त्रिष्टुभौ, तृतीया त्रिष्टुप्, पञ्चमी विराट्प्रस्तारपंक्तिः]

'भूतोभूतेषु' इति सूक्तेन महति लघौ वा राजाभिषेककर्मणि शान्त्युदककलशेनोदपात्रेण चाभिषेकं जपं च पुरोहितः कुर्यात्। तथा संपातितस्थालीपाकप्राशनमभिमन्त्रितमश्वमारोह्यापराजितदिशं प्रति गमनं च कारयेत्। तथा राजसूय आसंद्यारोहणे राजाभिषेके चैतत् सूक्तं।

भूतो भूतेषु पय आ दधाति स भूतानामधिपतिर्बभूव ।
तस्य मृत्युश्चरति राजसूयं स राजा राज्यमनु मन्यतामिदम् ॥१॥
अभि प्रेहि माप वेन उग्रश्चेत्ता सपत्नहा ।
आ तिष्ठ मित्रवर्धन तुभ्यं देवा अधि ब्रुवन् ॥ २ ॥
आतिष्ठन्तं परि विश्वे अभूषञ्छ्रियं वसानश्चरति स्वरोचिः ।
महत् तद् वृष्णो असुरस्य नामा विश्वरूपो अमृतानि तस्थौ ॥३॥
व्याघ्रो अधि वैयाघ्रे वि क्रमस्व दिशो महीः ।
विशस्त्वा सर्वा वाञ्छन्त्वापो दिव्याः पयस्वतीः ॥ ४ ॥
या आपो दिव्याः पयसा मदन्त्यन्तरिक्ष उत वा पृथिव्याम् ।
तासां त्वा सर्वासामपामभि षिञ्चामि वर्चसा ॥ ५ ॥

अभि त्वा [illegible]सिचन्नापो दिव्याः पयस्वतीः ।
यथासो मित्रवर्धनस्तथा त्वा सविता करत् ॥ ६ ॥

एना व्याघ्रं परिषस्वजानाः सिंहं हिन्वन्ति महते सौभगाय ।
समुद्रं न सुभुवस्तस्थिवांसं मर्मृज्यन्ते द्वीपिनमप्स्वऽन्तः ॥७॥

[ऋषिर्ब्रह्मा, नवर्चम् । सत्यानृतानुवीक्षणसूक्तं वारुणं त्रैष्टुभम् । आद्याऽनुष्टुप्, पञ्चमी भुरिक्, सप्तमी जगती, अष्टमी त्रिपदा महाबृहती, नवमी विराण्नामत्रिपाद्गायत्री]

'तत्र बृहन्नेषाम्' इत्याद्येन सूक्तेनाभिचारकर्मणि शत्रुं क्रोशन्तमनुब्रूयात् । धूमकेतूत्पातशान्तौ वारुणपशुप्रयोगे ' उतेयं भूमिः ' इत्येषा ।

बृहन्नेषामधिष्ठाता अन्तिकादिव पश्यति ।
यस्तायन्मन्यते चरन्त्सर्वं देवा इदं विदुः ॥ १ ॥

यस्तिष्ठति चरति यश्च वञ्चति यो निलायं चरति यः प्रतङ्कम् ।
द्वौ संनिषद्य यन्मन्त्रयेते राजा तद् वेद वरुणस्तृतीयः ॥२॥

उतेयं भूमिर्वरुणस्य राज्ञ उतासौ द्यौर्बृहती दूरेअन्ता ।
उतो समुद्रौ वरुणस्य कुक्षी उतास्मिन्नल्प उदके निलीनः॥३॥

उत यो द्यामतिसर्पात् परस्तान्न स मुच्यातै वरुणस्य राज्ञः।
दिव स्पशः प्र चरन्तीदमस्य सहस्राक्षा अति पश्यन्ति भूमिम् ॥ ४ ॥

सर्वं तद् राजा वरुणो वि चष्टे यदन्तरा रोदसी यत् परस्तात् ।
संख्याता अस्य निमिषो जनानामक्षानिव श्वघ्नी नि
मिनोति तानि ॥ ५ ॥

ये ते पाशा वरुण सप्तसप्त त्रेधा तिष्ठन्ति विषिता रुशन्तः ।
छिनन्तु सर्वे अनृतं वदन्तं यः सत्यवाद्यति तं सृजन्तु ॥६॥

शतेन पाशैरभि धेहि वरुणैनं मा ते मोच्यनृतवाङ् नृचक्षः ।
आस्तां जाल्म उदरं श्रंशयित्वा कोश इवाबन्धः परिकृत्य-
मानः ॥ ७ ॥

यः समाम्यो३ वरुणो यो व्याम्यो३ यः संदेश्यो३ वरुणो
यो विदेश्यः ।

यो दैवो वरुणो यश्च मानुषः ॥ ८ ॥

तैस्त्वा सर्वैरभि ष्यामि पाशैरसावामुष्यायणामुष्याः पुत्र ।
तानु ते सर्वाननुसंदिशामि ॥ ९ ॥

[ऋषिरथर्वा, एकादशकं वारुणम् । त्रैष्टुभम् । आद्या भुरिक्, तृतीया पंक्तिः, षष्ठी पञ्चपदातिशक्वरी, एकादशी त्र्यवसाना षट्पदात्यष्टिः]

सर्वसंपत्कर्मसु 'कथं महे ' इतिसूक्तेन मादानककाष्ठयुतं क्षीरौदनं संपात्याभिमन्त्र्याश्नाति । तथा तत्रैवानेन सूक्तेन चमसे सरूपवत्साया दुग्धे व्रीहियवाववधाय मूर्छयित्वा मध्वासिच्य संपात्याभिमन्त्र्याशयति ।

अथर्वा—

कथं महे असुरायाब्रवीरिह कथं पित्रे हरये त्वेषनृम्णः ।
पृश्निं वरुण दक्षिणां ददावान् पुनर्मघ त्वं मनसा चिकित्सीः ॥१॥

वरुणः—

न [illegible]न [illegible]नेमघो भवामि सं चक्षे कं पृश्निमता पाजे ।
केन नु त्वमथर्वन् काव्येन केन जातेनासि जातवेदाः ॥२॥

*सत्यमहं गंभीरः काव्येन सत्यं जातेनास्मि जातवेदाः ।
न मे दासो नार्यो महित्वा व्रतं मीमाय यदहं धरिष्ये ॥३॥

अथर्वा—

न त्वदन्यः कवितरो न मेधया धीरतरो वरुण स्वधावन् ।
त्वं ता विश्वा भुवनानि वेत्थ स चिन्नु त्वज्जनो मायी बिभाय ॥४॥

त्वं ह्य१ङ्ग वरुण स्वधावन् विश्वा वेत्थ जनिमा सुप्रणीते ।
किं रजस एना परो अन्यदस्त्येना किं परेणावरममुर ॥५॥

+एकं रजस एना परो अन्यदस्त्येना पर एकेन दुर्णशं चिदर्वाक् ।
तत् ते विद्वान् वरुण प्र ब्रवीम्यधोवचसः पणयो भवन्तु
नीचैर्दासा उप सर्पन्तु भूमिम् ॥ ६ ॥

त्वं ह्य१ङ्ग वरुण ब्रवीषि पुनर्मघेष्ववद्यानि भूरि ।
मो षु पणीँरभ्ये३तावतो भून्मा त्वा वोचन्नराधसं जनासः॥७॥

---

* इमामृचमथर्वा वक्तीति म्युरादय;। वरुण इति रॉथः।

+ इमामृचं वरुणो वक्तीति रॉथादयः। 'वरुण' इत्यस्य स्थाने 'वरुणः|' इति पाठं कल्पयन्ति ।

वरुणः—

मा मा वोचन्नराधसं जनासः पुनस्ते पृश्निं जरितर्ददामि ।
स्तोत्रं मे विश्वमा याहि शचीभिरन्तर्विश्वासु मानुषीषु दिक्षु॥८॥

अथर्वा—

आ ते स्तोत्राण्युद्यतानि यन्त्वन्तर्विश्वासु मानुषीषु दिक्षु ।
देहि नु मे यन्मे अदत्तो असि युज्यो मे सप्तपदः सखासि ॥९॥
समा नौ बन्धुर्वरुण समा जा वेदाहं तद्यन्नावेषा समा जा ।

वरुणः—

ददामि तद् यत् ते अदत्तो अस्मि युज्यस्ते सप्तपदः सखास्मि ॥१०॥
देवो देवाय गृणते वयोधा विप्रो विप्राय स्तुवते सुमेधाः ।

ऋषिः—

अजीजनो हि वरुण स्वधावन्नथर्वाणं पितरं देवबन्धुम् ।
तस्मा उ राधः कृणुहि सुप्रशस्तं सखा नो असि परमं च बन्धुः ॥ ११ ॥

[ऋषिरथर्वा सप्तदशकं ब्रह्मकर्मात्मदेवत्यम् । अतिशाक्वरम्.]

पौरोहित्यं करिष्यन् ' सविता प्रसवानाम् ' इतिसूक्तेन शूद्रेणाहृताः समिध आदधाति । तथास्य सूक्तस्य विवाह आज्यहोमे विनियोगः, तथा चातुर्मास्ये वैश्वदेवपर्वणि सावित्रं यागं ' सविता प्रसवानाम् ' इति ब्रह्मानुमन्त्रयेत ।

सविता प्रसवानामधिपतिः स मावतु ।

अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां।

चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ॥१॥

अग्निर्वनस्पतीनामधिपतिः स मावतु ।० ॥ २ ॥

द्यावापृथिवी दातॄणामधिपत्नी ते मावताम् ।० ॥ ३ ॥

वरुणोपामधिपतिः स मावतु ।० ॥ ४ ॥

मित्रावरुणौ वृष्ट्याधिपती तौ मावताम् ।० ॥ ५ ॥

मरुतः पर्वतानामधिपतयस्ते मावन्तु ।० ॥ ६ ॥

सोमो वीरुधामधिपतिः स मावतु ।० ॥ ७ ॥

वायुरन्तरिक्षस्याधिपतिः स ०।० ॥ ८ ॥

सूर्यश्चक्षुषामधिपतिः स ०।० ॥ ९ ॥

चन्द्रमा नक्षत्राणामधिपतिः स ०।० ॥ १० ॥

इन्द्रो दिवोधिपतिः स ०।० ॥ ११ ॥

मरुतां पिता पशूनामधिपतिः स ।०। ॥ १२ ॥

मृत्युः प्रजानामधिपतिः स ०।० ॥ १३ ॥

यमः पितॄणामधिपतिः स मावतु ।० ॥ १४ ॥

पितरः परे ते मावन्तु ।० ॥ १५ ॥

तता अर्वरे ते ०।० ॥ १६ ॥

ततामहास्ते मावन्तु ।

अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां ।

चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा॥१७॥

[ऋषिरथर्वा । प्रथमाद्वितीये चान्द्रमस्यौ तृतीया त्वाष्ट्री । आनुष्टुभम्]

'तेन भूतेन' इतितृचेन विवाह आज्यं हुत्वा वरवध्वोर्मूर्ध्नि संपातानानयेत् । तथा तत्रैव कर्मणि तेनैव तृचेन रसान् स्थालीपाकं च संपात्याभिमन्त्र्य भोजनसमये जायापती प्राशयेत् । तथा तस्मिन्नेव कर्मण्यनेन तृचेनाज्यमिश्रैर्यवैरञ्जलिं परिपूर्य जुहुयात् ।

तेन भूतेन हविषायमा प्यायतां पुनः ।
जायां यामस्मा आवाक्षुस्तां रसेनाभि वर्धताम् ॥ १ ॥

अभि वर्धतां पयसाभि राष्ट्रेण वर्धताम् ।
रय्या सहस्रवर्चसेमौ स्तामनुपक्षितौ ॥ २ ॥

त्वष्टा जायामजनयत् त्वष्टास्यै त्वां पतिम् ।
त्वष्टा सहस्रमायूंषि दीर्घमायुः कृणोतु वाम् ॥ ३ ॥

[ऋषिरथर्वा (ब्रह्मवर्चस्कामः) । द्व्यर्चम् । आत्मदेवत्यम् । त्रैष्टुभं, द्वितीया विराजगती]

'धीती वा ये' इति द्वाभ्यामृग्भ्यामर्थोत्थापनविघ्नशमनकर्मण्या- ज्यसमित्पुरोडाशादिशष्कुल्यन्तानां त्रयोदशानां द्रव्याणामन्यतमं जुहुया- ज्जपेद् वा । तथा सर्वफलकाम आभ्यामृग्भ्यामिन्द्राग्नी यजत उपतिष्ठते वा ।

धीती वा ये अनयन् वाचो अग्रं मनसा वा येऽवदन्नृतानि ।
तृतीयेन ब्रह्मणा वावृधानास्तुरीयेणामन्वत नाम धेनोः ॥१॥
स वेद पुत्रः पितरं स मातरं स सूनुर्भुवत् स भुवत् पुनर्मघः ।
स द्यामौर्णोदन्तरिक्षं स्व१ः स इदं विश्वमभवत् स आभवत् ॥२॥

[ऋषिः कुत्सः । चतुश्चत्वारिंशत् । अध्यात्मदेवत्यम् । त्रैष्टुभम् । १ उपरिष्टाद्विराड्बृहती; २ बृहतीगर्भानुष्टुप्; ५ भुरिगनुष्टुप्; ८, १४, १९–२१, २३, २५, २९, ३१–३४, ३७, ३८, ४१, ४३ अनुष्टुभः; ७ पराबृहती; १० अनुष्टुब्गर्भा; ११ जगती; १२ पुरोबृहती त्रिष्टुब्गर्भार्षी पंक्तिः; १५, २७. भुरिग्बृहत्यौ; २२ पुरौष्णिक्; २६ द्व्युष्णिग्गर्भानुष्टुप् ; ३० भुरिक्; ३९ बृहतीगर्भा; ४२ विराड्गायत्री]

'यो भूतं' इति सूक्तं स्कम्भदेवताकं । अत्र स्कम्भस्य ज्येष्ठत्वं, सर्वेषामाश्रयभूतत्वं च दृश्यते ।

यो भूतं च भव्यं च सर्वं यश्चाधितिष्ठति ।
स्व१र्यस्य च केवलं तस्मै ज्येष्ठाय ब्रह्मणे नमः ॥१॥
स्कम्भेनेमे विष्टभिते द्यौश्च भूमिश्च तिष्ठतः ।
स्कम्भ इदं सर्वमात्मन्वद् यत् प्राणन्निमिषच्च यत् ॥२॥

तिस्रो ह प्रजा अत्यायमायन् न्य१न्या अर्कमभितो विशन्त ।
बृहन् ह तस्थौ रजसो विमानो हरितो हरिणीरा विवेश ॥३॥

द्वादश प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत ।
तत्राहतास्त्रीणि शतानि शङ्कवः षष्टिश्च खीला अविचाचला ये॥४॥

इदं सवितर्वि जानीहि षड् यमा एक एकजः ।
तस्मिन् हापित्वमिच्छन्ते य एषामेक एकजः ॥ ५ ॥

आविः सन्निहितं गुहा जरन्नाम महत् पदम् ।
तत्रेदं सर्वमार्पितमेजत् प्राणत् प्रतिष्ठितम् ॥ ६ ॥

एकचक्रं वर्तत एकनेमि सहस्राक्षरं प्र पुरो नि पश्चा ।
अर्धेन विश्वं भुवनं जजान यदस्यार्धं क्व १ तद्बभूव ॥ ७ ॥

पञ्चवाही वहत्यग्रमेषां प्रष्टयो युक्ता अनुसंवहन्ति ।
अयातमस्य ददृशे न यातं परं नेदीयो वरं दवीयः ॥८॥

तिर्यग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन् यशो निहितं विश्वरूपम् ।
तदासत ऋषयः सप्त साकं ये अस्य गोपा महतो बभूवुः॥९॥

या पुरस्ताद् युज्यते या च पश्चाद् या विश्वतो युज्यते या च सर्वतः।
यया यज्ञः प्राङ् तायते तां त्वा पृच्छामि कतमा सर्चाम् ॥१०॥

यदेजति पतति यच्च तिष्ठति प्राणदप्राणन्निमिषच्च यद् भुवत् ।
तद् दाधार पृथिवीं विश्वरूपं तत् संभूय भवत्येकमेव ॥११॥

अनन्तं विततं पुरुत्रानन्तमन्तवच्चा समन्ते ।
ते नाकपालश्चरति विचिन्वन् विद्वान् भूतमुत भव्यमस्य ॥१२॥

प्रजापतिश्चरति गर्भे अन्तरदृश्यमानो बहुधा वि जायते ।
अर्धेन विश्वं भुवनं जजान यदस्यार्धं कतमः स केतुः ॥१३॥

ऊर्ध्वं भरन्तमुदकं कुम्भेनेवोदहार्यम् ।
पश्यन्ति सर्वे चक्षुषा न सर्वे मनसा विदुः ॥ १४ ॥

दूरे पूर्णेन वसति दूर ऊनेन हीयते ।
महद् यक्षं भुवनस्य मध्ये तस्मै बलिं राष्ट्रभृतो भरन्ति ॥१५॥

यतः सूर्य उदेत्यस्तं यत्र च गच्छति ।
तदेव मन्येऽहं ज्येष्ठं तदु नात्येति किं चन । १६ ॥

ये अर्वाङ् मध्य उत वा पुराणं वेदं विद्वांसमभितो वदन्ति ।
आदित्यमेव ते परि वदन्ति सर्वे अग्निं द्वितीयं त्रिवृतं च
हंसम् ॥१७॥

सहस्राह्ण्यं वियतावस्य पक्षौ हरेर्हंसस्य पततः स्वर्गम् ।
स देवान्त्सर्वानुरस्युपदद्य संपश्यन् याति भुवनानि विश्वा॥१८॥

सत्येनोर्ध्वस्तपति ब्रह्मणार्वाङ् वि पश्यति ।
प्राणेन तिर्यङ् प्राणति यस्मिन् ज्येष्ठमधि श्रितम् ॥ १९ ॥

यो वै ते विद्यादरणी याभ्यां निर्मथ्यते वसु ।
स विद्वान् ज्येष्ठं मन्येत स विद्याद् ब्राह्मणं महत् ॥ २० ॥
अपादग्रे समभवत् सो अग्रे स्वऽ१रा भरत् ।
चतुष्पाद् भूत्वा भोग्यः सर्वमादत्त भोजनम् ॥ २१ ॥
भोग्यो भवदथो अन्नमदद् बहु ।
यो देवमुत्तरावन्तमुपासातै सनातनम् ॥ २२ ॥
सनातनमेनमाहुरुताद्य स्यात् पुनर्णवः ।
अहोरात्रे प्र जायेते अन्यो अन्यस्य रूपयोः ॥ २३ ॥
शतं सहस्रमयुतं न्यर्बुदमसंख्येयं स्वमस्मिन् निविष्टम् ।
तदस्य घ्नन्त्यभिपश्यत एव तस्माद् देवो रोचत एष एतत्॥२४॥
बालादेकमणीयस्कमुतैकं नेव दृश्यते ।
ततः परिष्वजीयसी देवता सा मम प्रिया ॥ २५ ॥
इयं कल्याण्य१जरा मर्त्यस्यामृता गृहे ।
यस्मै कृता शये स यश्चकार जजार सः ॥ २६ ॥
त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी ।
त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवसि विश्वतोमुखः॥२७॥
उतैषां पितोत वा पुत्र एषामुतैषां ज्येष्ठ उत वा कनिष्ठः ।
एको ह देवो मनसि प्रविष्टः प्रथमो जातः स उ गर्भे अन्तः॥२८॥

पूर्णात् पूर्णमुदंचति पूर्णं पूर्णेन सिच्यते ।
उतो तदद्य विद्याम यतस्तत् परिषिच्यते ॥ २९ ॥

एषा सनत्नी सनमेव जातैषा पुराणी परि सर्वं बभूव ।
मही देव्यु१षसो विभाती सैकेनैकेन मिषता वि चंष्टे ॥३०॥

अविर्वै नाम देवतर्तेनास्ते परीवृता ।
तस्या रूपेणेमे वृक्षा हरिता हरितस्रजः ॥ ३१ ॥

अन्ति सन्तं न जहात्यन्ति सन्तं न पश्यति ।
देवस्य पश्य काव्यं न ममार न जीर्यति ॥ ३२ ॥

अपूर्वेणेषिता वाचस्ता वदन्ति यथायथम् ।
वदन्तीर्यत्र गच्छन्ति तदाहुर्ब्राह्मणं महत् ॥ ३३ ॥

यत्रदेवाश्च मनुष्याश्चारा नाभाविव श्रिताः ।
अपां त्वा पुष्पं पृच्छामि यत्र तन्मायया हितम् ॥ ३४ ॥

येभिर्वात इषितः प्रवाति ये ददन्ते पञ्चदिशः सध्रीचीः ।
य आहुतिमत्यमन्यन्त देवा अपां नेतारः कतमे त आसन् ॥३५॥

इमामेषां पृथिवीं वस्त एकोन्तरिक्षं पर्येको बभूव ॥
दिवमेषां ददते यो विधर्ता विश्वा आशाः प्रति रक्षन्त्येके ॥३६॥

यो विद्यात् सूत्रं विततं यस्मिन्नोताः प्रजा इमाः ।
सूत्रं सूत्रस्य यो विद्यात् स विद्याद् ब्राह्मणं महत् ॥ ३७ ॥

वेदाहं सूत्रं विततं यस्मिन्नोताः प्रजा इमाः ।
सूत्रं सूत्रस्याहं वेदाथो यद् ब्राह्मणं महत् ॥ ३८ ॥

यदन्तरा द्यावापृथिवी अग्निरैत् प्रदहन् विश्वदाव्यः ।
यत्रातिष्ठन्नेकपत्नीः परस्तात् क्वेवासीन्मातरिश्वा तदानीम् ॥३९॥

अप्स्वासीन्मातरिश्वा प्रविष्टः प्रविष्टा देवाः सलिलान्यासन् ।
बृहन् ह तस्थौ रजसो विमानः पवमानो हरित आ विवेश ॥४०॥

उत्तरेणेव गायत्रीममृतेधि वि चक्रमे ।
साम्ना ये साम संविदुरजस्तद् ददृशे क्व ॥ ४१ ॥

निवेशनः संगमनो वसूनां देव इव सविता सत्यधर्मा ।
इन्द्रो न तस्थौ समरे धनानाम् ॥ ४२ ॥

पुण्डरीकं नवद्वारं त्रिभिर्गुणेभिरावृतम् ।
तस्मिन् यद् यक्षमात्मन्वत् तद् वै ब्रह्मविदो विदुः ॥ ४३ ॥

अकामो धीरो अमृतः स्वयंभू रसेन तृप्तो न कुतश्चनोनः ।
तमेव विद्वान् न बिभाय मृत्योरात्मानं धीरमजरं युवानम् ॥४४॥

[ऋषिरथर्वा । त्रिषष्टिर्भौमं त्रैष्टुभं । २ भुरिक्; ४–६, १०, ३८ त्र्यवसानाः षट्पदा जगत्यः; ७ प्रस्तारपंक्तिः; ८, ११ त्र्यवसाने षट्पदे विराडष्टी; ९ परानुष्टुप्; १२, १३, १५ पञ्चपदाः शक्वर्यः (१२, १३ त्र्यवसाने); १४ महाबृहती; १६, २१ प्रथमावसाने साम्न्यौ त्रिष्टुभौ; १८ त्र्यवसाना षट्पदा त्रिष्टुबनुष्टुब्गर्भातिशक्वरी; १९, २० उरोबृहत्यै। (२० विराट्); २२ त्र्यवसाना षट्पदा विराडतिजगती; २३ पञ्चपदा विराडतिजगती; २४ पञ्चपदानुष्टुब्गर्भा जगती २५ त्र्यवसाना सप्तपदा उष्णिगनुष्टुब्गर्भा शक्वरी; २६–२८, ३३, ३५, ३९, ४०, ५०, ५३, ५४, ५६, ५९, ६३. अनुष्टुभः (५३ पुरोबार्हता); ३० विराड्गायत्री; ३२ पुरस्ताज्ज्योतिः; ३४ त्र्यवसाना षट्पदा त्रिष्टुब्बृहतीगर्भातिजगती; ३६ विपरीतपादलक्ष्मी–पंक्तिः; ३७ त्र्यवसाना पञ्चपदा शक्वरी; ४१ त्र्यवसाना षट्पदा ककुम्मती शक्वरी; ४२ स्वराडनुष्टुप्; ४३ विराडष्टारपंक्तिः; ४४, ४५, ४९ जगत्यः; ४६ षट्पदानुष्टुब्गर्भा पराशक्वरी; ४७ षट्पदा उष्णीगनुष्टुब्गर्भा परातिशक्वरी; ४८ पुरोऽनुष्टुप्; ५१ त्र्यवसाना षट्पदानुष्टुब्गर्भा ककुम्मती शक्वरी; ५२ पञ्चपदाऽनुष्टुब्गर्भा परातिजगती; ५७ पुरोऽतिजागता जगती; ५८ पुरस्ताद्बृहती; ६१ पुरोबार्हता; ६२ पराविराट्]

पृथिवीसूक्तमेतत् । अस्मिन् पृथिव्याः प्रभूतं निसर्गवर्णनम्। संप्रदायानुसारेण तु सूक्तं बहुविधं विनियुज्यते । सत्यं बृहदित्यनुवाको वास्तोष्पत्यगणे पठितः । तथाग्राहायणीकर्मणि विनियुक्तम् । तथा ग्राम-पत्तनादिरक्षार्थमनेनानुवाकेन चतुरहः पुरोडाशानश्मोत्तरान्कृत्वा ग्रामादि-कोणेषु निखनति । तथा भूमिचलनेऽस्यानुवाकस्य होमे विनियोगः । तथा सोमयज्ञे दीक्षितनियमेषु मूत्रपुरीषशुद्ध्यर्थं लोष्टादानेऽस्य विनियोगः। तथा " पार्थिवीं भूमिकामस्य" इति [नक्षत्रकल्पे १७] विहितायां पार्थिव्यां महाशान्ता अस्यानुवाकस्य विनियोगः ।

सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति ।
सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु ॥१॥

असंबाधं बंध्यतो मानवानां यस्यां उद्वतः प्रवतः समं बहु ।
नानावीर्या ओषधीर्या बिभर्ति पृथिवी नः प्रथतां राध्यतां नः॥२॥

यस्यां समुद्र उत सिन्धुरापो यस्यामन्नं कृष्टयः संबभूवुः ।
यस्यामिदं जिन्वति प्राणदेजत् सा नो भूमिः पूर्वपेये दधातु॥३॥

यस्याश्चतस्रः प्रदिशः पृथिव्या यस्यामन्नं कृष्टयः संबभूवुः ।
या बिभर्ति बहुधा प्राणदेजत् सा नो भूमिर्गोष्वप्यन्ने दधातु॥४॥

यस्यां पूर्वे पूर्वजना विचक्रिरे यस्यां देवा असुरानभ्यवर्तयन्।
गवामश्वानां वयसश्च विष्ठा भगं वर्चः पृथिवी नो दधातु ॥५॥

विश्वंभरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी ।
वैश्वानरं बिभ्रती भूमिरग्निमिन्द्रऋषभा द्रविणे नो दधातु ॥६॥

यां रक्षन्त्यस्वप्ना विश्वदानीं देवा भूमिं पृथिवीमप्रमादम् ।
सा नो मधु प्रियं दुहामथो उक्षतु वर्चसा ॥ ७ ॥

यार्णवेधि सलिलमग्र आसीद् यां मायाभिरन्वचरन् मनीषिणः।
यस्या हृदयं परमे व्योमन्त्सत्येनावृतममृतं पृथिव्याः ।
सा नो भूमिस्त्विषिं बलं राष्ट्रे दधातूत्तमे ॥ ८ ॥

यस्यामापः परिचराः समानीरहोरात्रे अप्रमादं क्षरन्ति ।
सा नो भूमिर्भूरिधारा पयो दुहामथो उक्षतु वर्चसा ॥ ९ ॥

यामश्विनावमिमातां विष्णुर्यस्यां विचक्रमे ।
इन्द्रो यां चक्र आत्मनेऽनमित्रां शचीपतिः ।
सा नो भूमिर्वि सृजतां माता पुत्राय मे पयः ॥ १० ॥

गिरयस्ते पर्वता हिमवन्तोऽरण्यं ते पृथिवि स्योनमस्तु ।
बभ्रुं कृष्णां रोहिणीं विश्वरूपां ध्रुवां भूमिं पृथिवीमिन्द्रगुप्ताम् ।
अजीतोऽहतो अक्षतोऽध्यष्ठां पृथिवीमहम् ॥ ११ ॥

यत् ते मध्यं पृथिवि यच्च नभ्यं यास्त ऊर्जस्तन्वः संबभूवुः ।
तासु नो धेह्यभि नः पवस्व माता भूमिः पुत्रो अहं पृथिव्याः ।
पर्जन्यः पिता स उ नः पिपर्तु ॥ १२ ॥

यस्यां वेदिं परिगृह्णन्ति भूम्यां यस्यां यज्ञं तन्वते विश्वकर्माणः।
यस्यां मीयन्ते स्वरवः पृथिव्यामूर्ध्वाः शुक्रा आहुत्याः पुरस्तात्।
सा नो भूमिर्वर्धयद् वर्धमाना ॥ १३ ॥

यो नो द्वेषत् पृथिवि यः पृतन्याद् योऽभिदासान्मनसा यो वधेन।
तं नो भूमे रन्धय पूर्वकृत्वरि ॥ १४ ॥

त्वज्जातास्त्वयि चरन्ति मर्त्यास्त्वं बिभर्षि द्विपदस्त्वं चतुष्पदः।
तवेमे पृथिवि पञ्च मानवा येभ्यो ज्योतिरमृतं मर्त्येभ्य उद्यन्त्सु-
र्यो रश्मिभिरातनोति ॥ १५ ॥

ता नः प्रजाः सं दुह्रतां समग्रा वाचो मधु पृथिवि धेहि मह्यम् ॥१६॥

विश्वस्वं मातरमोषधीनां ध्रुवां भूमिं पृथिवीं धर्मणा धृताम् ।
शिवां स्योनामनु चरेम विश्वहा ॥ १७ ॥

महत् सधस्थं महती बभूविथ महान् वेग एजथुर्वेपथुष्टे ।
महांस्त्वेन्द्रो रक्षत्यप्रमादम् ।
सा नो भूमे प्र रोचय हिरण्यस्येव संदृशि मा नो द्विक्षत कश्चन॥१८॥

अग्निर्भूम्यामोषधीष्वग्निमापो बिभ्रत्यग्निरश्मसु ।
अग्निरन्तः पुरुषेषु गोष्वश्वेष्वग्नयः १९ ॥

अग्निर्दिव आ तपत्यग्नेर्देवस्योर्वन्तरिक्षम् ।
अग्निं मर्तास इन्धते हव्यवाहं घृतप्रियम् ॥ २० ॥

अग्निवासाः पृथिव्यसितज्ञुस्त्विषीमन्तं संशितं मा कृणोतु ॥२१॥

भूम्यां देवेभ्यो ददति यज्ञं हव्यमरंकृतम् ।
भूम्यां मनुष्या जीवन्ति स्वधयान्नेन मर्त्याः ।
सा नो भूमिः प्राणमायुर्दधातु जरदष्टिं मा पृथिवी कृणोतु ॥२२॥

यस्ते गन्धः पृथिवि संबभूव यं बिभ्रत्योषधयो यमापः ।
यं गन्धर्वा अप्सरसश्च भेजिरे तेन मा सुरभिं कृणु मा नो
द्विक्षत कश्चन ॥ २३ ॥

यस्ते गन्धः पुष्करमाविवेश यं संजभ्रुः सूर्याया विवाहे ।
अमर्त्याः पृथिवि गन्धमग्रे तेन मा सुरभिं कृणु मा नो द्विक्षत
कश्चन ॥ २४ ॥

यस्ते गन्धः पुरुषेषु स्त्रीषु पुंसु भगो रुचिः ।
यो अश्वेषु वीरेषु यो मृगेषूत हस्तिषु ।
कन्यायां वर्चो यद् भूमे तेनास्माँ अपि सं सृज
मा नो द्विक्षत कश्चन ॥२५॥
शिला भूमिरश्मा पांसुः सा भूमिः संधृता धृता ।
तस्यै हिरण्यवक्षसे पृथिव्या अकरं नमः ॥ २६ ॥
यस्यां वृक्षा वानस्पत्या ध्रुवास्तिष्ठन्ति विश्वहा ।
पृथिवीं विश्वधायसं धृतामच्छावदामसि ॥ २७ ॥
उदीराणा उतासीनास्तिष्ठन्तः प्रक्रामन्तः ।
पद्भ्यां दक्षिणसव्याभ्यां मा व्यथिष्महि भूम्याम् ॥ २८ ॥
विमृग्वरीं पृथिवीमा वदामि क्षमां भूमिं ब्रह्मणा वावृधानाम् ।
ऊर्जं पुष्टं बिभ्रतीमन्नभागं घृतं त्वाभि नि षीदेम भूमे ॥२९॥
शुद्धा न आपस्तन्वे क्षरन्तु यो नः सेदुरप्रिये तं नि दध्मः ।
पवित्रेण पृथिवि मोत् पुनामि ॥ ३० ॥
यास्ते प्राचीः प्रदिशो या उदीचीर्यास्ते भूमे अधराद् याश्च पश्चात् ।
स्योनास्ता मह्यं चरते भवन्तु मा नि पप्तं भुवने शिश्रियाणः ॥३१॥
मा नः पश्चान्मा पुरस्तान्नुदिष्ठा मोत्तरादधरादुत ।
स्वस्ति भूमे नो भव मा विदन् परिपन्थिनो वरीयो यावया
वधम् ३२ ॥

यावंत् तेभि विपश्यामि भूमे सूर्येण मेदिना ।
तावन्मे चक्षुर्मा मेष्टोत्तरामुत्तरां समाम् ॥ ३३ ॥

यच्छयानः पर्यावर्ते दक्षिणं सव्यमभि भूमे पार्श्वम् ।
उत्तानास्त्वा प्रतीचीं यत् पृष्ठीभिरधिशेमहे ।
मा हिंसीस्तत्र नो भूमे सर्वस्य प्रतिशीवरि ॥ ३४ ॥

यत् ते भूमे विखनामि क्षिप्रं तदपि रोहतु ।
मा ते मर्म विमृग्वरि मा ते हृदयमर्पिपम् ॥ ३५ ॥

ग्रीष्मस्ते भूमे वर्षाणि शरद्धेमन्तः शिशिरो वसन्तः ।
ऋतवस्ते विहिता हायनीरहोरात्रे पृथिवि नो दुहाताम् ॥३६॥

यापं सर्पं विजमाना विमृग्वरी यस्यामासन्नग्नयो ये अप्स्व१न्तः।
परा दस्यून् ददती देवपीयूनिन्द्रं वृणाना पृथिवी न वृत्रम् ।
शक्राय दध्रे वृषभाय वृष्णे ॥ ३७ ॥

यस्यां सदोहविर्धाने यूपो यस्यां निमीयते ।
ब्रह्माणो यस्यामर्चन्त्यृग्भिः साम्ना यजुर्विदः ।
युज्यन्ते यस्यामृत्विजः सोममिन्द्राय पातवे ॥ ३८ ॥

यस्यां पूर्वे भूतकृत ऋषयो गा उदानृचुः ।
सप्त सत्रेण वेधसो यज्ञेन तपसा सह ॥ ३९ ॥

सा नो भूमिरा दिशतु यद्धनं कामयामहे ।
भगो अनुप्रयुङ्क्तामिन्द्र एतु पुरोगवः ॥ ४० ॥

यस्यां गायन्ति नृत्यन्ति भूम्यां मर्त्या व्यैलबाः ।
युध्यन्ते यस्यामाक्रन्दो यस्यां वदति दुन्दुभिः ।
सा नो भूमिः प्र णुदतां सपत्नानसपत्नं मां पृथिवी कृणोतु ॥४१॥

यस्यामन्नं व्रीहियवौ यस्यां इमाः पञ्च कृष्टयः ।
भूम्यै पर्जन्यपत्न्यै नमोऽस्तु वर्षमेदसे ॥ ४२ ॥

यस्याः पुरो देवकृताः क्षेत्रे यस्यां विकुर्वते ।
प्रजापतिः पृथिवीं विश्वगर्भामाशामाशां रण्यां नः कृणोतु ॥४३॥

निधिं बिभ्रती बहुधा गुहा वसु मणिं हिरण्यं पृथिवी ददातु मे ।
वसूनि नो वसुदा रासमाना देवी दधातु सुमनस्यमाना ॥४४॥

जनं बिभ्रती बहुधा विवाचसं नानाधर्माणं पृथिवी यथौकसम् ।
सहस्रं धारा द्रविणस्य मे दुहां ध्रुवेव धेनुरनपस्फुरन्ती ॥४५॥

यस्ते सर्पो वृश्चिकस्तृष्टदंश्मा हेमन्तजब्धो भृमलो गुहा शये ।
क्रिमिर्जिन्वत् पृथिवि यद्यदेजति प्रावृषि तन्नः सर्पन्मोप सृपद्
यच्छिवं तेन नो मृड ॥ ४६ ॥

ये ते पन्थानो बहवो जनायना रथस्य वर्त्मानसश्च यातवे ।
यैः संचरन्त्युभये भद्रपापास्तं पन्थानं जयेमानमित्रमतस्करं
यच्छिवं तेन नो मृड ॥ ४७ ॥

मल्वं बिभ्रती गुरुभृद् भद्रपापस्य निधनं तितिक्षुः ।
वराहेण पृथिवी संविदाना सूकराय वि जिहीते मृगाय ॥४८॥

ये त आरण्याः पशवो मृगा वने हिताः सिंहा व्याघ्राः पुरुषादश्चरन्ति
उलं वृकं पृथिवि दुच्छुनामित ऋक्षीकां रक्षो अप बाधयास्मत्
॥ ४९ ॥

ये गन्धर्वा अप्सरसो ये चारायाः किमीदिनः ।
पिशाचान्त्सर्वा रक्षांसि तानस्मद् भूमे यावय ॥ ५० ॥

यां द्विपादः पक्षिणः संपतन्ति हंसाः सुपर्णाः शकुना वयांसि ।
यस्यां वातो मातरिश्वेयते रजांसि कृण्वंश्च्यावयंश्च वृक्षान् ।
वातस्य प्रवामुपवामनु वात्यर्चिः ॥ ५१ ॥

यस्यां कृष्णमरुणं च संहिते अहोरात्रे विहिते भूम्यामधि ।
वर्षेण भूमिः पृथिवी वृतावृता सा नो दधातु भद्रया प्रिये धामनि
निधामनि ॥ ५२ ॥

द्यौश्च म इदं पृथिवी चान्तरिक्षं च मे व्यचः ।
अग्निः सूर्य आपो मेधां विश्वे देवाश्च सं ददुः ॥ ५३ ॥

अहमस्मि सहमान उत्तरो नाम भूम्याम् ।
अभीषाडस्मि विश्वाषाडाशामाशां विषासहिः ॥ ५४ ॥

अदो यद् देवि प्रथमाना पुरस्ताद् देवैरुक्ता व्यसर्पो महित्वम् ।
आ त्वा सुभूतमविशत् तदानीमकल्पयथाः प्रदिशश्चतस्रः ॥ ५५ ॥

ये ग्रामा यदरण्यं याः सभा अधि भूम्याम् ।
ये संग्रामाः समितयस्तेषु चारु वदेम ते ॥ ५६ ॥

अश्वं इव रजो दुधुवे वि तान् जनान् य आक्षियन् पृथिवीं यादजायत
मन्द्राग्रेत्वरी भुवनस्य गोपा वनस्पतीनां गृभिरोषधीनाम् ॥ ५७ ॥

यद् वदामि मधुमत् तद् वदामि यदीक्षे तद् वनन्ति मा ।
त्विषीमानस्मि जूतिमानवान्यान् हन्मि दोधतः ॥ ५८ ॥

शन्तिवा सुरभिः स्योना कीलालोध्नी पयस्वती ।
भूमिरधि ब्रवीतु मे पृथिवी पयसा सह ॥ ५९ ॥

यामन्वैच्छद्धविषा विश्वकर्मान्तरर्णवे रजसि प्रविष्टाम् ।
भुजिष्यं १ पात्रं निहितं गुहा यदाविर्भोगे अभवन्मातृमद्भ्यः ॥६०॥

त्वमस्यावपनी जनानामदितिः कामदुघा पप्रथाना ।
यत् त ऊनं तत् त आ पूरयाति प्रजापतिः प्रथमजा ऋतस्य ॥६१॥

उपस्थास्ते अनमीवा अयक्ष्मा अस्मभ्यं सन्तु पृथिवि प्रसूताः ।
दीर्घं न आयुः प्रतिबुध्यमाना वयं तुभ्यं बलिहृतः स्याम ॥६२॥

भूमे मातर्नि धेहि मा भद्रया सुप्रतिष्ठितम् ।
संविदाना दिवा कवे श्रियां मा धेहि भूत्याम् ॥ ६३ ॥

[ऋषिर्भृगुः । दशकं । मंत्रोक्तसर्वात्मककालदेवत्यम् । आनुष्टुभं ।
१–४ त्रिष्टुभः; ५ निचृत्पुरस्ताद् बृहती ।]

' कालो अश्वो वहति ' इति सूक्तस्य सौवर्णभूमिदान आज्यहोमे विनियोगः । कालप्रतिपादकत्वात्कालसूक्तमित्युच्यते ।

कालो अश्वो वहति सप्तरश्मिः सहस्राक्षो अजरो भूरिरेताः ।
तमा रोहन्ति कवयो विपश्चितस्तस्य चक्रा भुवनानि विश्वा ॥१॥

सप्त चक्रान् वहति काल एष सप्तास्य नाभीरमृतं न्वक्षः ।
स इमा विश्वा भुवनान्यञ्जत् कालः स ईयते प्रथमो नु देवः ॥२॥
पूर्णः कुम्भोधि काल आहितस्तं वै पश्यामो बहुधा नु सन्तः ।
स इमा विश्वा भुवनानि प्रत्यङ्कालं तमाहुः परमे व्योमन् ॥३॥

स एव सं भुवनान्याभरत्स एव सं भुवनानि पर्यैत् ।
पिता सन्नभवत्पुत्र एषां तस्माद्वै नान्यत्परमस्ति तेजः ॥ ४ ॥

कालोमूं दिवमजनयत्काल इमाः पृथिवीरुत ।
काले ह भूतं भव्यं चेषितं ह वि तिष्ठते ॥ ५ ॥

कालो भूमिमसृजत काले तपति सूर्यः ।
काले ह विश्वा भूतानि काले चक्षुर्वि पश्यति ॥ ६ ॥

काले मनः काले प्राणः काले नाम समाहितम् ।
कालेन सर्वा नन्दन्त्यागतेन प्रजा इमाः ॥७॥

काले तपः काले ज्येष्ठं काले ब्रह्म समाहितम् ।
कालो ह सर्वस्येश्वरो यः पितासीत्प्रजापतेः ॥८॥

तेनेषितं तेन जातं तदु तस्मिन्प्रतिष्ठितम् ।
कालो ह ब्रह्म भूत्वा बिभर्ति परमेष्ठिनम् ॥ ९ ॥

कालः प्रजा असृजत कालो अग्रे प्रजापतिम् ।
स्वयंभूः कश्यपः कालात्तपः कालादजायत ॥ १० ॥

ब्राह्मणानि

वैदिक पाठावली

ताण्ड्यमहाब्राह्मणम्

[गायत्री-आख्यायिका]

साध्या वै नाम देवा आसन्। ते सर्वेण यज्ञेन सह स्वर्गं लोकमायन्। ते देवाश्छन्दांस्यब्रुवन्—सोममाहरतेति। ते जगतीं प्राहिण्वन्। सा त्रीण्यक्षराणि हित्वैकाक्षरा भूत्वागच्छत्। त्रिष्टुभं प्राहिण्वन्। सैकमक्षरं हित्वा त्र्यक्षरा भूत्वागच्छत्। गायत्रीं प्राहिण्वन्। चतुरक्षराणि वै तर्हि छन्दांस्यासन्। सा तानि चाक्षराणि हरन्त्यागच्छदष्टाक्षरा भूत्वा, त्रीणि च सवनानि—हस्ताभ्यां द्वे सवने, दन्तैर्दंष्ट्वा तृतीयसवनम्। तस्माद् द्वे अंशुमती सवने। धीतं तृतीयसवनम्। दन्तैर्हि तद्दंष्ट्वा धयन्त्यहरत्। तस्य ये ह्रियमाणस्यांशवः परापतंस्ते पूतीका अभवन्। यानि पुष्पाण्यवाशीयन्त तान्यर्जुनानि। यत्प्राप्रोथत् ते प्रप्रोथाः। तस्मात्तृतीयसवन आशिरमवनयन्ति यमेव तं गावः सोममदन्ति। तस्य तं रसमवनयन्ति ससोमत्वाय ॥ १ ॥

ते त्रिष्टुब्जगत्यौ गायत्रीमब्रूतामुप त्वायावेति। साब्रवीत् किं मे ततः स्यादिति। यत्कामयस इत्यब्रूताम्। सा ब्रवीन्मम सर्वं प्रातःसवनम्। अहमुत्तरे सवने प्रणयानीति। तस्माद्गायत्रं प्रातःसवनं गायत्र्युत्तरे सवने प्रणयति ॥ २ ॥

तां त्रिष्टुप् त्रिभिरक्षरैरुपैत्। सैकादशाक्षरा भूत्वा प्राजा-

यत । तां जगत्येकेनाक्षरेणोपैत् । सा द्वादशाक्षरा भूत्वा प्राजायत ॥ ३ ॥

तस्मादाहुर्गायत्री वाव सर्वाणि छन्दांसि । गायत्री ह्येतान् पोषान् पुष्यन्त्यैदिति ॥ ४ ॥

[कल्याणाङ्गिरसस्याख्यायिका]

आङ्गिरसो वै सत्रमासत। तेषामाप्तः स्पृतः स्वर्गो लोक आसीत्। पन्थानं तु देवयानं न प्राजानन्। तेषां कल्याण आङ्गिरसो ध्यायमुदव्रजत्। स ऊर्णायुं गन्धर्वमप्सरसां मध्ये प्रेङ्खयमाणमुपैत्। स ईयामिति यां यामभ्यादिशत् सैनमकामयत। तमभ्यवदत् कल्याणा३ इत्याप्तो वै वः स्पृतः स्वर्गो लोकः। पन्थानं तु देवयानं न प्रजानीथ। इदं साम स्वर्ग्यं तेन स्तुत्वा स्वर्गं लोकमेष्यथ। मा तु वोचोऽहमदर्शमिति ॥ १० ॥

स ऐत् कल्याणः। सोऽब्रवीदाप्तो वै नः स्पृतः स्वर्गो लोकः। पन्थानं तु देवयानं न प्रजानीम। इदं साम स्वर्ग्यं, तेन स्तुत्वा स्वर्गं लोकमेष्याम इति। कस्तेऽवोचदित्य भवादर्शमिति। तेन स्तुत्वा स्वर्गलोकमायन्। अहीयत कल्याणः। अनृतं हि सोऽवदत्। स एषः श्वित्रः। ॥ ११ ॥

[शिशुराङ्गिरसस्याख्यायिका]

शिशुर्वा आङ्गिरसो मन्त्रकृतां मन्त्रकृदासीत । स पितॄन् पुत्रका इत्यामन्त्रयत । तं पितरोऽब्रुवन्–अधर्मं करोषि यो नः पितॄन् सतः पुत्रका इत्यामन्त्रयस इति । सोऽब्रवीदहं वाव पितास्मि यो मन्त्रकृदस्मीति । ते देवेष्वपृच्छन्त । ते देवा अब्रुवन्–एष वाव पिता यो मन्त्रकृदिति । तद्वै स उदजयत् । उज्जयति शैशवेन तुष्टुवानः ॥ २५ ॥

[यतीनामाख्यायिका]

इन्द्रो यतीन् सालावृकेयेभ्यः प्रायच्छत् । तेषां त्रय उदशिष्यन्त । पृथुरश्मिर्बृहद्गिरी रायोवाजः । तेऽब्रुवन्—को न इमान् पुत्रान् भरिष्यतीति । अहमितीन्द्रोऽब्रवीत् । तानधिनिधाय परिचार्य्य चरन् वर्धयंस्तान् वर्धयित्वाब्रवीत् । कुमारका वरान् वृणीध्वमिति । क्षत्रं मह्यमित्यब्रवीत् पृथुरश्मिः । तस्मा एतेन पार्थरश्मेन क्षत्रं प्रायच्छत् । क्षत्रकाम एतेन स्तुवीत, क्षत्रस्येवास्य प्रकाशो भवति । ब्रह्मवर्चसं मह्यमित्यब्रवीद् बृहद्गिरिः । तस्मा एतेन बार्हद्गिरेण ब्रह्मवर्चसं प्रायच्छत् । ब्रह्मवर्चसकाम एतेन स्तुवीत, ब्रह्मवर्चसी भवति । पशून् मह्यमित्यब्रवीद् रायोवाजः । तस्मा एतेन रायोवाजीयेन पशून् प्रायच्छत् । पशुकाम एतेन स्तुवीत, पशुमान् भवति ॥ १७॥

पार्थुरश्मं राजन्याय ब्रह्मसाम कुर्यात् । बार्हद्गिरं ब्राह्मणाय । रायोवाजीयं वैश्याय । स्वेनैवैनांस्तद्रूपेण समर्धयति स्तोमः ॥ १८ ॥

[वत्सस्याख्य...]

वत्सश्च वै मेधातिथिश्च काण्वावास्ताम्। तं वत्सं मेधातिथिराक्रोशत्। अब्राह्मणोऽसि शूद्रापुत्र इति। सोऽब्रवीत्-ऋतेनाग्निं व्ययाव, यतरो नौ ब्रह्मीयानिति। वात्सेन वत्सो व्यैत्, मैधातिथेन मेधातिथिः। तस्य न (?) लोम च नौषत्। तद्वाव स तर्ह्यकामयत। कामसनि साम वात्सम्। काममेवैतेनावरुन्धे॥ ६॥

[वासिष्ठस्याख्यायिका]

ऋषयो वा इन्द्रं प्रत्यक्षं नापश्यन् । स वसिष्ठोऽकामयत कथमिन्द्रं प्रत्यक्षं पश्येयमिति । स एत निहवमपश्यत् । ततो वै स इन्द्रं प्रत्यक्षमपश्यत् । स एनमब्रवीत् । ब्राह्मणं ते वक्ष्यामि यथा त्वत्पुरोहिता भरताः प्रजनिष्यन्ते, अथ मान्येभ्य ऋषिभ्यो मा प्रवोच इति । तस्मा एतान् स्तोमभागानब्रवीत्ततो वै वसिष्ठ-पुरोहिता भरताः प्राजायन्त । सेन्द्रं वा एतत्साम यदेतत्साम भवति सेन्द्रत्वाय ॥ २४ ॥

[देवासुराणामाख्यायिका]

देवाश्च वा असुराश्चास्पर्धन्त । ते न व्यजयन्त । तेऽब्रुवन् वाचो मिथुनेन विजयामहै, यतरे नो वाचो मिथुनं न प्रतिविन्दाँस्ते पराभवानिति। ते देवा 'एकः' इत्यब्रुवन्। 'एका' इत्यसुरा वाचो मिथुनं प्रत्यविन्दन् । 'द्वौ' इति देवा अब्रुवन्। 'द्वे' इत्यसुरा वाचो मिथुनं प्रत्यविन्दन् । 'त्रयः' इति देवा अब्रुवन्। 'तिस्रः' इत्यसुरा वाचो मिथुनं प्रत्यविन्दन् । 'चत्वारः' इति देवा अब्रुवन् । 'चतस्रः' इत्यसुरा वाचो मिथुनं प्रत्यविन्दन्। पंच इति देवा अब्रुवन्। नासुरा अविन्दन् । ततो देवा अवभवन् परासुराः ॥ २ ॥

[इन्द्ररुशमयोराख्यायिका]

इन्द्रश्च रुशमा चाजिं प्रास्येतां यतरो नौ पूर्वो भूमिं पर्येति स जयतीति। भूमिमिन्द्रः पर्यैत्, कुरुक्षेत्रं रुशमा। साब्रवीदजैषं त्वा इति। अहमेव त्वामजैषमितीन्द्रोऽब्रवीत्। तौ देवेष्वपृच्छताम्। ते देवा अब्रुवन्—एतावती वाव प्रजापतेर्वेदिर्यावत् कुरुक्षेत्रमिति तौ न व्याजयेताम् ॥ २ ॥

ऐतरेयब्राह्मणम्

शौनःशेपाख्यानम्

हरिश्चन्द्रो ह वैधस ऐक्ष्वाको राजापुत्र आस। तस्य ह शतं जाया बभूवुः। तासु पुत्रं न लेभे। तस्य ह पर्वतनारदौ गृह ऊषतुः। स ह नारदं पप्रच्छ।

यं न्विमं पुत्रमिच्छन्ति ये विजानन्ति ये च न।
किंस्वित्पुत्रेण विन्दते तन्म आचक्ष्व नारद ॥ १ ॥

इति। स एकया पृष्टो दशभिः प्रत्युवाच।

ऋणमस्मिन्संनयत्यमृतत्वं च गच्छति।
पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम् ॥ १ ॥
यावन्तः पृथिव्यां भोगा यावन्तो जातवेदसि।
यावन्तो अप्सु प्राणिनां भूयान्पुत्रे पितुस्ततः ॥ २ ॥
शश्वत्पुत्रेण पितरोऽत्यायन्बहुलं तमः।
आत्मा हि जज्ञ आत्मनः स इरावत्यतितारिणी ॥ ३ ॥
किं नु मलं किमजिनं किमु श्मश्रूणि किं तपः।
पुत्रं ब्रह्माण इच्छध्वं स वै लोकोऽवदावदः ॥ ४ ॥
अन्नं ह प्राणः शरणं ह वासो रूपं हिरण्यं पशवो विवाहाः।
सखा ह जाया कृपणं ह दुहिता ज्योतिर्ह पुत्रः परमे व्योमन् ॥५॥
पतिर्जायां प्रविशति गर्भो भूत्वा स मातरम्।
तस्यां पुनर्नवो भूत्वा दशमे मासि जायते ॥ ६ ॥
तज्जाया जाया भवति यदस्यां जायते पुनः।
आभूतिरेषा भूतिर्बीजमेतन्निधीयते ॥ ७ ॥

देवाश्चैतामृषयश्च तेजः समभरन् महत् ।
देवा मनुष्यानब्रुवन्नेषा वो जननी पुनः ॥ ८ ॥
नापुत्रस्य लोकोऽस्तीति तत्सर्वे पशवो विदुः ।
तस्मात्तु पुत्रो मातरं स्वसारं चाधिरोहति ॥ ९ ॥
एष पन्था उरुगायः सुशेवो यं पुत्रिण आ॰ मन्ते ॰िशोकाः
तं पश्यन्ति पशवो वयांसि च तस्मात्ते मात्रापि मिथुनी भवन्ति।१॰
इति हास्मा आख्याय ॥ १३ ॥

अथैनमुवाच । वरुणं राजानमुपधाव । पुत्रो मे जायत तेन त्वा यजा इति । तथेति । स वरुणं राजान॰ पससार पुत्रो मे जायतां तेन त्वा यजा इति । तथेति । तस्य ह पुत्रो जज्ञे रोहितो नाम । तं होवाचाजनि वै ते पुत्रो य॰॰ माने नेति । स होवाच । यदा वै पशुर्निर्दशो भवत्यथ स मेध्यो भवति । निर्दशो न्वस्त्वथ त्वा यजा इति । तथेति । स ॰ निर्दश आस । तं होवाच । निर्दशो न्वभूद्यजस्व मानेनेति । स होवाच । यदा वै पशोर्दन्ता जायन्तेऽथ स मेध्यो भवति । दन्ता न्वस्य जायन्तामथ त्वा यजा इति । तथेति । तस्य ह दन्ता जज्ञिरे । तं होवाचाज्ञत वा अस्य दन्ता यजस्व माने नेति । स होवाच । यदा वै पशोर्दन्ताः पद्यन्तेऽथ स मेध्यो भवति । दन्ता न्वस्य पद्यन्तामथ त्वा यजा इति । तथेति । तस्य ह दन्ताः पेदिरे । तं होवाचापत्सत वा अस्य दन्ता यजस्व मानेनेति । स होवाच । यदा वै पशो॰न्ताः ॰नर्जायन्तेऽथ स मेध्यो भवति । दन्ता न्वस्य पुनर्जा॰यन्त॰॰थ त्वा यजा इति । तथेति । तस्य ह दन्ताः पुनर्जज्ञिरे । तं होवाचाज्ञत वा अस्य पुनर्दन्ता यजस्व मानेनेति । स होवाच । यदा वै क्षत्रियः सांनाहुको भवत्यथ स मेध्यो भवति । संनाहं नु प्राप्नोत्वथ

त्वा यजा इति । तथेति । स ह संनाहं प्रापत् । तं होवाच । संनाहं नु प्राप्य अन्येन मानेनेति । स तथेत्युक्त्वा पुत्रमामन्त्रयामास । ततायं वै मह्यं त्वामददात् । हन्त त्वया इमं यजा इति । स ह नेत्युक्त्वा धनुरादायारण्यमुपातस्थौ । स संवत्सरमरण्ये चचार ॥ १४ ॥

अथ हैक्ष्वाकं वरुणो जग्राह । तस्य होदरं जज्ञे । तदु ह रोहितः शुश्राव । सोऽरण्याद्ग्राममेयाय । तमिन्द्रः पुरुषरूपेण पर्येत्योवाच ।

नानाश्रान्ताय श्रीरस्तीति रोहित शुश्रुम ।
पापो नृषद्वरो जन इन्द्र इच्चरतः सखा ॥

चरैवेति चरैवेति वै मा ब्राह्मणोऽवोचत् । इति ह द्वितीयं संवत्सरमरण्ये चचार । सोऽरण्याद्ग्राममेयाय । तमिन्द्रः पुरुषरूपेण पर्येत्योवाच ।

पुष्पिण्यौ चरतो जङ्घे भूष्णुरात्मा फलग्रहिः ।
शेरेऽस्य सर्वे पाप्मानः श्रमेण प्रपथे हताः ॥

चरैवेति चरैवेति वै मा ब्राह्मणोऽवोचत् । इति ह तृतीयं संवत्सरमरण्ये चचार । सोऽरण्याद्ग्राममेयाय । तमिन्द्रः पुरुषरूपेण पर्येत्योवाच ।

आस्ते भग आसीनस्योर्ध्वस्तिष्ठति तिष्ठतः ।
शेते निपद्यमानस्य चराति चरतो भगः ॥

चरैवेति चरैवेति वै मा ब्राह्मणोऽवोचत् । इति ह चतुर्थं संवत्सरमरण्ये चचार । सोऽरण्याद्ग्राममेयाय । तमिन्द्रः पुरुषरूपेण पर्येत्योवाच ।

कलिः शयानो भवति संजिहानस्तु द्वापरः ।
उत्तिष्ठंस्त्रेता भवति कृतं संपद्यते चरन् ॥

चरैवेति चरैवेति वै मा ब्राह्मणोऽवोचत्। इति ह षष्ठं संवत्सरमरण्ये चचार। सोऽरण्याद्ग्राममेयाय। तमिन्द्रः पुरुषरूपेण पर्येत्योवाच।

चरन्वै मधु विन्दति चरन्स्वादुमुदुम्बरम्।
सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरन्॥

चरैवेति चरैवेति वै मा ब्राह्मणोऽवोचत्। इति ह षष्ठं संवत्सरमरण्ये चचार। सोऽजीगर्तं सौयवसिमृषिमशनया परीतमरण्य उपेयाय। तस्य ह त्रयः पुत्रा आसुः—शुनःपुच्छः शुनःशेपः शुनोलाङ्गूल इति। तं होवाच। ऋषेऽहं ते शतं ददामि। अहमेषामेकेनात्मानं निष्क्रीणा इति। स ज्येष्ठं पुत्रं निगृह्णान उवाच। न न्विममिति। नो एवेममिति कनिष्ठं माता। तौ ह मध्यमे संपादयांचक्रतुः शुनःशेपे। तस्य ह शतं दत्त्वा स तमादाय सोऽरण्याद्ग्राममेयाय। स पितरमेत्योवाच। तत हन्ताहमनेनात्मानं निष्क्रीणा इति। स वरुणं राजानमुपससारानेन त्वा यजा इति। तथेति। भूयान्वै ब्राह्मणः क्षत्रियादिति वरुण उवाच। तस्मा एतं राजसूयं यज्ञक्रतुं प्रोवाच। तमेतमभिषेचनीये पुरुषं पशुमालेभे॥ १५॥

तस्य ह विश्वामित्रो होतासीज्जमदग्निरध्वर्युर्वसिष्ठो ब्रह्माऽयास्य उद्गाता। तस्मा उपाकृताय नियोक्तारं न विविदुः। स होवाचाजीगर्तः सौयवसिर्मह्यमपरं शतं दत्ताहमेनं नियोक्ष्यामीति। तस्मा अपरं शतं ददुः। तं स नि नियोज। तस्मा उपाकृताय नियुक्तायाप्रीताय पर्यग्निकृताय विशसितारं न विविदुः। स होवाचाजीगर्तः सौयवसिः। मह्यमपरं शतं दत्ताहमेनं विशसिष्यामीति। तस्मा अपरं शतं ददुः। सोऽसिं निःशान एयाय। अथ ह शुनःशेप ईक्षांचक्रेऽमानुषमिव वै मा

विशसिष्य न्त न्ताह देवता उपध ामीति । स प्रज पतिमव प्रथमं देवतानामुपससार 'कस्य नूनं कतमस्यामृतानामि'त्येतयर्चा (१. २४, १) । तं प्रजापतिरुवाच । अग्निर्वै देवानां नेदिष्ठस्तमेवोपधावेति । सोऽग्निमुपससार 'अग्नेर्वयं प्रथमस्यामृतानामि'त्येतयर्चा (१. २४, २)। तमग्निरुवाच । सविता वै प्रसवानामीशे तमेवोपधावेति । स सवितारमुपससार 'अभि त्वा देव सवितरि'त्येतेन तृचेन (१, २४, ३-५) । तं सवितोवाच । वरुणाय वै राज्ञे नियुक्तोऽसि तमेवोपधावेति । स वरुणं राजानमुपससारात उत्तराभिरेकत्रिंशता । तं वरुण उवाच । अग्निर्वै देवानां मुखं सुहृदयतमस्तं नु स्तुह्यथ त्वोत्स्रक्ष्याम इति । सोऽग्निं तुष्टावात उत्तराभिर्द्वाविंशत्या । तमग्निरुवाच । विश्वान्नु देवान्स्तुह्यथ त्वोत्स्रक्ष्याम इति । स विश्वान्देवांस्तुष्टाव 'नमो महद्भ्यो नमो अर्भकेभ्य' इत्येतयर्चा । (१, २७, १३) तं विश्वे देवा ऊचुः । इन्द्रो वै देवानामोजिष्ठो बलिष्ठः सहिष्ठः सत्तमः पारयिष्णुतमस्तं नु स्तुह्यथ त्वोत्स्रक्ष्याम इति । स इन्द्रं तुष्टाव 'यच्चिद्धि सत्य सोमपा' इति चैतेन सूक्तेनोत्तरस्य च पञ्चदशभिः (१. २९, १-३०, १५) । तस्मा इन्द्रःस्तूयमानः प्रीतो मनसा हिरण्यरथं ददौ । तमेतया प्रतीयाय 'शश्वदिन्द्र' (१, ३०, १६) इति । तमिन्द्र उवाच । अश्विनौ नु स्तुह्यथ त्वोत्स्रक्ष्याम इति । सोऽश्विनौ तुष्टावात उत्तरेण तृचेन । तमश्विना ऊचतुः । उषसं नु स्तुह्यथ त्वोत्स्रक्ष्याम इति । स उषसं तुष्टावात उत्तरेण तृचेन । तस्य ह स्मर्च्यृच्युक्तायां वि पाशो मुमुचे । कनीय ऐक्ष्वाकस्योदरं भवति । उत्तमस्यामेवर्च्युक्तायां वि पाशो मुमुचे । अगद ऐक्ष्वाक आस ॥ १६ ॥

तमृत्विज ऊचुः। त्वमेव नोऽस्याह्नः संस्थामधिगच्छेति। अथ हैतं शुनःशेपोऽञ्जःसवं ददर्श। तमेताभिश्चतसृभिरभिसुषाव 'यच्चिद्धि त्वं गृहेगृहे' (१, २८, ५–८) इति। अथैनं द्रोणकलशमभ्यवनिनाय 'उच्छिष्टं चम्वोर्भर' इत्येतयर्चा (१, २८, ९)। अथ हास्मिन्नन्वारब्धे पूर्वाभिश्चतसृभिः सस्वाहाकाराभिर्जुहवां चकार। अथैनमवभृथमभ्यवनिनाय 'त्वं नो अग्ने वरुणस्य विद्वानि'त्येताभ्याम् (४, १, ४·५)। अथैनमत ऊर्ध्वमग्निमाहवनीयमुपस्थापयां चकार 'शुनश्चिच्छेपं निदितं सहस्रादि'ति (५, २, ७)। अथ ह शुनःशेपो विश्वामित्रस्याङ्कमाससाद। स होवाचाजीगर्तः सौयवसिः। ऋषे पुनर्मे पुत्रं देहीति। नेति होवाच विश्वामित्रो देवा वा इमं मह्यमरासतेति। स ह देवरातो वैश्वामित्र आस। तस्यैते कापिलेयबाभ्रवाः। स होवाचाजीगर्तः सौयवसिः। त्वं वेहि विह्वयावहा इति। स होवाचाजीगर्तः सौयवसिः।

आङ्गिरसो जन्मनास्याजीगर्तिः श्रुतः कविः।
ऋषे पैतामहात्तन्तोर्मापगाः पुनरेहि माम्॥

इति। स होवाच शुनःशेपः।

अदर्शुस्त्वा शासहस्तं न यच्छूद्रेष्वलप्सत।
गवां त्रीणि शतानि त्वमवृणीथा मदङ्गिरः॥

इति। स होवाचाजीगर्तः सौयवसिः।

तद्वै मा तात तपति पापं कर्म मया कृतम्।
तदहं निह्नवे तुभ्यं प्रति यन्तु शता गवाम्॥

इति। स होवाच शुनःशेपः।

यः सकृत्पापकं कुर्यात्कुर्यादेनस्ततोऽपरम्।
नापागाः शौद्रान्न्यायादसंधेयं त्वया कृतम्॥

इति। असंधेयमिति ह विश्वामित्र उपपपाद। स होवाच विश्वामित्रः।

भीम एव सौयवसिः शासेन विशिशासिषुः।
अस्थान्मैतस्य पुत्रो भूर्ममैवोपेहि पुत्रताम्॥

इति। स होवाच शुनःशेपः।

स वै यथा नो ज्ञपया राजपुत्र तथा वद।
यथैवाङ्गिरसः सन्नुपेयां तव पुत्रताम्॥

इति। स होवाच विश्वामित्रः।

ज्येष्ठो मे त्वं पुत्राणां स्यास्तव श्रेष्ठा प्रजा स्यात्।
उपेया दैवं मे दायं तेन वै त्वोपमन्त्रये॥

इति। स होवाच शुनःशेपः।

संज्ञानानेषु वै ब्रूयाः सौहार्द्याय मे श्रियै।
यथाहं भरतऋषभोपेयां तव पुत्रताम्॥

इति। अथ ह विश्वामित्रः पुत्रानामन्त्रयामास।

मधुच्छन्दाः शृणोतन ऋषभो रेणुरष्टकः।
ये के च भ्रातरः स्थ नास्मै ज्यैष्ठ्याय कल्पध्वम्॥

इति॥ १७॥

तस्य ह विश्वामित्रस्यैकशतं पुत्रा आसुः। पञ्चाशदेव ज्यायांसो मधुच्छन्दसः पञ्चाशत्कनीयांसः। तद्ये ज्यायांसो न ते कुशलं मेनिरे।ताननु व्याजहार। अन्तान्वः प्रजा भक्षीष्टेति। त एतेऽन्ध्राः पुण्ड्राः शबराः पुलिन्दा मूतिबा इत्युदन्त्या बहवो भवन्ति वैश्वामित्रा दस्यूनां भूयिष्ठाः। स होवाच मधुच्छन्दाः पञ्चाशता सार्धम्।

यन्नः पिता संजानीते तस्मिंस्तिष्ठामहे वयम् ।
पुरस्त्वा सर्वे कुर्महे त्वामन्वञ्चो वयं स्मसि ।

इति । अथ ह विश्वामित्रः प्रतीतः पुत्रांस्तुष्टाव ।

ते वै पुत्राः पशुमन्तो वीरवन्तो भविष्यथ ।
ये मानं मेऽनुगृह्णन्तो वीरवन्तमकर्त मा ॥
पुरएत्रा वीरवन्तो देवरातेन गाथिनाः ।
सर्वे राध्याः स्थ पुत्रा एष वः सद्विवाचनम् ॥
एष वः कुशिका वीरो देवरातस्तमन्वित ।
युष्मांश्च दायं म उपेता विद्यां यामु च विद्मसि ॥
ते सम्यञ्चो वैश्वामित्राः सर्वे साकं सरातयः ।
देवरातय तस्थिरे धृत्यै श्रैष्ठ्याय गाथिनाः ॥
अधीयत देवरातो रिक्थयोरुभयोर्ऋषिः ।
जह्नूनां चाधिपत्ये दैवे वेदे च गाथिनाम् ॥

तदेतत्परऋक्शतगाथं शौनःशेपमाख्यानम् । तद्धोता राज्ञेऽभिषिक्तायाचष्टे । हिरण्यकशिपावासीन आचष्टे, हिरण्यकशिपावासीनः प्रतिगृणाति । यशो वै हिरण्यं यशसैवैनं तत् समर्द्धयति । ओमित्यृचः प्रतिगर एवं तथेति गाथायाः । ओमिति वै दैवं तथेति मानुषम् । दैवेन चैवैनं तन् मानुषेण च पापादेनसः प्रमुञ्चति तस्माद्यो राजा विजिती स्यादप्ययजमान आख्यापयेतैवैतच्छौनःशेपमाख्यानम् । न हास्मिन्नल्पं चनैनः परिशिष्यते । सहस्रमाख्यात्रे दद्यात्, शतं प्रतिगरित्रे, एते चैवासने, श्वेतश्चाश्वतरीरथो होतुः । पुत्रकामा हाप्याख्यापयेरल्लँभन्ते ह पुत्राल्लँभन्ते ह पुत्रान् ॥ १८ ॥

ऐन्द्रो महाभिषेकः

अथात ऐन्द्रो महाभिषेकः । ते देवा अब्रुवन् सप्रजापतिका, —अयं वै देवानामोजिष्ठो बलिष्ठः सत्तमः पारयिष्णुतमः । इममेवाभिषिञ्चामहा इति । तथेति । तद्वै तदिन्द्रमेव । तस्मा एतामासन्दीं समभरन् ऋचं नाम । तस्यै बृहच्च रथन्तरं च पूर्वौ पादावकुर्वन् । वैरूपं च वैराजं चापरौ । शाक्वररैवते शीर्षण्ये । नौधसं च कालेयं चानूच्ये । ऋचः प्राचीनातानान् सामानि तिरश्चीनवायान् । यजूंष्यतीकाशान् । यश आस्तरणं । श्रियमुपबर्हणं । तस्यै सविता च बृहस्पतिश्च पूर्वौ पादावधारयतां । वायुश्च पूषा चापरौ । मित्रावरुणौ शीर्षण्ये । अश्विनावनूच्ये । स एतामासन्दीमारोहत् ।

वसवस्त्वा गायत्रेण च्छन्दसा त्रिवृता स्तोमेन रथन्तरेण साम्नारोहन्तु, तानन्वारोहामि साम्राज्याय । रुद्रास्त्वा त्रैष्टुभेन च्छन्दसा पञ्चदशेन स्तोमेन बृहता साम्नारोहन्तु, तानन्वारोहामि भौज्याय । आदित्यास्त्वा जागतेन च्छन्दसा सप्तदशेन स्तोमेन वैरूपेण साम्नारोहन्तु, तानन्वारोहामि स्वाराज्याय । विश्वे त्वा देवा आनुष्टुभेन च्छन्दसैकविंशेन स्तोमेन वैराजेन साम्नारोहन्तु, तानन्वारोहामि वैराज्याय । साध्याश्च त्वाप्त्याश्च देवाः पाङ्क्तेन च्छन्दसा त्रिणवेन स्तोमेन शाक्वरेण साम्नारोहन्तु, तानन्वारोहामि राज्याय । मरुतश्च त्वाङ्गिरसश्च देवा अतिच्छन्दसा छन्दसा त्रयस्त्रिंशेन स्तोमेन रैवतेन साम्नारोहन्तु, तानन्वारोहामि पारमेष्ठ्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठायारोहामीत्येतामासन्दीमारोहत् ।

तमेतस्यामासन्द्यामासीनं विश्वे देवा अब्रुवन्–न वा अनभ्युत्क्रुष्ट इन्द्रो वीर्यं कर्तुमर्हति, अभ्येनमुत्क्रोशामेति। तथेति। तं विश्वे देवा अभ्युदक्रोशन्–इमं देवा अभ्युत्क्रोशत. सम्राजं साम्राज्यं, भोजं भोजपितरं, स्वराजं स्वाराज्यं, विराजं वैराज्यं, राजानं राजपितरं, परमेष्ठिनं पारमेष्ठ्यं। क्षत्रमजनि, क्षत्रियोऽजनि, विश्वस्य भूतस्याधिपतिरजनि, विशामत्ताजनि, पुरां भेत्ताजनि, असुराणां हन्ताजनि, ब्रह्मणो गोप्ताजनि, धर्मस्य गोप्ताजनीति। तमभ्युत्क्रुष्टं प्रजापतिरभिषेक्ष्यन्नेतयर्चाभ्यमन्त्रयत ॥ १ (१२) ॥

'नि षसाद धृतव्रतो वरुणः पस्त्या ३स्वा' (ऋ. वे. १. २५. १०) साम्राज्याय भौज्याय स्वाराज्याय वैराज्याय पारमेष्ठ्याय राज्याय माहाराज्यायाधिपत्याय स्वा[illegible] सुक्रतुरिति।

तमेतस्यामासन्द्यामासीनं प्रजापतिः पुरस्तात् तिष्ठन् प्रत्यङ्मुख औदुम्बर्यार्द्रया शाखया सपलाशया जातरूपमयेन च पवित्रेणान्तर्धायाभ्यषिञ्चत्,–'इमा आपः शिवतमाः' इत्येतेन तृचेन, (ऐ. ब्रा. अ. ३७. ख. ३) 'देवस्य त्वा' इति च यजुषा, 'भूर्भुवस्स्वः' इत्येताभिश्च व्याहृतिभिः ॥ २ (१३) ॥

अथैनं प्राच्यां दिशि वसवो देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्,–एतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः साम्राज्याय। तस्मादेतस्यां प्राच्यां दिशि ये के च प्राच्यानां राजानः साम्राज्यायैव तेऽभिषिच्यन्ते। सम्राळित्येनानभिषिक्तानाचक्षते, एतामेव देवानां विहितिमनु।

अथैनं दक्षिणस्यां दिशि रुद्रा देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्,–एतेन च तृचेनैतेन च यजुषैताभिश्च

व्याहृतिभिर्भौज्याय । तस्मादेतस्यां दक्षिणस्यां दिशि ये के च सत्वतां राजानो भौज्यायैव तेऽभिषिच्यन्ते । भोजेत्येनानभिषिक्तानाचक्षते, एतामेव देवानां विहितिमनु ।

अथैनं प्रतीच्यां दिश्यादित्या देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्,-एतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः स्वाराज्याय। तस्मादेतस्यां प्रतीच्यां दिशि ये के च नीच्यानां राजानो येऽपाच्यानां स्वाराज्यायैव तेऽभिषिच्यन्ते । स्वराळित्येनानभिषिक्तानाचक्षते, एतामेव देवानां विहितिमनु ।

अथैनमुदीच्यां दिशि विश्वे देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्,-एतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिर्वैराज्याय । तस्मादेतस्यामुदीच्यां दिशि ये के च परेण हिमवन्तं जनपदा उत्तरकुरव उत्तरमद्रा इति वैराज्यायैव तेऽभिषिच्यन्ते। विराळित्येनानभिषिक्तानाचक्षते एतामेव देवानां विहितिमनु ।

अथैनमस्यां ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि साध्याश्चाप्त्याश्च देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्,-एतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभी राज्याय। तस्मादस्यां ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि ये के च कुरुपञ्चालानां राजानः सवशोशीनराणां राज्यायैव तेऽभिषिच्यन्ते । राजेत्येनानभिषिक्तानाचक्षते, एतामेव देवानां विहितिमनु । अथैनमूर्ध्वायां दिशि मरुतश्चाङ्गिरसश्च देवाः षड्भिश्चैव पञ्चविंशैरहोभिरभ्यषिञ्चन्,-एतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभिः पारमेष्ठ्याय माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठायेति स परमेष्ठी प्राजापत्योऽभवत् ।

स एतेन महाभिषेकेणाभिषिक्त इन्द्रः सर्वा जितीरजयत्, सर्वांल्लोकानविन्दत्, सर्वेषां देवानां श्रैष्ठ्यमतिष्ठां पर-

मताम… । साम्र ज्यं भौज्यं स्वाराज्यं व ाज्यं पारम ्यं राज्यं मा ाराज्यमाधिपत्यं जित्वा …ल्लोके, स्वयम्भूः स्वराळमृतोऽ ाऽमिन् स्वर्गे लोके स ान्कामानाप्त ाऽमृतः समभवत् समभवत् ॥ ३ (१४)॥

क्षत्रियाभिषेकः

स य इच्छेदेवंवित् क्षत्रियम्—अयं सर्वा जितीर्जयेत, अयं सर्वांल्लोकान् विन्देत, अयं सर्वेषां राज्ञां श्रै ्यमतिष्ठां प मता ग…, साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारम ्यं राज्यं मा …पत्यम् । अयं समन्तपर्यायी स्यात्, सार्वभौमः सावा ्य आऽन्तादा परार्धात् पृथिव्यै समु… एकराळिति, तमे… महाभिषेकेण …त्रियं …पायित्वाऽभिषिञ्चेत् । यां च रात्रीमजायेथा, यां च …, तदुभयमन्तरेणेष्टापूर्तं ते लोकं सुकृतमायुः प्रजां वृञ्जीयं यदिमे … ।

स य इच्छेदेववि… क्षत्रियो—अहं सर्वा जिती जययेम्, अहं सर्वांल्लोकान् विन्देयम्, अहं सर्वेषां राज्ञां श्रैष्ठ्यम… परमतां गच्छेयं, साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पार ष्ठ्यं राज्यं माहाराज्यमाधिपत्यम्, अहं समंत …यायी स्याम्, सार्वभौमः सावा ्य आऽन्तादा परार्धात् पृथिव्यै स …पयन्ताया एकराळिति, स नं । चिकित्सेत्, स ब्रूयात् सह श्र … या यां च रात्रीमजायेऽहं यां च मेतास्मि, तदुभयमन्तरेणेष्टा …र्तं मे लोकं सुकृतमायुः प्रजां वृञ्जीथा यदि ते द्रुह्ये… ॥ १ (१५)॥

शतपथब्राह्मणम्

[व्रतोपायनम्]

व्रतमुपैष्यन्नन्तरेणाहवनीयं च गार्हपत्यं च प्राङ्तिष्ठन्नप उप स्पृशति तद्यदप उपस्पृशत्यमेध्यो वै पुरुषो यदनृतं वदति तेन पूतिरन्तरतो मेध्या वा आपो मेध्यो भूत्वा व्रतमुपायानीति पवित्रं वा आपः पवित्रपूतो व्रतमुपायानीति तस्माद्वा अप उप स्पृशति ॥ १ ॥

सोऽग्निमेवाभीक्षमाणो व्रतमुपैति ॥ 'अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम्' (वा. सं. १. ५) त्यग्निर्वै देवानां व्रतपतिस्तस्मा एवैतत्प्राह व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतामिति नात्र तिरोहितमिवास्ति ॥ २ ॥

अथ संस्थिते वि सृजते । 'अग्ने व्रतपते व्रतमचारिषं तदशकं तन्मेऽराधि । (वा. सं. २. २८) इत्यशकं ह्येतद्यो यज्ञस्य संस्थामगन्नराधि ह्यस्मै यो यज्ञस्य संस्थामगन्तेन न्वेव भूयिष्ठा इव व्रतमुप यन्त्यनेन त्वेवोपेयात् ॥ ३ ॥

द्वयं वा इदं न तृतीयमस्ति । सत्यं चैवानृतं च सत्यमेव देवा अनृतं मनुष्याः । 'इदमहमनृतात्सत्यमुपैमि '। (वा. सं. १. ५) इति तन्मनुष्येभ्यो देवानुपैति ॥ ४ ॥

स वै सत्यमेव वदेत्। एतद्ध वै देवा व्रतं चरन्ति यत्सत्यं तस्मात्ते यशो यशो ह भवति य एवं विद्वान् सत्यं वदति ॥ ५ ॥

अथ संस्थिते वि सृजते। 'इदमहं य एवास्मि सो ऽस्मि।' (वा. सं. २. २८) इत्यमानुष इव वा एतद्भवति यद्व्रतमुपैति नहि तदवकल्पते यद्ब्रूयादिदमहं सत्यादनृतमुपैमीति तदु खलु पुनर्मानुषो भवति। तस्मादिदमहं य एवास्मि सोऽस्मि। इत्येव व्रतं वि सृजेत ॥ ६ ॥

अथातो ऽशनानशनस्यैव। तदु हाषाढः सावयसो ऽनशनमेव व्रतं मेने मनो ह वै देवा मनुष्यस्या जानन्ति त एनमेतद्व्रतमुपयन्तं विदुः प्रातर्नो यक्ष्यत इति ते ऽस्य विश्वे देवा गृहाना गच्छन्ति ते ऽस्य गृहेषूप वसन्ति स उपवसथः ॥ ७ ॥

तन्न्वानवक्लृप्तं यो मनुष्येष्वनश्नत्सु पूर्वो ऽश्नीयादथ किमु यो देवेष्वनश्नत्सु पूर्वो ऽश्नीयात्तस्मादु नैवाश्नीयात् ॥ ८ ॥

तदु होवाच याज्ञवल्क्यः। यदि नाश्नाति पितृदेवत्यो भवति यद्यु अश्नाति देवानत्यश्नातीति स यदेवाशितमनशितं तदश्नीयादिति यस्य वै हविर्न गृह्णन्ति तदनशितं स यदश्नाति तेनापितृदेवत्यो भवति यद्यु तदश्नाति यस्य हविर्न गृह्णन्ति तेनो देवान्नात्यश्नाति ॥ ९ ॥

स वा आरण्यमेवाश्नीयात् । या वारण्या ओषधयो यद्वा वृक्ष्यं तदु ह स्माहापि बर्कुर्वार्ष्णो माषान्मे पचत न वा एतेषां हविर्गृह्णन्तीति तदु तथा न कुर्याद्व्रीहियवयोर्वा एतदुपजं यच्छमीधान्यं तद्व्रीहियवावेवैतेन भूयांसौ करोति तस्मादारण्यमेवाश्नीयात् ॥ १० ॥

स आहवनीयागारे वैतां रात्रिं शयीत । गार्हपत्यागारे वा । देवान्वा एष उपावर्तते यो व्रतमुपैति स स यानेवोपावर्तते तेषामेवैतन्मध्ये शेते ऽधः शयीताधस्तादिव हि श्रेयस उपचारः ॥ ११ ॥

इडाब्राह्मणान्तर्गतो मनुमत्स्यवृत्तान्तः

मनवे ह वै प्रातःरवनेग्यमुदकमाजह्रुः, यथेदं पाणिभ्या मवनेजनायाहरन्त्येवं तस्यावनेनिजानस्य मत्स्यः पाणी आपेदे ॥ १ ॥

स हास्मै वाचमुवाद । बिभृहि मा पारयिष्यामि त्वेति । कस्मान्मा पारयिष्यसीति । औघ इमाः सर्वाः प्रजा निर्वोढा ततस्त्वा पारयितास्मीति । कथं ते भृतिरिति ॥ २ ॥

स होवाच । यावद्वै क्षुल्लका भवामो बह्वी वै नस्तावन्नाष्ट्रा भवत्युत मत्स्य एव मत्स्यं गिलति, कुम्भ्यां माग्रे बिभरासि । स यदा तामतिवर्धा अथ कर्षूं खात्वा तस्यां मा बिभरासि

स यदा तामतिवर्धा अथ मा समुद्रमभ्यव हासि तर्हि वा आतनाद्रे भवितास्मीति ॥ ३ ॥

शश्वद्ध झष आस । स हि ज्येष्ठं वर्धतेऽथेतिथीं समां तदौघ आगन्ता तन्मा नावमुपकल्प्योपासासै स औघ उत्थित नावमापद्यासै तत्स्त्वा पारयितास्मीति ॥ ४ ॥

तमेवं भृत्वा समुद्रमभ्यजवजहार । स यतिथीं तत्समां परिदिदेश ततिथीं समां नावमुपकल्प्योपासांचक्रे । स औघ उत्थिते नावमापेदे तं स मत्स्य उपन्यापुप्लुवे तस्य शृङ्गे नावः पाशं प्रतिमुमोच तेनैतमुत्तरं गिरिमभिदुद्राव ॥ ५ ॥

स होवाच । अपीपरं वै त्वा वृक्षे नावं प्रति बध्नीष्व तं तु त्वा मा गिरौ सन्तमुदकमन्तश्छैत्सीद् यावदावदुदकं समवायात्तावत्तावदन्ववसर्पासीति । स ह तावत्तावदेवान्ववससर्प । तदप्येतदुत्तरस्य गिरेर्मनोरवसर्पणमित्यौघो ह ताः सर्वाः प्रजा निरुवाहाथेह मनुरेवैकः परिशिशिषे ॥ ६ ॥

[अश्विच्यवनोपाख्यानम्]

यत्र वै भृगवो वाङ्गिरसो वा स्वर्गं लोकं समाश्नुवत तच्च्यवनो वा भार्गवश्च्यवनो वाङ्गिरसस्तदेव जीर्णिः कृत्यारूपो जहे । शर्यातो ह वा इदं मानव ग्रामेण चचार । स तदेव प्रतिवेशो निविविशे ।

तस्य कुमाराः क्रीडन्त इमं जीर्णिं कृत्यारूपमनर्थ्यं मन्यमाना लोष्टैर्वि पिपिषुः ॥ २ ॥

स शार्यातेभ्यश्चुक्रोध । तेभ्योऽसंज्ञां चकार पितैव पुत्रेण युयुधे भ्राता भ्रात्रा ॥ ३ ॥

शर्यातो ह वा ईक्षां चक्रे । यत्किमकरं तस्मादिदमापदीति स गोपालांश्चाविपालांश्च संह्वयितवा उवाच ॥ ४ ॥

स होवाच । को वोऽद्येह किं चिददद्राक्षीदिति । ते होचुः। पुरुष एवायं जीर्णिः कृत्यारूपः शेते, तमनर्थ्यं मन्यमानाः कुमारा लोष्टैर्व्यपिक्षन्निति । स विदां चकार स वै च्यवन इति ॥ ५ ॥

स रथं युक्त्वा सुकन्यां शार्यातीमुपाधाय प्र सिष्यन्द । स आ जगाम यत्रर्षिरास तत् । ॥ ६ ॥

स होवाच । ऋषे नमस्ते, यन्नावेदिषं तेनाहिंसिषम्, इयं सुकन्या, तया तेऽप ह्नुवे, सं जानीतां मे ग्राम इति । तस्य ह तत एव ग्रामः सं जज्ञे । स ह तत एव शर्यातो मानव उद्युयुजे नेदपरं हिनसानीति ॥ ७ ॥

अश्विनौ ह वा इदं भिषज्यन्तौ चेरतुः । तौ सुकन्यामुपेयतुस्तस्यां मिथुनमीषाते तन्न जज्ञौ ॥ ८ ॥

तौ होचतुः । सुकन्ये कमिमं जीर्णिं कृत्यारूपमुप शेष आवामनु प्रेहीति । सा होवाच । यस्मै मां पितादात्‌ नाहं तं जीवन्तं हास्यामीति तद्धायमृषिरा जज्ञौ ॥ ९ ॥

स होवाच । सुकन्ये किं त्वैतदवोचतामिति । तस्मा एतद्व्या चचक्षे । स ह व्याख्यात उवाच । यदि त्वैतत् पुनर्ब्रूतः सा त्वं ब्रूतात्,—न वै सुसर्वाविव स्थो न सुसमृद्धाविवाथ मे पतिं निन्दथ इति । तौ यदि त्वा ब्रवतः केनावमसर्वौ स्वः केनासमृद्धाविति सा त्वं ब्रूतात्,—पतिं नु मे पुनर्युवाणं कुरुतमथ वां वक्ष्यामीति । तां पुनरुपेयतुस्तां हैतदेवोचतुः ॥ १० ॥

सा होवाच । न वै सुसर्वाविव स्थो न सुसमृद्धाविवाथ मे पतिं निन्दथ इति । तौ होचतुः । केनावमसर्वौ स्वः केनासमृद्धाविति । सा होवाच । पतिं नु मे पुनर्युवाणं कुरुतमथ वां वक्ष्यामीति ॥ ११ ॥

तौ होचतुः । एतं ह्रदमभ्यव हर स येन वयसा कमिष्यते तेनोदैष्यतीति तं ह्रदमभ्यव जहार स येन वयसा चकमे तेनो देयाय ॥ १२ ॥

तौ होचतुः । सुकन्ये केनावमसर्वौ स्वः केनासमृद्धाविति । तौ हर्षिरेव प्रत्युवाच । कुरुक्षेत्रेऽमी देवा यज्ञं तन्वते, ते वां यज्ञादन्तर्यन्ति तेनासर्वौ स्थस्तेनासमृद्धाविति । तौ ह तत एवाश्विनौ प्रेयतुस्तावा जग्मतुर्देवान्यज्ञं तन्वानान्त्स्तुते बहिष्पवमाने ॥ १३ ॥

तौ होचतुः । उप नौ ह्वयध्वमिति । ते ह देवा ऊचुर्न वामुप ह्वास्यामहे बहु मनुष्येषु संसृष्टमचारिष्टं भिषज्यन्ताविति ॥ १४ ॥

तौ होचतुः । नि[illegible] वै यज्ञेन यजध्व इति । कथं [illegible]प नु नौ हयध्वमथ वो वक्ष्याव इति। तथेति ता उपाह्वयन्त। ताभ्यामेतमाश्विनं ग्रहमगृह्णंस्तावध्वर्यू यज्ञस्याभवतां। तावेतद्[illegible]स्य शिरः[illegible] । तदद्स्तद्दिवाकीर्त्यानां ब्राह्मणे व्या[illegible]यते यथा तद्यज्ञस्य शिरः प्रतिदध[illegible]स्तस्मादेष स्तुते बहिष्पवमाने ग्रहो गृह्यते स्तुते हि बहिष्पवमान आगच्छताम् ॥॥ १५ ॥

[illegible]पारोहब्राह्मणम् .

अथ नेष्टा पत्नीमुदानेष्यन् । कौशं वासः परिधापयति कौशं वा चण्डातकमन्तरं दीक्षितवसनाज्जघनार्धो वा एष यज्ञस्य यत् पत्नी तामेतत् प्राचीं यज्ञं प्रसादयिष्यन् भवति।अस्ति वै पत्न्या अमेध्यं यदवाचीनं नाभेर्मेध्या वै दर्भाः,तद्यदेवास्या अमेध्यं तदेवास्या एतद्दर्भैर्मेध्यं कृत्वाथैनां प्राचीं यज्ञं प्रसादयति। तस्मान्नेष्टा पत्नीमुदानेष्यन् कौशं वासः परिधापयति कौशं वा [illegible]ण्डातकमन्तरं दीक्षितवसनात् ॥ ८ ॥

अथ निश्रयणीं निश्रयति । स दक्षिणत उदङ् रोहेदुत्तरतो वा दक्षिणा, द[illegible] रोहेत् तथा ह्युदङ् भवति ॥ ९ ॥

स रोक्ष्यन् जायामामन्त्रयते । जाय एहि स्वो रोहावेति । रोहावेत्याह जाया । तद्यज्जायामामन्त्रयतेऽर्धो ह वा एष आत्मनो यज्जाया। तस्माद्यावज्जायां न विन्दते नैव तावत् प्रजायतेऽसर्वो हि तावद्भवत्यथ यदैव जायां विन्दतेऽथ प्रजायते तर्हि हि सर्वो भवति; सर्व एतां गतिं गच्छानीति तस्माज्जायामामन्त्रयते ॥ १० ॥

स रोहति । प्रजापतेः प्रजा अभूमेति प्रजापतेर्ह्येष प्रजा भवति यो वाजपेयेन यजते ॥ ११ ॥

अथ गोधूमानुपस्पृशति । स्वर्देवा अगन्मेति स्वर्ह्येष गच्छति यो वाजपेयेन यजते ॥ १२ ॥

तद्यद्गोधूमानुपस्पृशति—अन्नं वै गोधूमा, अन्नं वा एष उज्जयति यो वाजपेयेन यजते, अन्नपेयं ह वै नामैतद् यद्वाजपेयं। तद्यदेवैतदन्नमुदजैषीत्तेनैवैतदेतां गतिं गत्वा संस्पृशते तदात्मन् कुरुते तस्माद्गोधूमानुपस्पृशति ॥ १३ ॥

अथ शीर्ष्णा यूपमत्युज्जिहीते। अमृता अभूमेति देवलोकमेवैतेनोज्जयति ॥ १४ ॥

अथ दिशोऽनुवीक्ष्यमाणो जपति।'अस्मे वोऽस्त्विन्द्रियमस्मे नृम्णमुत क्रतुरस्मे वर्चांसि सन्तु व इति' (वा. सं. ९. २२.) सर्वं वा एष इदमुज्जयति यो वाजपेयेन यजते, प्रजापतिं ह्युज्जयति,

सर्वमु सेवेदं ...... सोऽस्य सर्वस्य यश इन्द्रियं वीर्यं। संवृज्य त ात्मन्धत्ते त ात्मन् कुरुते तस्माद्विशोऽ वीक्षमाणो जपति ॥ १५ ॥

अथैनमूषपुटैरनूदस्यन्ति । पशवो वा ऊषा, अन्नं वै पशवो। अन्नं वा एष उज्जयति यो वाजपेयेन यजते, अन्नपेयं ह वै नामैतद्यद्वाजपेयं, तद्यदेवैतदन्नमुदजैषीत्, तेनैवैतदेतां गतिं गत्वा संस्पृशते तदात्म- कुरुते तस्मादेनमूषपुटैरनूद-स्यन्ति ॥ १६ ॥

आश्वत्थेषु पलाशेषूपनद्धा भवन्ति । स यद्देवादोऽश्वत्थे तिष्ठत इन्द्रो मरुत उपामन्त्रयत, तस्मादाश्वत्थेषु पलाशेषूपनद्धा भवन्ति। विशोऽनूदस्यन्ति, विशो वै मरुतो, अन्नं विशस्तस्माद्विशोऽनूदस्यन्ति सप्तदश भवन्ति, सप्तदशो वै प्रजापतिस्तत् प्रजा तिमुज्जयति ॥ १७ ॥

अथ...ावेक्षमाणो जपति।'नमो मात्रे पृथिव्यै नमो मात्रे पृथिव्या इति'। बृहस्पतेर्ह वा अभिषिषिचानात् पृथिवी बिभयाञ्चकार-महद्वा अयमभूद्योऽभ्यषेचि, यद्वै मायं नावदृणीय दिति। बृ स्पतेर्ह पृथिव्यै बिभयाञ्चकार-यद्वै मेयं नाव-...न्वीतेति, तदनयैवैतन्मित्रधेयमकुरुत, न हि माता पुत्रं हिनस्ति न पुत्रो मातरम् ॥ १८ ॥

बृहस्पतिसवो वा एष यद्वाजपेय । पृथिव्यु हैतस्माद्बि-भेति-महद्वा अयमभूद्योऽभ्यषेचि, यद्वै मायं नावदृणीया

वृति। एष उ हास्यै बिभेति यद्वै मेयं नाव न्यातीति, तं नेव-तन्मित्रधेयं कुरुते नहि माता पुत्रं हिनस्ति न पुत्रो मातरम् ॥ १९ ॥

अथ हिरण्यमभ्यवदधाति । अमृतमायुर्हिरण्यं तदमृत आयुषि प्रतितिष्ठति ॥ २० ॥

ગૂજરાતી અનુવાદ

વૈદિકપાઠાવલી

૧

ઋગ્વેદ મં. ૧. સૂ. ૧.]

દેવતા અગ્નિ, છન્દ ગાયત્રી, ઋષિ વિશ્વામિત્ર-પુત્ર મધુચ્છંદા.

ૐ;અગ્નિને હું સ્તવું છું, પુરોહિતને, યજ્ઞના દેવ ઋત્વિજને, હોતાને, રત્નના ઉત્તમ આપનારને. ૧

અગ્નિ પૂર્વેના ઋષિઓથી તેમ જ નવીનોથી સ્તુત્ય છે; તે દેવોને અહીંઆં લાવો. ૨

અગ્નિ વડે તે ધન મેળવો—દિવસે દિવસે પુષ્ટ થતુંજ, યશસ્વી, અને ઘણું વીરોવાળું. ૩

હે અગ્નિ! જે અધ્વર યજ્ઞને તું બધી બાજુથી ઘેરીને રહે છે તે જ દેવોમાં જાય છે. ૪

હોતા, ક્રાન્તપ્રજ્ઞ, સાચો, વિવિધકીર્તિવાળો અગ્નિ દેવ દેવો સાથે આવો. ૫

હે અગ્નિ! તું જે દાન કરનારનું કલ્યાણ કરે છે તે તારૂં જ, હે અંગિરા! સત્ય છે. ૬

હે અગ્નિ! અંધકારને પ્રકાશનાર, દિને દિને ભાવનાથી અમે તારી પાસે નમસ્કાર કરતા આવીએ છીએ. ૭

---

૧ રત્નના—સંપત્તિના.

૪ અધ્વર—' હિંસા રહિત; એટલે કે અગ્નિથી દરેક બાજુએ રક્ષિત યજ્ઞની રાક્ષસો વગેરે હિંસા કરી શકતા નથી ' (સાયણાચાર્ય) એટલે કે અખંડિત. ઓલ્ડન્બુર્ગ 'Worship પૂજન' એવો અર્થ કરે છે. સે. બુ. ઈ. પુ. ૪૬. પૃ. ૧

૬ દાન કરનારનું—' હવિ આપનાર યજમાનનું '. સા.

૭ 'અંધકારમાં પ્રકાશનાર'—[illegible]નો ઓલ્ડન્બર્ગ એવો અર્થ કરે છે. સે. બુ. ઈ. પુ. ૪૬. પૃ. ૧. ગ્રીફિથ ' રાત્રિનો નાશ કરનાર ' એવો

अध्वरोमां प्रकाशमान, ऋतना पालक, देदीप्यमान अने पोताना सदनमां वधतानी [पासे अमे आवीए छीए.] ८

हे अग्नि! ते [तुं] अमने, पिता जेम पुत्रने, सुगम्य था; अमारा कल्याण माटे साथे रहे. ९

२

देवता वरुण, छंद गायत्री, ऋषि शुनःशेप.

हे देव! वरुण! तारूं व्रत, लोकोनी जेम, दिवसे दिवसे जे अमे तोडीए— १

अनादर करनारना हणी नाखे एवा वधने अमने सोंपीश नहि; गुस्से थयेलाना गुस्साने अमने सोंपीश नहि. २

हे वरुण! रथी जेम जोडेला घोडाने छोडे छे तेम अमे तारा मनने स्तुतिओ वडे महेर माटे मोकळुं करीए छीए. ३

मारी क्रोधरहित भावनाओ कल्याणनी प्राप्ति माटे दूरथी उडी आवे छे, पक्षीओ जेम माळा समीप. ४

क्षत्रश्री, विशाळ नजरवाळा, नर, वरुणने क्यारे महेर करवा आ तरफ करीए (लावीए)? ५

अर्थ करे छे. बन्ने संबोधन विभक्ति ले छे. 'रात्रावहनि च रातदिवस' एम सायणाचार्य अर्थ करे छे.

भावना साथे—धिया 'बुद्धिथी' सा. Prayer–स्तुति' ग्रीफीथ वगेरे.

१ 'ते व्रत पण पूरूं करो' एम सायणाचार्य अध्याहृत ले छे.

२ 'अमने तारा गुस्सानो भोग करीश नहि' एवुं तात्पर्य देखाय छे.

३ सायण विसीमहिनो अर्थ 'विशेषेण बध्नीमहि' करे छे अने [illegible]नो अर्थ 'सम्यक्खंडित' एटले के दूर जवाथी थाकेलो एवो अर्थ करे छे.

४ पक्षीओ जेम पोताना रहेठाण तरफ उडी आवे तेम मारी भावनाओ उडी आवे छे. [illegible]: अने व[illegible]नो अर्थ स्पष्ट समजातो नथी. सायण ने अनुसरी अर्थ कर्यो छे.

કામના કરતા તેઓ (બે) તે સાથે જ ભોગવે છે, વ્રત-
ધારી યજમાન વિષે પ્રમાદ કરતા નથી. ૬

જે અંતરિક્ષથી ઉડતા પક્ષીઓના પદને જાણે છે, સમુ-
દ્રનો (વાસી) નાવના (પદને) જાણે છે; ૭

પ્રજાવાળા બાર માસ વ્રતધારી (વરુણ) જાણે છે, તેનામાં
જે ઉત્પન્ન થાય છે તે, તે જાણે છે; ૮

વિશાળ, ઊંચા, મોટા વાતના માર્ગને જાણે છે, જે
ઉપર વસે છે (તેમને દેવોને) જાણે છે. ૯

વ્રતધારી, સુક્રતુ વરુણ પ્રજાઓમાં સામ્રાજ્ય માટે બેઠો. ૧૦

અહીંથી સર્વ અદ્‌ભુતો જાણી, જે કરાઇ ગયેલા અને
કરાવાના છે તેને નિહાળે છે; ૧૧

તે સુક્રતુ આદિત્ય અમારે માટે બધા દિવસો સુમાર્ગ
કરો. અમારાં આયુષ વધારો. ૧૨

હિરણ્યકવચને ધારણ કરતો વરુણ પ્રકાશમાનને પહેરે
છે; ચારો આજુબાજુ બેસે છે. ૧૩

જેને સતાવનારા સતાવતા નથી, માણસોના દ્રોહીઓ
(જેનો દ્રોહ કરતા નથી), હણનારાઓ દેવને [હણતા] નથી. ૧૪

વળી જેણે માણસોમાં સંપૂર્ણ યશ કર્યો અને અમારા
ઉદરોમાં. ૧૫

---

૬ તેઓ બે એટલે મિત્ર અને વરુણ.

૮ ‘બાર મહિના તેમાં ઉત્પન્ન થતી પ્રજાઓ અને તેમની વચ્ચે આવતો અધિક માસ આ બધું વરુણ જાણે છે’ (સાયણ). ગ્રીફિથ ‘વર્ષોની પ્રજા’ નો અર્થ ‘વર્ષોના દિવસો’ કરે છે.

૯ ઊંચા. – જ્વલ્ય—દીર્ઘ‌વીય. સા.

૧૩ પ્રકાશમાન વસ્ત્ર પહેરે છે. સાયણ निर्णिज નો અર્થ ‘પુષ્ટ સ્વશરીર’ કરે છે.

૧૪ યશનો અર્થ સાયણાચાર્ય ‘અન્ન’ કરે છે ‘બધાય માણસો માટે સંપૂર્ણ અન્ન કર્યું ખાસ કરીને અમારા ઉદરો માટે’. સંભવ છે કે

મારી ભાવનાઓ વિશાળ નજરવાળાને ઈચ્છતી તેની પાસે આવે છે, જેમ ગાયો ગોચરને. ૧૬

આપણે સાથે ફરીથી વાતો કરીએ, શાથી જે મારૂં મધુ તૈયાર છે. હોતાની જેમ તું ગમતું ખાય છે, ૧૭

સૌને જોનારને મેં જોયો! પૃથ્વી ઉપર રથ જોયો! મારી આ વાણી સ્વીકાર. ૧૮

હે વરુણ! મારા આ કહેણને તું સાંભળ, આજે મહેર કર. રક્ષણની ઈચ્છાવાળો હું તને બોલાવું છું. ૧૯

હે મેધાવિન્! તું સ્વર્ગ અને પૃથ્વી ઉપર વિરાજે છે તે તું અમારા કલ્યાણ વિષે સાંભળ. ૨૦

અમારા સૌથી ઊંચા પાશને છોડ, મધ્યમને છોડ, નીચેનાને જીવીએ માટે દૂર કર. ૨૧

૩

દેવતા ઈંદ્ર, છંદ ત્રિષ્ટુપ્ ઋષિ આંગિરસ હિરણ્યસ્તૂપ.

ઈંદ્રનાં વીર કર્મોને હું વર્ણવું-જે વજ્રીએ પ્રથમ કર્યાં: અહિને હણ્યો, પાણી તોડયાં, પર્વતોના વહેણો ફોડયાં. ૧

પર્વતમાં આશ્રય કરતા અહિને હણ્યો, ત્વષ્ટાએ એને માટે સુસવાટ કરતું વજ્ર તૈયાર કર્યું; ભાંભરતી ગાયો જેમ ઝરતાં પાણી એકદમ સમુદ્ર તરફ ગયાં. ૨

અહીંઆં 'યશ' શબ્દ ઉપર શ્લેષ કર્યો હોય. એમ હોય તો પહેલી લીટીમાં 'કીર્તિ' અને બીજીમાં 'અન્ન' લઈ શકાય.

૨૦ **યામનિ**—કલ્યાણ. ગ્રીફિથ આનો અર્થ 'ગમન' કરે છે; 'તારા માર્ગે જતો તું સાંભળ.'

૨ **સ્વર્ય**—'સુષ્ઠુ પ્રેરણીય અથવા સ્તુત્ય.' (સાયણ.) 'દિવ્ય' (ગ્રીફીથ)

વૃષભની જેમ માતેલાએ સોમની વાંછા કરી. નીચોવેલાને ત્રિકદ્રુકોમાં પીધો. મઘવાએ વજ્રને સાયક તરીકે લીધું. અહિઓના આ અગ્રજને હણ્યો. ૩

જ્યારે ઇંદ્રે અહિઓના અગ્રજને હણ્યો અને પછી માયાવીઓની માયાને હણી અને પછી સૂર્ય અને પ્રકાશમાન ઉષાને જન્મ આપ્યો ત્યારે (તને) શત્રુ ન મળ્યો. ૪

ઇંદ્રે, વધ કરે એવા મોટા વજ્રથી વૃત્રને, વૃત્રતરને ખભા તુટીજાય એમ હણ્યો. કુહાડા વડે તોડી પાડેલા સ્કંધોની જેમ અહિ પૃથ્વી ઉપર પડ્યો. ૫

હલકા યોદ્ધાની જેમ દુષ્ટ મદવાળાએ બળવાનને પીડે એવા અને વેગવાળા મહાવીરને આહ્વાન કર્યું. એનાં શસ્ત્રોના સમુદાયને એ ન તર્યો. ઇંદ્રશત્રુએ (ઇંદ્ર છે શત્રુ જેનો એવા તેણે) નદીઓના ચૂરા કરી નાખ્યા. ૬

---

૩ **त्रिकद्रुक**—'જ્યોતિર્યાગ, ગૌયાગ, આયુર્યાગ આ નામના ત્રણ યાગો ત્રિકદ્રુક કહેવાય છે' (સાયણ). યૂરોપિઅન વિદ્વાનો 'પીવાનું વાસણ' એવો અર્થ કરે છે. આ શબ્દનો અર્થ હજી શંકાસ્પદ છે.

सायक—'અંધક' (સાયણ). સામાન્ય અસ્ત્રના અર્થમાં લઇ શકાય.

૫ **वृत्रतर**—'અતિશયતાથી લોકોને આવરનાર, અંધકારરૂપ' અથવા 'વૃત્રોથી–આવરણોથી સર્વ શત્રુઓને તરે છે'. આ શબ્દ વૃત્રના વિશેષણ તરીકે છે. (સાયણ). ગ્રીફિથ 'વૃત્રોમાં સૌથી ખરાબ' એવો અર્થ કરે છે.

व्यंस—'ખભા વિનાનો થાય તેમ. અવ્યયીભાવસમાસ.' (સાયણ) કેટલાક **व्यंस** ને વિશેષનામ તરીકે ગણે છે. અને, 'વૃત્રતર'નો અર્થ 'ન કરતાં ખરાબ' એવો કરે છે. વ્યંસને વિશેષ નામ ગણી 'વૃત્રતર વ્યંસને હણ્યો.' મેકડોનલ હી. ઋ. હે. ઑ. ઇ. સી.

૬ **अयोद्धा**—'યોદ્ધારહિત' (સાયણ).

વૃત્ર પડતાંની સાથે જ નદીના કાંઠા અને તે ઉપરના પાષાણ વગેરેના ચુરા થઇ ગયા. (સાયણ).

પગ વિનાનાએ, હાથ વિનાનાએ ઇંદ્ર સામે બાથ ભીડી. એના સાનુ (સાનુ જેવા સ્કંધ) ઉપર વજ્ર માર્યું. બળવાનનો સમોવડીઓ થવા ઇચ્છતો ખસ્સી વૃત્ર અનેક સ્થાને વ્યસ્ત થઈ પડયો. ૭

આ રીતે ફાટી પડેલા નદની જેમ પડેલાને, મનને [પણુ] ઓળંગી જતાં પાણી ઓળંગી જાય છે. વૃત્ર જેમને પોતાની મોટાઇથી ઘેરીને ઉભો હતો તેમના પગ નીચે [તે] અહિ પડયો. ૮

વૃત્રની માતા હાથ નીચા કરી રહી; ઇંદ્રે એની નીચે હથિયાર ફેંકયું. ઉપર જનેતા અને નીચે પુત્ર હતો. પોતાના વાછરડા સાથે જેમ ગાય સુવે તેમ [એ] દાનવી સુતી. ૯

ન થોભતાં, ન નિવેશ કરતાં પાણીની મધ્યે શરીર ઢંકાઈ ગયું. વૃત્રના નામરહિત શરીર ઉપર પાણી ફરી વળે છે. ઇંદ્રશત્રુ (ઇંદ્ર છે શત્રુ જેનો એવો તે) દીર્ઘ અંધકારમાં સુતો. ૧૦

પણિ વડે રોકાયેલી ગાયોની જેમ રોકાયેલાં પાણી દાસ-પતિવાળાં અને અહિથી રક્ષાયેલાં હતાં; પાણીની બખોલ જે બંધ હતી તે વૃત્રને મારી ઉઘાડી નાખી. ૧૧

જ્યારે તેણે વજ્ર ઉપર તને પ્રત્યાઘાત કર્યો ત્યારે હે ઇંદ્ર! તું અદ્વિતીય દેવ! ઘોડાનો વાળ થયો; તેં ગાયો જીતી, હે શૂર તેં સોમ મેળવ્યો. સાત સિંધુઓને વહેવા માટે છુટા કર્યા. ૧૨

આને ન વિદ્યુત રોકી શકી (કે) ન ગર્જના રોકી શકી. જે વૃષ્ટિ કરી અને જે કડાકા કર્યા (તે પણ તેને ન રોકી શકયા,) જ્યારે ઇંદ્ર અને અહિ લડયા ત્યારે મઘવા બીજી માયાઓ-માંથી પણ જીતી નીકળ્યો. ૧૩

૯ બાહુ વયઃ–'બળ' પણ.

૧૨ 'જેમ ઘોડાનો વાળ અનાયાસે મક્ષિકા વગેરેનું નિવારણ કરે છે તેમ વૃત્રને ગણકાર્યા વિના નિવાર્યો.' (સાયણ.)

૧૩ અપરીભ્યઃ—'બીજી માયાઓમાંથી' એવો અર્થ યુરોપિઅન વિદ્વાનો કરતા નથી. તેઓ 'સદાને માટે' એવો અર્થ કરે છે.

હે ઈંદ્ર ! અહિની વ્હારે ધાનાર કોને તેં જોયો ? જેથી તારા—હણનારાના—હૃદયમાં બીક આવી ? નવ અને નેવું સરિતાઓને અને અંતરિક્ષને બીધેલા શ્યેનની જેમ તું તરી ગયો. ૧૪

ઈંદ્ર જંગમ અને સ્થાવરનો રાજા છે. શાન્ત અને શીંગડાંવાળાનો વજ્રબાહુ (રાજા છે). તે રાજા પોતાના લોકોમાં રહે છે જેમ નેમિ આરાને, તેમ તે ઘેરીને રહ્યો. ૧૫

૪

દેવતા ઉષા, છન્દ ૧–૪ ગાયત્રી, ૧૩–૧૮ ઉષ્ણિક્, બાકીના ૮ ત્રિષ્ટુપ્, ઋષિ ગોતમ.

આ તે ઉષાઓએ ધ્વજને પ્રગટ કર્યો. અંતરિક્ષના પૂર્વ અર્ધમાં તેજને લીંપે છે. આયુધોને તેજ કરતા વીરોની જેમ ઝળહળતી ગાયમાતાઓ પ્રતિ દિન જાય છે. ૧

અરુણ કિરણો સહેજે ઊંચાં ચઢયાં. સહેલાઇથી જોડી શકાય એવી રાતી ગાયો. જોડી. પહેલાંની જેમ ઉષાએ ઉજ્જવલતા કરી પ્રકાશમાન ભાનુમાં ઝળહળતાં [ગાયો–ઉષાઓ] લીન થયાં. ૨

---

